[4] V. 42ff.
[5] V. 49.
[6] V. 94ff.
[7] V. 188.

Kāryatva or *Kṛtakatva* is *Sopādhika* and*Sattva* is *Nirupādhika*.[1] The *Kṛtakatva* or *Kāryatva* is *Sopādhika* because it denotes such a thing which is produced depending on other.[2] It means that it is produced by some cause. Though according to Dharmakīrti the production of each and everything is dependent upon the causes, really speaking there is no difference between *Sattva* and *Kṛtakatva*. But according to Dharmakīrti these two words have different meanings. The word *Sattva* denotes only the existence of a thing while the word *Kṛtaka* denotes such existence which is dependent upon the causes. This is why he has called one as *Nirupādhika* while the latter as *Sopādhika*. In this context in order to establish the momentariness of all things he argues that if the destruction requires the cause it will not necessarily happen. So the destruction is causeless and hence is the nature of the thing itself. So the real is momentary by nature. It does not require any cause for its destruction.[3]

Dharmakīrti maintains that the inference is either affirmation or negation; the *Svabhāva* (identity) and *Kārya* (causation) *Hetu* affirm while *Anupalabdhi* negates. As regards *Anupalabdhi* it is maintained that the non-cognition *(Anupalabdhi)* of a certain thing is the non-existence of it. It is explained that as long as a person does not know a certain thing, for him that thing is nothing more than non-existent, since it does not serve any purpose. As long as a person does not know a thing he does not decide its existence and without the decision of its existence there is no possibility of expressing it as existent and hence the impossibility of action *(Pravṛtti)*. So it can be said that the *Anupalabdhi* is the means to negate the action with regard to a thing which may be *Dṛśya* (perceptible) or *Adṛśya* (imperceptible).[4] But a discrimination is necessary here that only the *Anupalabdhi* (negation) of *Dṛśya* is valid to establish the non-existence of it. But the *Anupalabdhi* of *Adṛśya* creates a doubt about it, though

[1] V. 189.

[2] *Apekṣitaparavyāpāro hi svabhāvaniṣpattau bhāvaḥ kṛtakaḥ*, p. 62, l. 2.

[3] V. 196ff.

[4] V. 200ff.

both of them are valid with regard to restricting the activity of the cogniser.[1]

Dharmakīrti has explained many types of *Anupalabdhi* in the present volume. But it is needless to dwell on this topic here.

(5) *The Meaning of Words*

According to Ācārya Dharmakīrti the use of the word *(Śabda)* consists not in its being subservient to the objective world but is expressive of man's desire.[2] The words disregard the external objects, but are expressed according to the will of the person.[3] The person using the language gives to the words the meaning according to his will and the words connote the very meaning. This symbolic expression is inapplicable to *Svalakṣaṇa*,[4] and is possible only with regard to *Sāmānya*. So the meaning of the word is *Sāmānya* and not *Svalakṣaṇa*.[5] In this context Dharmakīrti has refuted the various theories depicting *Sāmānya* as an external object and has established it as having negative character.[6]

Though the meaning is given to the words according to the desire of a person, the desire itself is not uncontrollable *(Niraṅkuśa)*. It is controlled by the purposeful actions of the person, who does not act in a haphazard manner but all his actions are guided by motivation. Similarly the use of language also should serve his purpose.[7] Now it is necessary to bring out the purpose served by the words. The words, expressive of motivation of the person, help him to discriminate one object from the other, so that he may be directed towards the right thing rejecting the wrong one.[8] Thus, distinguishing the right from the wrong is the very purpose served by the word or speech;

[1] V. 201.
[2] *Vṛtti* V. 62
[3] V. 68
[4] V. 94
[5] VV. 98-188
[6] VV. 95 ff
[7] *Vṛtti* on V. 95
[8] *Vṛtti on* V. 98

hence, the meaning of the word is discrimination *(Anyavyāvṛtti* or *Vyavaccheda)*. If the purpose is fulfilled only by this much there is no necessity of postulating the *Sāmānya* as an external object. It should be regarded as a negation *(Apoha)* only.[1]

(6) *The Scope of the Validity of Scriptures*

Dharmakīrti maintains that the non-operation of *Pratyakṣa*, *Anumāna* and *Āgama* does not determine the non-existence of the *Adṛśya*.[2] The objection is raised by the opponents that though *Pratyakṣa* and *Anumāna* may not be competent to establish the non-existence of such a thing, the *Āgama* at least is competant since it is the very repository of all knowledge. Dharmakīrti replies that the *Āgamas* do not contain the description of all the reals, simply because they are not concerned with all things. So, if anything is not described in the *Āgama*, it cannot be said that it is non-existent. The second point is that the *Āgama* consists of words and as has already been established since the words are not connected with the external reals, it can be said that they cannot establish the existence or non-existence of external reals. So the *Āgama* is concerned with the intention of the speaker and with the external world.[3]

Now the question arises, if the words are not concerned with the existence and non-existence of reals, how is it that Diṅnāga established the validity of *Āgamas* in the form of *Anumāna* and why did he not establish outright the invalidity of the *Āgama*.

In reply to this, Dharmakīrti states that it is the very nature of human mind to rely on the *Āgamas*. It finds that *Āgama* describes the fact that violence results in the misery of hell and by avoiding the violence one gets the happiness of heaven. Human mind craves for the pleasure of heaven. The *Āgamas* speak often of such pleasure and pain in heaven and hell respectively. Hence it has no other guide except the *Āgamas* ; further,

---

[1] V. 99

[2] Vide p. 71, L 18 ff

[3] Vide V. 216

the supra-sensuous facts narrated in the *Āgamas* cannot be contradicted by other valid knowledge. So the human mind naturally accepts the validity of the *Āgamas*. The only way out is to examine the *Āgamas* and then only accept its validity.[1]

It remains to be seen which *Āgama* is to be examined. Here Dharmakīrti says that that *Āgama*, in which there is absence of contradictory statements and there is guidance as to the possible aids and which instructs regarding purposeful actions, is to be examined, and if the *Āgama* is contrary to such things the human mind will not attach any importance to it.[2]

Āgama describes the two types of reals : *Dṛṣṭa* and *Adṛṣṭa*. The description of *Dṛṣṭa* can be valid only if *Pratyakṣa* attests it and does not contradict it. With regard to *Adṛṣṭa* we have two types of inference : one dependent upon the external real (*Vastubalapravṛtta*), that is to say, it does not depend upon *Āgama*, and the other inference is dependent upon the *Āgama*. If there is no contradiction by these types of inference, we can say that the description of such a thing in the *Āgama* is uncontradicted by inference. In this way, when we see that there is no contradiction of *Āgama* by either *Pratyakṣa* or *Anumāna*, the *Āgama* is valid, otherwise not.[3]

On the strength of the validity of such portions in the *Āgamas*, the validity of the rest, about which there is no possibility of examination because of their supra-sensuous nature, is inferred since there is no other way (*Agatyā*). This was the intention of Diṅnāga while establishing the validity of *Āgama* in the form of *Anumāna*.[4] And only such *Āgama* whose validity is established in such a way, can lead to a purposeful action.[5]

---

[1] *tat sati pravartitavye varamevaṁ pravṛtta iti parīkṣayā prāmāṇyaṁ āha*,— p. 72. l. 3

[2] V. 217

[3] V. 218 and its *Vṛtti*

[4] V. 219

[5] *PV (K)*, p. 393

Here we should discriminate between the knowledge derived from *Āgama* about the supra-sensuous things and from the speech of an ordinary person. The knowledge derived from an ordinary person is simply about the intention of the speaker while the knowledge derived from *Āgama* is also an inference as has been explained above.[1]

Though Dharmakīrti has explained the view of Diṅnāga in this manner he is quite aware of inconsistency in the explanation. According to him the above mentioned inference is valid for the person who infers and wants to act according to it. So only for him that *Āgama* is an inference.[2] Really speaking it cannot be called an inference because there is no relation of the words with the external things. The *Āgama* itself is nothing more than the words. This is why Dharmakīrti uses the word '*Agatyā*' while explaining the view of Diṅnāga.[3]

There is one more argument to establish the *Āgama* as inference because of its non-discrepancy. The non-discrepancy about the *Heya* and *Upādeya*, and the means for them, is an established fact. On the ground of this fact, the inference is made with regard to other minor dctails of the *Āgama*. In this way when we see that the preceptor is quite consistent with regard to the major fact, there is no possibility of cheating in minor details. With such a view, Diṅnāga has established the validity of *Āgama* for a person who wants to act according to the dictates of the *Āgama*. Really speaking this was accepted by Diṅnāga only because there was no other way out. Rightly understood, such inference is not without error.[4]

The Jainas believe that the omniscient person perceives the things as they are and preaches accordingly. So *Āgama* of only such a person is valid. While rejecting this view Dharmakīrti

---

[1] *Vṛtti* on V. 219

[2] *PV* (K), p. 394

[3] *Vṛtti* on V. 220

[4] V. 220 and its *Vṛtti*

says that it is impossible to know the omniscience of a person,[1] because there is no possibility of valid knowledge whether a certain person is with or without vices.[2] This does not mean that Dharmakīrti rejects the possibility of a person without faults. No doubt the possibility is there but the knowledge about a person as such is difficult.[3] So we cannot say that a particular *Āgama* is non-discrepant, because it is preached by a person who knows the things as they are.

In this context Dharmakīrti criticises in detail the theory of the Mīmāṁsakas that the Vedas are *Apauruṣeya*, and has established that each and every word is *Pauruṣeya* or is spoken by a person.[4]

Sanskrit College,
Banaras Hindu University.

Dalsukhbhai Malvaniya

---

[1] V. 221
[2] V. 222
[3] Vv. 223—226
[4] VV. 227 ff

आचार्यधर्मकीर्तिप्रणीतं

प्रमाणवार्तिकम्

स्वोपज्ञवृत्तिसहितम्।

स्वार्थानुमानपरिच्छेदः।

॥ [1b] ॐ नमः सर्वज्ञाय ॥

विधूतकल्पनाजालगम्भीरोदारमूर्त्तये।
नमः समन्तभद्राय समन्तस्फुरणत्विषे ॥१॥

प्रायः प्राकृतसक्तिरप्रतिबलप्रज्ञो जनः केवलं
नानर्थ्येव सुभाषितैः परिगतो विद्वेष्टयपीर्ष्यामलैः।
तेनायं न परोपकार इति नश्चिन्ताऽपि चेतश्चिरं
सूक्ताभ्यासविवर्द्धितव्यसनमित्यत्रानुबद्धस्पृहम् ॥२॥

अर्थानर्थविवेचनस्यानुमानाश्रयत्वात्तद्विप्रतिपत्तेस्तद्व्यवस्थापनायाह—

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥३॥

पक्षो धर्मी, अवयवे समुदायोपचारात्। प्रयोजनाभावादनुपचार इति चेत्। न। सर्वधर्मिधर्मप्रतिषेधार्थत्वात् तदेकदेशत्वात्तदुपचारयोग्यधर्मिधर्मप्रतिपत्त्यर्थम्। तथा च चाक्षुषत्वादिपरिहारः।

धर्मवचनेनापि धर्म्याश्रयसिद्धौ धर्मिग्रहणसामर्थ्यात् प्रत्यासत्त्या साध्यधर्मिसिद्धिरिति चेत्। न। दृष्टान्तधर्मिणोऽपि प्रत्यासत्तेः। तदंशव्याप्त्या दृष्टान्तधर्मिणि सत्त्वसिद्धेः[1]। धर्मिवचनात् साध्यधर्मिपरिग्रहः। सिद्धे पुनर्वचनं नियमार्थमाशङ्क्येत। सजातीय एव सत्त्वमिति सिद्धेऽपि विजातीयव्यतिरेके साध्याभावे असत्त्ववचनवत्। सामर्थ्यादर्थगतौ प्रतिपत्तिगौरवपरिहारार्थं च पक्षवचनम्। पक्षस्य धर्मत्वे तद्विशेषणापेक्षस्यान्यत्राननुवृत्तेरसाधारणतेति चेत्। न। [अ]योगव्यवच्छेदेन विशेषणाद्—यथा चैत्रो धनुर्द्धरः। नान्ययोगव्यवच्छेदेन—यथा पार्थो धनुर्द्धरः—इत्याक्षेप्स्यामः।

तदंशस्तद्धर्मः, वक्त्रभिप्रायवशात् न तदेकदेशः। पक्षशब्देन समुदायाऽवचनात्।

---

[1] ०सिद्धिः—क०

व्याप्तिर्व्यापकस्य तत्र भाव एव व्याप्यस्य वा तत्रैव भावः । एतेनान्वयव्यतिरेकौ यथास्वं प्रमाणेन निश्चितावुक्तौ, पक्षधर्मश्च ।

त एते कार्यस्वभावानुपलब्धिलक्षणास्त्रयो हेतवः । यथाऽग्निरत्र धूमात् । वृक्षोऽयं शिंशपात्वात् । प्रदेशविशेषे क्वचिन्न घट उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः । यदि स्यादुपलभ्यसत्त्व एव स्यात्, नान्यथा । तेनोपलब्धिलक्षणप्राप्तसत्त्वस्येत्युक्तं भवति ।

तत्र द्वौ वस्तुसाधनावेकः प्रतिषेधहेतुः । स्वभावप्रतिबन्धे हि सत्यर्थोऽर्थं न व्यभिचरति, तदात्मत्वात् । तदात्मत्वे साध्यसाधनभेदाभाव इति चेत् । न । धर्मभेदपरिकल्पनादिति वक्ष्यामः । तथा चाह—"सर्व एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिन्यायेन" इति । भेदो धर्मधर्मितया बुद्ध्याकारकृतो नार्थोऽपि, विकल्पभेदानां स्वतन्त्राणामनर्थाश्रयत्वात्[1] । तत् कल्पितविषयादर्थप्रतीतावनर्थप्रतिलम्भ एव स्यात् । कार्यस्यापि स्वभावप्रतिबन्धः, तत्स्वभावस्य तदुत्पत्तेरिति । एतौ द्वावनुमेयप्रत्ययौ साक्षादनुत्पत्तेरतत्प्रतिभासित्वेऽपि तदुत्पत्तेस्तदव्यभिचारिणाविति प्रमाणं प्रत्यक्षवत् । प्रत्यक्षस्यापि ह्यर्था[2a]ऽव्यभिचार एव प्रामाण्यम्, तदभावे भाविनस्तद्विप्रलम्भात् । अव्यभिचारश्चान्यस्य कोऽन्यस्तदुत्पत्तेः । अनायत्तरूपाणां सहभावनियमाभावात् ॥

यदि तदुत्पत्तेः कार्यं गमकम्, सर्वथा गम्यगमकभावः, सर्वथा जन्यजनकभावात् । न । तदभावे भवतस्तदुत्पत्तिनियमाभावात् । तस्मात्—

कार्यं स्वभावैर्यावद्भिरविनाभावि कारणे ।

तेषां

हेतुः[2]

तत्कार्यत्वनियमात् । तैरेव धर्मैर्ये तैर्विना न भवन्ति ।

अंशेन जन्यजनकत्वप्रसङ्ग[3] इति चेत् । न । तज्जन्यविशेषग्रहणेऽभिमतत्वात्, लिङ्गविशेषोपाधीनां च सामान्यानाम् । अविशिष्टसामान्यविवक्षायां व्यभिचारान्नेष्यते ।

स्वभावे भावोऽपि भावमात्रानुरोधिनि ॥४॥

हेतुरिति वर्त्तते । तादात्म्यं ह्यर्थस्य तन्मात्रानुरोधिन्येव नान्यायत्ते । तद्भावेऽभूतस्य पश्चाद्भावनियमाभावात् । कारणानां कार्यव्यभिचारात् ॥

अप्रवृत्तिः प्रमाणानाम्

---

[1] ०श्रयात्—क०

[2] 'हेतुः' इत्यनन्तरं प्रतौ—'यदा कार्यगताः स्वभावा विवक्ष्यन्ते तदा तेषां कारणं हेतुर्जनकम्, यदा तु कारणगतास्तदैषां कार्यं हेतुर्गमकम्' इति लिखितं वर्तते । तदुपरि इयं टिप्पणी वर्तते 'अवचूरिरियं लेखकेन सूत्रमध्येऽलेखि' ।

[3] जन्यजनकभावप्र०—क०

अनुपलब्धिः ।

अप्रवृत्तिफलाऽसति ।

सज्ज्ञानशब्दव्यवहारप्रतिषेधफलोपलब्धिपूर्वकत्वात्तेषामिति । इदं सदा(द)सत्प्रतिषेधविधिहेतोस्तुल्यं रूपम् । तथा हि सत्त्वमुपलब्धिरेव—वस्तुयोग्यतालक्षणा, तदाश्रया वा ज्ञानप्रवृत्तिस्ततः स[ज्]ज्ञानशब्दव्यवहारप्रवृत्तेः । असतां चासत्त्वमनुपलब्धिः ।

असज्ज्ञा[न]फला काचिद्धेतुभेदव्यपेक्षया ॥५॥

हेतुरनुपलब्धिर्भेदोस्याः विशेषणमुपलब्धिलक्षणप्राप्तं सत्त्वम् । अत्रानुपलब्धेर्लिङ्गादसत्तायामुपलब्धेरभावोऽप्यन्यथाऽनुपलब्ध्या साध्य इत्यनवस्थानादप्रतिपत्तिः स्यात् । अथोपलब्ध्यभावो विनानुपलब्ध्या स्यात्तथा सत्ताभावोऽपि स्यादपार्थिकानुपलब्धिः । अथान्योपलब्धा(ध्या)ऽनुपलब्धिसिद्धिरिति प्रत्यक्षसिद्धानुपलब्धिः । तथान्यसत्तया असत्ता किन्न सिध्यति । यदा पुनरेवंविधानुपलब्धिरेवासतामसत्ता; तदा सिद्धेऽपि विषये मोहाद्विषयिणोऽसं(सज्)ज्ञानशब्दव्यवहारानप्रतिपद्यमानः विषयप्रदर्शनेन समये प्रवर्त्त्यते । यथा गौरयं सास्नादिसमुदाय[ात्म]कत्वादिति । तथा च दृष्टान्ताऽसिद्धिचोदनाऽपि प्रतिव्यूढा । विषयप्रतिपत्तावप्यप्रतिपन्नविषयिणां दर्शनात् । एवमनयोरनुपलब्ध्योः स्वविपर्ययहेत्वभावभावाभ्यां सद्व्यवहारप्रतिषेधफलत्वं तुल्यम् । एकत्र संशयादन्यत्र विपर्ययात् ।

तत्राद्या सद्व्यवहारनिषेधोपयोगात् प्रमाणमुक्ता । न तु व्यतिरेकदर्शनादावुपयुज्यते, संशयात् । द्वितीया त्वत्र प्रमाणं निश्चयफलत्वात् ॥

सा च प्रयोगभेदात्—

विरुद्धकार्ययोः सिद्धिरसिद्धिर्हेतुभावयोः ।
दृश्यात्मनोरभावार्थानुपलब्धिश्चतुर्विधा ॥६॥

यावान् कश्चित् प्रतिषेधः स सर्वोऽनुपलब्धेस्तथाऽपि द्विधा क्रियेत । कस्यचिद्विधिना निषेधेन वा । विधौ विरुद्धो वा विधीयेताऽविरुद्धो वा । अविरुद्धस्य विधौ सहभावविरोधाभावादप्रतिषेधः । विरुद्धस्याप्यनुपलब्धिनिषेधस्य अनुपलब्धिरूपत्वात् तत्राप्यर्थान्तरनिषेधे कार्यकारण[2b]मन्तरेण विरोधाऽप्रतिपत्तिः । तथा ह्यपर्यन्तकारणस्य भवतोऽन्यभावेऽभावाद्विरोधगतिः । स(सा) चानुपलब्धेः । अन्योन्योपलब्धिपरिहारस्थितिलक्षणता वा विरोधो नित्यानित्यत्ववत् । तत्राप्येकोपलब्ध्याऽनुपलब्धिरेवोच्यते । अन्यथाऽनिषिद्धोपलब्धेरभावासिद्धेः । एकस्य निषेधेनान्याभावसाधने सिद्धैवानुपलब्धिर्निषेधस्यानुपलब्धिरूपत्वात् । तत्राप्यर्थान्तरनिषेधे कार्यकारणयोरनुभयस्य वा । तत्रानुभयस्याप्रतिबन्धात् । तदभावेऽन्येन भवितव्यमिति कुत् एतत् ? कार्यानुपलब्धावपि नावश्यं कारणानि तद्वन्ति भवन्तीति कुतस्तदभावः । तस्मात् कारणानुपलब्धिरेवाभावं गमयति । स्वभावानुपलब्धिस्तु स्वयमसत्तैव तत्र केवलं विषयी साध्यते । अस्यामपि यदा व्यापकधर्मानुपलब्ध्या व्याप्याभावमाह तदाऽभावोऽपीति ।

इयं प्रतिषेधविषयानुपलब्धिः प्रयोगभेदेन चतुर्विधा भवति । विरुद्धसिद्धया यथा न शीतस्पर्शोऽत्राग्नेः । एतेन व्यापकविरुद्धसिद्धिरुक्ता वेदितव्या । यथा न तुषारस्पर्शोऽत्राग्नेः । विरुद्धकार्यसिद्धया यथा न शीतस्पर्शोऽत्र धूमात् । हेत्वसिद्धया यथा नात्र धूमोऽनग्नेः । स्वभावाऽसिद्धया यथा नात्र धूमोऽनुपलब्धेः । एतेन व्यापकस्वभावाऽसिद्धिरुक्ता यथा नात्र शिंशपा वृक्षाभावात् ।

सर्वत्र चास्यामभावसाधन्यामनुपलब्धौ दृश्यात्मनामेव तेषां तद्विरुद्धानां च सिद्धिरसिद्धिश्च वेदितव्या । अन्येषामभाव-विरोधासिद्धेः ।।

यदि विरुद्धकार्योपलब्ध्याप्यभावसिद्धिः, तत्कारणोपलब्ध्या किन्न सिद्धयति ?

तद्विरुद्धनिमित्तस्य योपलब्धिः प्रयुज्यते ।
निमित्तयोर्विरुद्धत्वाभावे सा व्यभिचारिणी ।।७।।

यथा न शीतस्पर्शोऽत्र काष्ठादिति । निमित्तयोः पुनर्विरोधे गमिकैव । यथा नास्य रोमहर्षादिविशेषाः सन्निहितदहनविशेषत्वात् । एतेन तत्कार्यादपि तद्विरुद्धकार्याभावगतिरुक्ता वेदितव्या । यथा न रोमहर्षादिविशेषयुक्तपुरुषवानयं प्रदेशो धूमात् । इयं च हेत्वसिद्धयैव तद्विरुद्धसिद्धिः प्रागेव निर्दिष्टा ।

इतीयं प्रयोगभेदादष्टधानुपलब्धिः ।।

तत्र येयं विरुद्धकार्योपलब्धिरुक्ता तत्र—

इष्टं विरुद्धकार्येऽपि देशकालाद्यपेक्षणम् ।
अन्यथा व्यभिचारि स्याद्भस्मेवाऽशीतसाधने ।।८।।

यः तर्हि समग्रेण हेतुना कार्योत्पादोऽनुमीयते, स कथं त्रिविधो(धे) हेतावन्तर्भवति ?

हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ।।९।।

असावपि यथा संनिहितान्नान्यमपेक्षत इति तन्मात्रानुबन्धी स्वभावो भावस्य । तत्र हि केवलं समन्तात् कारणात् कार्योत्पत्तिसंभवोऽनुमीयते । समग्राणां कार्योत्पादनयोग्यतानुमानात् । योग्यता च सामग्रीमात्रानुबन्धिनी स्वभावभूतैवानुमीयते ।।

किं पुनः कारणसामग्रया: कार्यमेव नानुमीयते ?

सामग्रीफलशक्तीनां परिणामानुबन्धिनि ।
अनैकान्तिकता कार्ये प्रतिबन्धस्य [3a]संभवात् ।।१०।।

न हि समग्राणीत्येव कारणद्रव्याणि स्वकार्यं जनयन्ति । सामग्रीजन्मनां शक्तीनां परिणामापेक्षत्वात् कार्योत्पादस्य । अत्रान्तरे च प्रतिबन्धसंभवात् न कार्यानुमानम्, योग्यतायास्तु द्रव्यान्तरानपेक्षत्वात् न विरुध्यतेऽनुमानम्—उत्तरोत्तरशक्तिपरिणामेन कार्योत्पाद-

नसमर्थेयं कारणसामग्री शक्तिपरिणामप्रत्ययस्यान्यस्यापेक्षणीयस्याभावादिति । पूर्वसजातिमात्रहेतुत्वात् शक्तिप्रसूतेः । सामग्रचा योग्यताऽ[न]न्यापेक्ष(क्षि)णीत्युच्यते ॥

या तर्ह्यकार्यकारणभूतेनान्येन रसादिना रूपादिगतिः, सा कथं ? नैष दोषः । सापि—

एकसामग्रचधीनस्य रूपादे रसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत् ॥११॥

तत्र हेतुरेव तथाभूतोऽनुमीयते । प्रवृत्तशक्तिरूपोपादानकारणसहकारिप्रत्ययो हि रसहेतू रसं जनयति । इन्धनविकारविशेषोपादानहेतुसहकारिप्रत्ययाग्निधूमजननवत् ॥

तथा हि—

शक्तिप्रवृत्त्या

स्वकारणस्य फलोत्पादनं प्रत्याभिमुख्येन ।

न विना रसः सैवा[न्य]कारणम् ।

रूपोपादानहेतूनां प्रवृत्तिकारणम् । सापि रसोपादानकारणप्रवृत्ती रूपोपादानकारणप्रवृत्तिसहकारिणी । तस्माद्यथाभूताद्धेतो रस उत्पन्नस्तथाभतमनुमापयति ।

इति

तत्रापि

अतीतैककालानां गतिः

नाऽनागतानां व्यभिचारात् ।

तत्

तस्मादियं

कार्यलिङ्गजा ॥१२॥

तेन नान्यो हेतुर्गमकोऽस्ति । अप्रतिबद्धस्वभावस्याऽविनाभावनियमाऽभावात् ।

एतेन पिपीलिकोत्सरणमत्स्यविकारादेर्वर्षाद्यनुमानमुक्तम् । तत्रापि भूतपरिणाम एव वर्षहेतुः पिपीलिकादिसंक्षोभादिहेतुरिति ॥

हेतुना त्वसमग्रेण यत्कार्यमनुमीयते ।
शेषवत्तदसामर्थ्याद्देहाद्रागानुमानवत् ॥१३॥

समग्राण्येव हि कारणानि योग्यतामप्यनुमापयन्त्यसमग्रस्यैकान्ताऽसामर्थ्यात् । यथा देहेन्द्रियबुद्धिभ्यो रागाद्यनुमानम् । आत्मात्मीयाभिनिवेशपूर्वका हि रागादयः, अयोनिशोमनस्कारपूर्वकत्वात् सर्वदोषोत्पत्तेः । देहादीनां हेतुत्वेऽपि न केवलानां सामर्थ्यमस्तीति विपक्षवृत्तेरदृष्टावपि शेषवदनुमानात् संशयः ॥

तथा

विपक्षेऽदृष्टिमात्रेण कार्यसामान्यदर्शनात् ।
हेतुज्ञानं प्रमाणाभं वचनाद्रो(द्रा)गितादिवत् ॥१४॥

न हि रागादीनामेव कार्यं स्पन्दनवचनादयः । वक्तुकामतासामान्यहेतुत्वात् । सैव राग इति चेत् इष्टत्वान्न किंचिद्बाधितं स्यात् । नित्यसुखात्मात्मीयदर्शनाक्षिप्तं साश्रय-(स्रव)धर्मविषयं चेतसोऽभिष्वङ्गं रागमाहुः । नैवं करुणादयोऽन्यथापि संभवादिति निवेदयिष्यामः । अत्र यथा रक्तो ब्रवीति तथा विरक्तोऽपीति वचनमात्रादप्रतिपत्तिः । नापि विशेषात् । अभिप्रायस्य दुर्बोधत्वाद् । व्यवहारसङ्करेण सर्वेषां व्यभिचारात् । प्रयोजनाभावादव्याहार इति चेत् । न । परार्थत्वात् । न युक्तो वीतरागत्वादिति चेत् । न । करुणयापि [3b] [प्र]वृत्तेः । सैव राग इति चेत् । इष्टम्, अविपर्याससमुद्भवान्न दोषः । असत्यप्यात्मग्रहे[१] दुःखविशेषदर्शनमात्रेणाभ्यासबलोत्पादिनी[२] भवत्येव करुणा । तथा हि सत्त्वधर्मालम्बनादयो मैत्र्यादय इष्यन्ते । एताश्च सजातीयाभ्यासवृत्तयो न रागापेक्षिण्यः । नैवं रागादयो विपर्यासाभावेऽभावात् । कारुणिकस्याऽपि निष्फल आरंभोऽविपर्यासादिति चेत् । न । परार्थस्यैव फलत्वेनेष्टत्वात् । इच्छालक्षणत्वात् फलस्य ।

सर्वथाऽभूताऽसमारोपान्निर्दोषः । तदन्येन दोषवत्त्वसाधने न किंचिदनिष्टम् ।

वक्तर्यात्मनि रागादिदर्शनेनान्यत्र तदनुमानेऽतिप्रसङ्गः । व्यभिचारादनन्यानुमाने इहाऽव्यभिचार इति को निश्चयः ? करणगुणवक्तुकामते हि वचनमनुमापयेत् । रागोत्पादनयोग्यतारहिते वचनादर्शनात् तदनुमानेऽतिप्रसङ्ग उक्तः । रागस्यानुपयोगे कथं तच्छक्तिरुपयुज्यते ? शक्त्युपयोगे हि स एवोपयुक्तः स्यात् । तच्च नास्तीत्युक्तम् ।

तस्मान्नान्तरी[य]कमेव कार्यं कारणमनुमापयति, तत्प्रतिबन्धात्, नान्यद्विपक्षेऽदर्शनेऽपि । सर्वदर्श(र्शि)नो हि दर्शनव्यावृत्तिः सर्वत्राभावं गमयेत् । क्वचित्तथादृष्टानामपि देशकालसंस्कारभेदेनान्यथा दर्शनाद्, यथाऽऽमलक्यः क्षीरावसेकेन मधुरफला भवन्ति । न चैवं बहुलं दृश्यन्ते । तेनैवं[३] स्याद्युक्तं वक्तुम्—मादृशो वक्ता रागीति, रागोत्पत्तिप्रत्ययविशेषेणात्मदर्शनायोनिशोमनस्कारेण योगात् । तदाप्यपार्थको वचनोदाहारः । तस्माद्विपक्षाऽदृष्टिरहेतुः ॥

न चादर्शनमात्रेण विपक्षेऽव्यभिचारिता ।
संभाव्यो(व्य)व्यभिचारित्वात् स्थालीतन्दुलपाकवत् ॥१५॥

न हि बहुलपक्वदर्शनेऽपि स्थाल्यन्तर्गमनमात्रेण पाकः सिध्यति । व्यभिचारदर्शनात् । एवं तु स्यात्—एवंस्वभावा एतत्समानहेतवः पक्वा इति । अन्यथा तु शेषवदेतदनुमानं व्यभिचारि ॥

---

[१] ०ग्रहणे—क०

[२] ०त्पादिता—क०

[३] तेनैतद् युक्तं—क०

किं पुनरेतच्छेषवत् ?

यस्याऽदर्शनमात्रेण व्यतिरेकः प्रदर्श्यते ।
तस्य संशयहेतुत्वाच्छेषवत्तदुदाहृतम् ॥१६॥

स तस्य व्यतिरेको न निश्चित इति विपक्षे वृत्तिराशङ्क्येत । व्यतिरेकसाधनस्यादर्शनमात्रस्य संशयहेतुत्वान्न हि सर्वानुपलब्धिर्गमिका ।

तस्मादेकनिवृत्त्याऽन्यनिवृत्तिमिच्छता तयोः कश्चित् स्वभावप्रतिबन्धोऽप्येष्टव्यः । अन्यथाऽगमको हेतुः स्यात् ॥

हेतोस्त्रिष्वपि रूपेषु निश्चयस्तेन वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः ॥१७॥

न ह्यसति प्रतिबन्धेऽन्वयव्यतिरेकनिश्चयोऽस्ति । तेन तमेव दर्शयन्निश्चयमाह । तत्रान्वयनिश्चयेन—विरुद्धतत्पक्षाणां निरासः, व्यतिरेकस्य—अनैकान्तिकस्य तत्पक्षस्य च शेषवदादेः । द्वयोरित्येकसिद्धप्रतिषेधः । प्रसिद्धवचनेन संदिग्धयोः शेषवदसाधारणयोः सपक्षविपक्षयोरपि ॥

अन्यथा ह्यसति प्रतिबन्धेऽदर्शनमात्रेण व्यतिरेके

व्यभिचारिविपक्षेण वैधर्म्यवचनं च यद् ।

यदाह—"एष तावन्न्यायो यदुभयं वक्तव्यं विरुद्धानैकान्तिकप्रतिपक्षेण" इति । साधर्म्यवचनं विरुद्धप्रतिपक्षेण वैधर्म्यवचनमनैकान्तिकप्रतिपक्षेण ।

यद्यदृष्टिफलं तच्च

यदि तेन विपक्षेऽदर्शनं ख्याप्यते

तदनुक्तेऽपि गम्यते ॥१८॥

नहि तस्य प्राग्दर्शनभ्रान्तिर्या वचनेन निवर्त्येत[१]। स्मृतिर्वाचादर्शने क्रियत इति चेत् । दर्शनं खल्वप्रतीयमानमनङ्गमिति युक्तं तत्र स्मरणाधानम् । अदर्शनं तु दर्शनाऽभावः । स दर्शनेन बाध्येत[२]। तदभावे तु सिद्ध एवेत्यपार्थकं तत्सिद्धये वचनम् ॥

न वै अनुपलभमानस्य तावता नास्तीति भवति । तदर्थं वचनमिति चेत् ।

न च नास्तीति वचनात्तन्नास्त्येव यथा यदि ।
नास्ति स ख्याप्यते न्यायस्तदा नास्तीति[4a]गम्यते ॥१९॥

यद्यनुपलभमानो नास्तीति न प्रत्येति वचनादपि नैव प्रत्येष्यति । तद्रूप ह्य(तदप्य)-नुपलम्भमेव ख्यापयति । न चैकानुपलम्भोऽन्याऽभावं साधयति, अतिप्रसङ्गात् । न च

[१] निवर्त्यते क० [२] बाध्यते क०

तेन नास्तीति वचनात्तथा भवति, अतिप्रसङ्गात् । तत्कथं वैधर्म्यवचनेनानैकान्तिकपरिहारः ? तस्माद्व्यावृत्तिमिच्छता तत्र न्यायो वक्तव्यो यतोऽस्य व्यावृत्तमिति [निश्चयो] भवति ॥

ननु तदभावेऽनुपलम्भात् सिद्धा व्यावृत्तिः ।

यद्यदृष्टया निवृत्तिः स्याच्छेषवद्व्यभिचारि किम् ?

यथा पक्वान्येतानि फलानि, एवंरसानि वा, रूपाऽविशेषात्, एकशाखाप्रभवत्वाद्वा उपयुक्तवत् । अत्रापि विवक्षिताऽशेषपक्षीकरणे हेतोः साध्याभावेऽनुपलम्भोऽस्तीति कथं व्यभिचारः ?

प्रत्यक्षबाधाशङ्का व्यभिचार इत्येके । न । पक्षीकृतविषयेऽभावात् । कदाचिद्भवेदिति चेत् । तथाशङ्कायामतिप्रसङ्गोऽन्यत्राप्यभावनियमाभावात् । वृत्तं प्रमाणं बाधकम् । अवृत्तबाधने सर्वत्रानाश्वासः ।

व्यतिरेकस्तु सिद्ध एव साधनमिति तथाभावनिश्चयमपेक्षते । अनुपलम्भात्तु क्वचिदभावसिद्धावप्यप्रतिबद्धस्य तदभावे सर्वत्राभावासिद्धेः । संशयादव्यतिरेको व्यभिचारः शेषवतः ।

किंच

व्यतिरेक्यपि हेतुः स्यात्

नेदं निरात्मकं जीवच्छरीरम्, अप्राणादिमत्त्वप्रसङ्गादिति । निरात्मकेषु घटादिषु दृष्टादृष्टेषु प्राणाद्यदर्शनात्तन्निवृत्त्याऽऽत्मगतिः स्यात् । अदृश्यानुपलम्भादभावाऽसिद्धौ घटादीनां नैरात्म्यासिद्धेः प्राणादेरनिवृत्तिः । अभ्युपगमात् सिद्ध[म्] इति चेत् । कथमिदानीमात्मसिद्धिः ? परस्याऽप्यप्रमाणिका कथं नैरात्म्यसिद्धिः ? अभ्युपगमेन च सात्मकानात्मकौ विभज्य तत्राभावेन गमकत्वं कथयता आगम(मि)कत्वं चात्मनि प्रतिपन्नं स्यात्, नानुमेयत्वम् । तस्माददर्शनेऽप्यात्मनो निवृत्त(त्त्य)सिद्धेः [नास्ति कुतश्चित् निवृत्तिः।] । तन्निवृत्तौ क्वचिन्निवृत्तावपि प्राणादीनामप्रतिबन्धात् सर्वत्र निवृत्त्यसिद्धेरगमकत्वम् ।

याप्यसिद्धियोजना—"तथा सपक्षे सन्नसन्नित्येवमादिष्वपि यथायोगमुदाहार्यम्" इत्येवमादि—सापि—

न वाच्याऽसिद्धियोजना ॥२०॥

अनुपलम्भ एव संशयाद्, उपलम्भे तदभावात्। अनुपलम्भाच्च व्यतिरेक इति संशयितोऽनिवार्यः स्यात् । यथायोगवचनादनिवारित एवेति चेत् । न । "य एव तूभयनिश्चितवाची"[1] इत्यादिवचनात् । तेनानुपलम्भेऽपि संशयादनिवृत्तिः(त्ति) मन्यमानस्तत्प्रतिषेधमाह ॥

किंच

विशेषस्य व्यवच्छेदहेतुता स्याददर्शनात् ।

---

१ ०निश्चयवाची—क०

श्रावणत्वस्यापि नित्याऽनित्ययोरदर्शनाद्द्वयावृत्तिरिति तद्द्वयवच्छेदहेतुता स्यात् । न हि तद्द्वयावृत्तेरन्यद्द्वयवच्छेदनम् । अव्यवच्छेदस्तु कुतश्चिद्द्वयावृत्तेरेवानिश्चयात् । यो हि यत्र नास्तीति निश्चितः, स भवंस्तदभावं कथं न गमयेत् ?

प्रमाणान्तरबाधा चेत्

अथाऽपि स्यादुभयव्यवच्छेदे प्रमाणान्तरं बाधकमस्ति । अन्योन्यव्यवच्छेदरूपाणामेकव्यवच्छेदेनाऽन्यविधानादप्रतिषेधः, विधिप्रतिषेधयोर्विधानात् (विरोधात्) ।

नेदानीं नास्ति तादृशः ॥२१॥

नैवमदर्शनं प्रमाणम्, बाधासंभवात् ॥

तथाऽन्यत्रापि संभाव्यं प्रमाणान्तरबाधनम् ।

लक्षणयुक्ते हि बाधासंभवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानाश्वासः । अनुमानविषयेऽपि प्रत्यक्षानुमानविरोधदर्शनादनाश्वासप्रसङ्ग इति चेत् । न । यथोक्त(क्ते)ऽभावात् । संभविनश्चातल्लक्षणत्वात् । विरुद्धो(द्धाऽ)व्यभिचार्यवचनमिति चेत् । अनुमानविषयेऽवचनादिष्टम् । विषयं चास्य निवेदयिष्यामः ।

किं च

दृष्टाऽयुक्तिरदृष्टेश्च स्यात् स्पर्शस्याविरोधिनी ॥२२॥

यदि ह्यनुपलम्भेनाभावः सिध्येत् । यदाह—"यद्यदर्शनमात्रेण दृष्टेभ्यः प्रतिषेधः क्रियते। न च सोऽपि युक्तः" इति। कथमयुक्तोऽत्राप्यनुपलम्भादभावसिद्धेः। ननूपलब्धिलक्षणप्राप्तेः स्पर्शस्य युक्त एव प्रतिषेधः । [4b] न युक्तः, दृश्यतत्स्वभावविषयमात्राऽप्रतिषेधात् । पृथिव्यादि सामान्येन गृहीत्वा अयं निषेधमाह। तत्र च तूलोपलपल्लवादिषु तद्भावेऽपि स्पर्शभेददर्शनादस्यापि क्वचिद्विशेषे संभवाशङ्कया भवितव्यमिति सर्वत्रादर्शनमात्रेणायुक्तः प्रतिषेध इत्येवमाचार्यीयः कश्चिदनुपलम्भादभावं ब्रुवाण उपालब्धः ॥

अपि च ।

देशादिभेदाद् दृश्यन्ते भिन्ना द्रव्येषु शक्तयः ।
तत्रैकदृष्टया नान्यत्र युक्तस्तद्भावनिश्चयः ॥२३॥

यदि कथंचिद्विपक्षेऽदर्शनमात्रेणाऽप्रतिबद्धस्यापि तदव्यभिचारः; क्वचिद्देशे कानिचिद् द्रव्याणि कथंचिद् दृष्टानि पुनरन्यथाऽन्यत्र दृश्यन्ते । यथा काश्चिदोषधयः क्षेत्रविशेषे विशिष्टरसवीर्यविपाका भवन्ति, नान्यत्र । तथा कालसंस्कारभेदात् । न च तद्देशैस्तथा दृष्टा इति सर्वास्तत्त्वेन तथाभूताः सिध्यन्ति । गुणान्तराणां कारणान्तरापेक्षत्वात् । विशेषहेत्वभावे तु स्यादनुमानम् । यथाऽदृष्टकर्तृकमपि वाक्यं पुरुषसंस्कारपूर्वकमिति । वाक्ये तु विशेषाभावात् । सर्वप्रकाराणां पुरुषैः [1]करणदर्शनात् ।

[1] कारण०—क०

नैवमसंभवद्विशेषहेतवः पुरुषाः । येन वचनादेः किंचिन्मात्रसाधर्म्यात् सर्वाकारसाम्यमनुमीयेत । सर्वगुणेषु विशेषदर्शनात् । संस्कारभेदेन विशेषप्रतिपत्तेः[१] तद्वदन्यस्यापि संभवात् । असंभवानुमाने च बाधकहेत्वभावात्, वैराग्यादृष्टेः । अदृष्टेन च बाधकभावासिद्धेः । रागाद्यव्यभिचारिकार्याभावात् । संभवेऽपि विशेषाणां द्रष्टुमशक्यत्व त् । तादृशां च(चा)-प्रतिक्षेपार्हत्वात् ।

नैवं वाक्यानि, दृश्यविशेषत्वात् । अदृश्यत्वेऽप्यदृष्टविशेषाणां विजातीयत्वोपगमविरोधात् । तद्विशेषाणामन्यत्रापि शक्यक्रियत्वात् । प्रत्यक्षाणां शब्दानामप्रत्यक्षस्वभावाभावात् । भ्रान्तिनिमित्ताभावाद्बाधकाभावाद् भ्रान्त्यसिद्धेः । पुरुषेषु विशेषदर्शनस्य बाधकत्वादसमानम् । परभावभूतस्य च वाक्यविशेषस्याऽतद्विशेषत्वात् । तदभिन्नस्वभावानां सर्वेषां पुरुषक्रिया, न वा कस्यचित् ।।

किं च,

आत्ममृच्चेतनादीनां योऽभावस्याऽप्रसाधकः ।
स एवानुपलम्भः किं हेत्वभावस्य साधकः ।।२४।।

अनुपलम्भं चास्य प्रमाणयतः आत्मवादो निरालम्बः स्यात्, अप्रत्यक्षत्वादात्मनस्तत्कार्याऽसिद्धेः । इन्द्रियादीनां तु विज्ञानकार्यस्य कादाचित्कत्वात् सापेक्षसिद्ध्या[२] प्रसिद्धिरुच्यते—किमप्यस्य कारणमस्तीति । न त्वेवंभूतमिति ।

नैवं सुखादि कार्यं प्रसाधितं कञ्चिदर्थं पुष्णाति, येन केनचित् कारणवत्त्वाभ्युपगमात् । तदा(था) चानुपलम्भ एव आत्मनः स्यात् । तं तेन प्रत्याचक्षाणः किमिति प्रतिव्यूढोऽनुपलम्भस्यासाधनत्वादिति कथमसाधनं व्यतिरेकं साधयेत् ? मृदः खल्वपि कश्चिच्चैतन्यमनुपलभ्यमानमपीच्छन्नदर्शनाद्वचनादेः व्यावृत्तिमाह । दध्यादिकं चापरः क्षीरादिष्वपरार्थेषु संघातत्वाऽदर्शनाद्वचतिरेकम् । को ह्यत्र नियमः संहतैरवश्यं परार्थैर्भवितव्यमिति ? अस्त्येवोपलम्भो दध्यादीनां क्षीरादिष्वनुमानम्, अशक्तादनुत्पत्तेः ।

अथ केयं शक्तिः । स एव भावः, उतान्यदेव किंचित् ? स एव चेत् । तथैवोपलभ्येत, विशेषाभावात् । अन्यच्चेत् । कथमन्यभावे तदस्ति ? उपचारमात्रं तु स्यादित्ययमेषां परस्परव्याघातः ।।

तस्मात्तन्मात्रसंबद्धः स्वभावो भावमेव वा ।
निवर्त्तयेत्

यथा वृक्षः शिंशपाम्, शाखादिमद्विशेषस्यैव कस्यचित्तथा प्रसिद्धेः । स तस्य स्वभावः । स्वं च स्वभावं परित्यज्य कथं भावो भवेत्, स्वभावस्यैव भावत्वादिति तस्य स्वभावप्रतिबन्धादव्यभिचारः ।

---

[१] प्रतीतेः—क०

[२] सापेक्ष्यसिद्ध्या—क०

कारणं चा(वा) कार्यमव्यभिचारतः ॥२५॥

कारणं निवर्त्तमानं कार्यं निवर्त्तयति । अन्यथा तत् तस्य कार्यमेव न स्यात् । सिद्धस्तु कार्यकारणभावः स्वभावं नियमयतीत्युभयथा स्वभावप्रतिबन्धादेव निवृत्तिः ॥

अ[5a]न्यथैकनिवृत्त्याऽन्यविनिवृत्तिः कथं भवेत् ।
नाश्ववानिति मर्त्येन न भाव्यं गोमताऽपि किं ॥२६॥
सन्निधानात्तथैकस्य कथमन्यस्य सन्निधिः ।
गोमानित्येव मर्त्येन भाव्यमश्ववताऽपि किम् ॥२७॥

तस्मात् स्वभावप्रतिबन्धादेव हेतुः साध्यं गमयति । स च तद्भावलक्षणस्तदुत्पत्तिलक्षणो वा । स एवाऽविनाभावो दृष्टान्ताभ्यां प्रदर्श्यते ॥

तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः ।
तदभावे च तन्नेति वचनादपि तद्गतेः ॥२८॥

यतः

तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते

दृष्टान्ते हि साध्यधर्मस्य तद्भावस्तन्मात्रानुबन्धेन तत्स्वभावतया ख्याप्यते । यः कृतकं स्वभावं[१] जनयति, सोऽनित्यस्वभावं सन्तं जनयतीति प्रमाणं दृष्टान्तेनोपदर्श्यते । अन्यथैकधर्मसद्भावात् तदन्येनापि भवितव्यमिति नियमाभावात् साधनस्य साध्यव्यभिचाराशङ्का स्यात् । तेन च प्रमाणेन साध्यधर्मस्य तन्मात्रानुबन्धः ख्याप्यते । स्वकारणादेव कृतकः तथाभूतो जातो यो नश्वरः क्षणस्थितिधर्मा, अन्यतस्तस्य तद्भावनिषेधात् । हेतुभावो वा, तस्मिन् सत्येव भावादिति दृष्टान्तेन प्रदर्श्यते अर्थान्तरस्य । तथा प्रसिद्धे तद्भावे[२] हेतुभावे वाऽनित्यत्वाभावे कृतकत्वं न भवति, दहनाभावे च धूमः । तथा हि स तस्य स्वभावो हेतुर्वा कथं स्वं स्वभाव(वं) हेतुं वा अन्तरेण भवेदित्याश्रयमन्तरेणापि वैधर्म्यदृष्टान्ते प्रसिध्यति व्यतिरेकः ॥

येषां पुनः प्रसिद्धावेव तद्भावहेतुभावौ तेषां—

विदुषां वाच्यो हेतुरेव हि केवलः ॥२९॥

यदथ[३] दृष्टान्त उच्यते सोऽर्थः सिद्ध इति किं तद्वचनेन ? तदा तत्प्रदर्शनेऽपि किं वैधर्म्यदृष्टान्ताश्रयेणेति मन्यमान आश्रयं प्रतिक्षिपति स्म ॥

---

१ स्वभावे—क०

२ तद्भावहेतुभावेऽनि—क०

३ यदर्थं—क०

तेनैवं(व) ज्ञातसंबन्धे द्वयोरन्यतरोक्तितः ।
अर्थापत्त्या द्वितीयेऽपि स्मृतिः समुपजायते ॥३०॥

यदाह—"अर्थापत्त्या वा अन्यतरेणोभयप्रदर्शनात्" इति । तत्रापि दृष्टान्तेन तद्भावहेतुभाव[प्र]दर्शनं मन्यमानोऽर्थापत्त्यैकवचनेन द्वितीयसिद्धिमाह । तथा हि यत्कृतकं तदनि-[१] त्यमित्युक्ते—अनर्थान्तरभावे व्यक्तमयमस्य स्वभावस्तन्मात्रानुबन्धी प्रमाणदृष्टस्तद्भावनियमादिति ज्ञाततद्भावस्याऽर्थापत्त्याऽनित्यत्वाभावे कृतकत्वं न भवतीति भवति । न हि [२]स्वभावस्या[भावे] भावो भवत्यभेदात् । अन्यथा तद्भावे भवतीत्येव न स्यात् । तथा, तदभावे न भवतीत्युक्ते—तत एव तद्भावतावेदिनः । तथा ह्ययमस्य स्वभावो येन तदभावे न भवत्यन्यथाऽयोगादिति [३]तत्तत्स्वभावताप्रतिपत्त्या अन्वयस्मृतिर्भवति ।

[४]तत्र यथा—यत्र धूमस्तत्राग्निरित्युक्ते कार्यं धूमो दहनस्य, येन धमेऽवश्यमग्निर्भवति । अन्यथाऽर्थान्तरस्य तदनुबन्धनियमाभावात् स्वातन्त्र्यं भावस्य स्यात् । अतस्तदभावेऽपि स्वभावा[५]ऽवैकल्यान्नाभावः । कार्ये त्ववश्यं कारणं भवति । इदमेव हि कारणस्य कारणत्वम्—यदर्थान्तरभावे स्वभावोपधानम् । कार्यस्यापि—तद्भाव एव भावः । तच्चास्ति धूमे । तस्मात् कार्यं धूम इत्यन्वयेन विदिततत्कार्यत्वस्य दहनाभावे न भवतीत्यर्थाद्व्यतिरेकप्रतिपत्तिर्भवति । तथाऽसत्यग्नौ धूमो नास्तीत्युक्तेऽग्निर्धूमे भवत्यवश्यमित्यर्थादन्वयप्रतिपत्तिः । अन्यथा हि तदभावे किन्न भवेदिति ।

ननु च नित्यानित्यार्थकार्यत्वाभावेऽपि श्रवणज्ञानं न भवति तदभावे । न वै न भवति तयोरेव ततः संशयात् । अन्यथाऽभावेन निश्चितात् कथं तद्भावपरामर्शेन संशयः स्यात् । केवलं तु भावनिश्चयाभावात् नास्तीत्युच्यते ।

यदा पुनर्दृष्टान्तेन नाग्नि-धूमयोः कार्यकारणभावः प्रदर्श्यते, तदा 'यत्र धूमस्तत्राग्निः' इत्येव न स्यात्, प्रतिबन्धाभावात् । कुतः 'अग्न्यभावे धू[5b]मो नास्ति' इत्यर्थाद्व्यतिरेकसिद्धिः, तथा, वैधर्म्येणाभावासिद्धेरन्वयसिद्धिः[६] ? तस्माद् दृष्टान्तेनायमेव यथोक्तः स्वभावप्रतिबन्धः प्रदर्श्यते एकसद्भावेऽन्यस्य सिद्ध्यर्थं तदभावेऽसम्भवात ॥

हेतुस्वभावाभावोऽतः प्रतिषेधे च कस्यचिद् ।
हेतुः

तावेव हि निवर्त्तमानौ स्वप्रतिबद्धं निवर्त्तयत इति कस्यचिदर्थस्य प्रतिषेधमपि साधयितुकामेन हेतोर्व्यापकस्य वा[७] स्वभावस्य निवृत्तिर्हेतुत्वेनाख्येया । अप्रतिबन्धे हि कथमेकस्य निवृत्तिरन्यस्य निवृत्तिं साधयेत् ।

युक्तोपलम्भस्य तस्य चानुपलम्भनम् ॥३१॥

---

[१] तदनित्यमेवेत्यु—क०
[२] स्वस्याभावे भावो—क०
[३] तत्स्व०—क०
[४] तथा यत्र—क०
[५] स्वभावस्य वै० क०
[६] रन्वयस्मृतिः—क०
[७] च—क०

प्रहिषेधहेतुः । प्रतिषेधविषयव्यवहारहेतुस्तद्धेतुरित्युक्तम्,[१] स्वयं तथाभूतानुपलम्भस्य प्रतिषेधरूपत्वात् हेतु-व्यापकानुपलब्धिरुभयस्यापि हेतुरिति ॥

इतीयं त्रिविधात्राप्युक्तानुपलब्धिरनेकधा ।
तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगतः ॥३२॥

त्रिविध एव हि प्रतिषेधहेतुः । उपलभ्यसत्त्वस्य हेतोस्तथानिश्चयो व्यापकस्य स्वात्मनश्चानुपलब्धिरिति । [२]स प्रयोगवशेन तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगतोऽनेकप्रयोग उक्तः । तस्याऽगत्या तद्विरुद्धगत्या विरुद्धकार्यगत्येत्यादिभेदप्रयोगैः । यथोक्तं प्राक् ॥

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥३३॥
अवश्यंभावनियमः कः परस्याऽन्यथा परैः ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत् ॥३४॥

इत्यन्तरश्लोकौ ॥

अपि च ।

अर्थान्तरनिमित्तो हि धर्म(र्मः) स्यादन्य एव सः ।

न हि तस्मिन्निष्पन्नेऽनिष्पन्नो भिन्नहेतुको वा तत्स्वभावो युक्तः । अयमेव खलु भेदो भेदहेतुर्वा भावानां विरुद्धधर्माध्यासः कारणभेदश्च । तौ चेन्न भेदकौ; न कस्यचित् कुतश्चिद्भेद इत्येकं द्रव्यं विश्वं स्यात् । ततश्च सहोत्पत्तिविनाशौ, सर्वस्य च सर्वत्रोपयोगः स्यात् । अन्यथैकमेव न स्यात् । नामान्तरं वा, अर्थमभ्युपगम्य तथाऽभिधानात् ।

नन्वनर्थान्तिरहेतुत्वेऽपि भावकालेऽनित्यताऽनिष्पत्तेस्तुल्याऽतत्स्वभावता । न वै काचिदन्याऽनित्यता नाम या पश्चान्निष्पद्येत । स एव हि भावः क्षणस्थितिधर्माऽनित्यता । वचनभेदेऽपि धर्मि(र्म)धर्मितया निमित्तं वक्ष्यामः । तां पुनरस्य क्षणस्थितिधर्मतां स्वभावं स्वहेतोरेव तथोत्पत्तेः पश्यन्नपि मन्दबुद्धिः सत्तोपलम्भेन सर्वदा तथाभावशङ्काविप्रलब्धो न व्यवस्यति । सदृशपरोत्पत्ति[३]विप्रलब्धो वा, अन्त्यक्षणदर्शिनां निश्चयात्, पश्चादस्यानुपलब्ध्याऽस्थितिप्रतिपत्तेः निश्चयकाल इति तदाऽनित्यता व्यवस्थाप्यते । कार्योत्पादनशक्तेः कारणस्वभावत्वेऽप्यदृष्टतत्कार्यस्य कारणदर्शनेऽप्यप्रतिपन्नतद्भावस्य कार्यदर्शनात् तत्प्रतिपत्तिवत् । अन्यथाऽर्थान्तिरमेवाऽनित्यता स्याद् अन्यनिमित्तत्वेऽनिमित्तत्वे वा । तथा च भावस्तद्वान्न स्यात्तदनुपयोगात् । उपयोगे वा स एवास्य स्वात्मभूतोऽनित्यतेति किमन्यया ? स्वे(स्व)भावेन वाऽचलस्यार्थान्तरयोगेऽपि तद्भावानुपपत्तेः ॥

स चार्थान्तराद्भवन्ननित्यताख्योऽन्यो वा धर्मः हेतुः फलं वा स्यात् । अहेतुफलस्याऽसंबन्धात् । तत्र भावानुमानस्यासंभवात् ।

पश्चाद्भावान्न हेतुत्वं फलेऽप्येकान्ततः[४] कुतः ॥३५॥

---

[१] ०त्युक्तः—क०
[२] सोऽयं प्र०—क०
[३] सदृशापरो—क०
[४] ०कान्तता—म०

स हि निष्पन्ने भावेऽर्थान्तरतः पश्चाद्भवत्कथं तस्य हेतुः स्यात् । फलस्यापि नावश्यं हेतो[ः] भाव इति तद्भावहेतोरनै[6a]कान्तिकत्वम् । तन्नार्थान्तरनिमित्तो धर्मो भावेऽवश्यं भावीत्यननुमानम् ॥

यदि तर्हि दर्शनादर्शने नान्वयव्यतिरेकगतेराश्रयः कथं धूमोऽग्निं न व्यभिचरतीति गम्यते ? यस्मात्—

कार्यं धूमे(मो) हुतभुजः कार्यधर्मानुवृत्तितः ।

येषामुपलम्भे तल्लक्षणमनुपलब्धं यदुपलभ्यते । तत्रैकाभावेऽपि नोपलभ्यते, तत् तस्य कार्यम् । तच्च धूमेऽस्ति ।

स भवंस्तदभावेऽपि हेतुमत्तां विलङ्घयेत् ॥३६॥

सकृदपि तथादर्शनात् कार्यः सिद्धः, अकार्यत्वेऽकारणात् सकृदप्यभावात् । कार्यस्य च स्वकारणमन्तरेण भावेऽहेतुमत्तैव स्यात् । न हि यस्य यमन्तरे[ण] भावः स तस्य हेतुर्भवति । भवति च धूमोग्निमन्तरेण । तन्न तद्धेतुः स्यात् । अन्यहेतुकत्वान्नाऽहेतुकत्वमिति चेत् । न । तत्रापि तुल्यत्वात्, तदभावेऽप्यग्नौ भवतीति । कथं वा ततोऽन्यतो वाऽतज्जननस्वभावाद्भवेत् ? स्वयमतत्स्वभावस्याजननात् तस्याऽहेतुता स्यात् ।

न वै स एव भवति तादृशस्य भावात् । अन्यादृशाद्भवत्कथं तादृशः ? तादृशाद्भावाद्धि स तादृशः स्यात् । अन्यादृशादपि तादृशो भावे तच्छक्तिनियमाभावात् न हेतुभेदो भेदक इत्यकारणं विश्वस्य वैश्वरूप्यं स्यात् । सर्वं वा सर्वस्माज्जायेत ।

तस्मात् कारणभेदाभेदाभ्यां कार्यभेदाभेदौ । तन्न धूमोर्थाद् दृष्टाकारविजातीयाद्भवति, अहेतुत्वप्रसङ्गात् ॥

तथा च—

नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्क[१]त्वसंभवः ॥३७॥

स हि धूमोऽहेतुर्भवन्निरपेक्षत्वान्न कदाचिन्न भवेत् । तद्भावे वैकल्याऽभावादिष्टकालवत् । तदापि वा न भवेत्, अभावकालाविशेषात् ।

अपेक्षया हि भावाः कादाचित्का भवन्ति । भावाभावकालयोस्तद्भावयोग्यताऽयोग्यतायोगात् । तुल्ययोग्यताऽयोग्यतयोर्हि देशकालयोस्तद्वत्तेतरयोर्नियमायोगात् ।

सा च योग्यता हेतुभावात् किमन्यत् ? तस्मादेकदेशकालपरिहारेणान्यदेशकालयोर्वर्त्तमानो भावस्तत्सापेक्षो नाम भवति । तथाहि तथावृत्तिरेवापेक्षा । तत्कृतोपकारा-

---

[१] कादाचित्कस्य स०—म० ।

नपेक्षस्य तन्नियमायोगात् : तन्नियतदेशकालत्वात् धूमो यत्र दृष्टः सकृद्, वैकल्ये च पुनर्न दृष्टस्तज्जन्योऽस्य स्वभावः, अन्यथा सकृदप्यभावात् । स तत्प्रतिनियतोऽन्यत्र कथं भवेत् ? भवन्वा न [धू]मः स्यात् । तज्जनितो हि स्वभावविशेषो धूम इति ।

तथा, हेतुरपि तथाभूतकार्यजननस्वभावः । तस्याऽन्यतोऽपि भावे न स तस्य इति सकृदपि तन्न जनयेत् । न[1] वा स धूमः, अधूमजननस्वभावाद्भावात् । तत्स्वभावत्वे च स एवाग्निरित्यव्यभिचारः ॥

अग्निस्वभावः शक्रस्य मूर्द्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ॥३८॥
धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान् ।
अधूमहेतोर्धूमस्य भावे स स्यादहेतुकः ॥३९॥

इति संग्रहः ।

कथं तर्हीदानीं भिन्नात् सहकारिणः कर्योत्पत्तिः यथा चक्षूरूपादेर्विज्ञानस्य । न वै किंचिदेकं जनकं तत्स्वभावम् । किं तु सामग्री जनिका तज्जननस्वभावा । सैवानुमीयते । सैव च सामग्री स्वभावस्थित्याऽऽश्रयः कार्यस्य । अत एव सहकारिणाम[2]प्यपर्यायेण जननम् ।

यदपि किंचिद्विजातीयाद्भवद् दृष्टं गोमयादेः सा(शा)लूकादिः, तत्रापि तथाभिधानेऽप्यस्त्येव स्वबीजप्रभवात् स्वभावभेदः, हेतुस्वभावभेदात् । यथा कदली बीज-कन्दोद्भवा स्फुटमेव तादृशं लोको विवेचयति, आकारभेदात् ।

तस्मान्न सुविवेचिताकारं कार्यं कारणं व्यभिचरति ॥

अन्वयव्यतिरेकाद्यो यस्य दृष्टोऽनुवर्त्तकः ।
स्वभावस्तस्य तद्धेतुरतो भिन्नान्न संभवः ॥४०॥

इति संग्रहश्लोकः ।

तस्मात् स[6b]कृदपि दर्शनादर्शनाभ्यां कार्यकारणभावसिद्धेर्भवति ततस्तत्प्रतिपत्तिः । नान्यथा, अन्वयव्यतिरेकयोर्निःशेषदर्शनादर्शनायत्तत्वात्, क्वचिदमूर्तत्वे नित्यत्वदर्शनेऽप्यन्यत्राऽन्यथा दृष्टेः, क्वचिन्नित्यत्वाभावेऽपि अदृष्टस्य पुनर्दृष्टेरिति ॥

भवतु कार्यस्य कारणेनाविनाभावस्तदुत्पत्तेः । स्वभाव इदानीं कथमविनाभावः ?

स्वभावेऽप्यविनाभावो भावमात्रानुरोधिनि ।

यो हि भावमात्रानुरोधी स्वभावस्तत्राऽविनाभावो भावस्येष्यते ।

तदभावे स्वयं भावस्याभावः स्यादभेदतः ॥४१॥

---

[1] न च स—क०   [2] ०णामपर्या० क०

य एव भावो भावमात्रानुरोधी स्वभाव इत्युच्यते, स एव स्वयं वस्तुनो(तः) भावः। स चात्मानं परित्यज्य कथं भवेत् ?

य एव तर्हि कृतकः स एवानित्यः, भेदाभावात् प्रतिज्ञार्थैकदेशो हेतुः स्यात्। नैष दोषः। यस्मात्—

सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः ।
स्वभावपरभावाभ्यां यस्माद्व्यावृत्तिभागिनः ।।४२।।

तस्माद्यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ।।४३।।

तस्माद्यो[1] येन धर्मेण विशेषः संप्रतीयते ।
न स शक्यस्ततोऽन्येन तेन भिन्ना व्यवस्थितिः ।।४४।।

सर्व एव हि भावाः स्वरूपव्यवस्थितयः। ते नात्मानं परेण मिश्रयन्ति, [2]तस्मादपरत्वप्रसङ्गात्। यद्येषामभिन्नमात्मभूतं रूपम्, न तत्तेषाम्, तदानीं तेषामभावात्। तदेव हि स्यात्, तस्यैव भावात्, तद्व्यतिरिक्तस्याऽन्यस्याभावात्। तस्यैव च पुनर्भेदविरोधात्। तच्चात्मनि व्यवस्थितममिश्रमेव। अर्थान्तरमप्यनेकसंबन्धेऽपि न तत्तेषां सामान्यम्, अतद्रूपत्वात्। द्वित्वादि-संयोग-कार्य-द्रव्येष्वपि [प्र]सङ्गात्। न हि संबन्धे[न्धि]नाप्यन्येनाऽन्ये समाना नाम तद्वन्तो नाम स्युः। भूतवत् कण्ठे गुणेन। नाभिन्नप्रत्ययविषया भूतवत्। तदात्मानमेव हि बुद्धिः संसृजन्ती सामान्यविषया प्रतिभासते नैकसंबन्धिनाविति। भूतवत्। तद्दर्शिन्याः सा भ्रान्तिरिति चेत्। तद्दर्शनीति कुतः ? निर्बीजभ्रान्त्ययोगादिति चेत्। त एव तदेककार्या बीजम्, संख्या-संयोग-कार्यद्रव्यादिमत्सु भूतादिष्वभावात् च। तन्न तथा सामान्यबुद्धौ निवेशाभावात् सामान्यमन्यत्। सति वा तस्यापि स्वात्मनि व्यवस्थानादमिश्रणमेवान्येन। तस्मादिमे भावाः [3]स्वजातीयाभिमतादन्यस्माच्च व्यतिरिक्ताः, स्वभावेनैकरूपत्वात्। यतो यतो भिन्नास्तद्भेदप्रत्यायनाय कृतसन्निवेशैः शब्दैः, ततस्ततो भेदमुपादाय स्वभावाभेदेऽप्यनेकधर्माणः प्रतीयन्ते। तेऽपि शब्दाः सर्वभेदानाक्षेपेऽप्येकभेदचोदनात् तत्स्वलक्षणनिष्ठा एव भवन्ति। तदेकस्मादपि तस्य भेदोऽस्तीति।

तस्मादेकस्य भावस्य यावन्ति पररूपाणि तावत्यस्तदपेक्षया व्यावृत्तयः, तदसंभविकार्यकारणस्य तद्भेदात्। यावत्यश्च [त]द्व्यावृत्तयः तावत्यश्च श्रुतयोऽतत्कार्यकारणपरिहारेण व्यवहारार्थाः। यथा प्रयत्नानन्तरीयकः शब्दः श्रावण इत्यतत्कारणकार्यपरिहारार्थम्[4]। **तस्मात् स्वभावाभेदेऽपि येन** धर्मेण नाम्ना **यो विशेषो** भेदः प्रतीयते **न स शक्योऽन्येन** प्रत्याययितुमिति नैकार्थाः सर्वशब्दाः।

तन्न प्रतिज्ञार्थैकदेशोहेतुरिति ।।

---

[1] तस्माद् विशेषो यो येन धर्मेण—क०
[2] तस्यापर०—क०
[3] सजाती०—क०
[4] ०हारार्थः—क०

कथं पुनरेतद् गम्यते—व्यवच्छेदः शब्द[7a]लिङ्गाभ्यां प्रतिप(पा)द्यते विधिना न वस्तुरूपमेवेति ? प्रमाणान्तरस्य शब्दान्तरस्य च प्रवृत्तेः। तथाहि---

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते ॥४५॥

एको ह्यर्थात्मा। [१]स प्रत्यक्षः। असिद्धे धर्मिणि साधनाऽसंभवात्। यथाऽनित्यत्वे साध्ये शब्दः। तस्य प्रत्यक्षेणैव [सर्वाका]रसिद्धिः, तदन्यस्याऽसिद्धस्याऽभावात्। भावे वाऽतत्स्वभावत्वम्। न हि यो यदेकयोगक्षेमो[२] न भवति, स तत्स्वभावो युक्तः। तन्मात्रनिबन्धनत्वाद्भेदव्यवहारस्य। अन्यथाऽभावप्रसङ्गादित्युक्तम्।

तस्मात् प्रत्यक्षे धर्मिणि तत्स्वभावसाकल्यपरिच्छेदात् तत्रानवकाशा प्रमाणान्तरवृत्तिः स्यात्॥

नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम्।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥४६॥

यदि दृष्टसर्वत[त्व]स्यापि भावस्य तथानिश्चयप्रतिरोधिना भ्रान्तिनिमित्तेन गुणान्तरं न संयोज्येत। यथा शुक्तौ रजताकारः। न हि शुक्तौ द्वे रूपे—समानं विशिष्टं च, तथा प्रतिपत्तिप्रसङ्गात्। अप्रतिपत्तौ वा विवेकेन द्वित्वविकल्पायोगात्, अतिप्रसङ्गाच्च। तस्मात् पश्यन् शुक्तिरूपं विशिष्टमेव पश्यति। निश्चयप्रत्ययवैकल्यात्त्वनिश्चिन्वन् तत्सामान्यं पश्यामीति मन्यते। ततोऽस्य रजतसमारोपः। तथा सदृशापरापरोत्पत्त्या अलक्षितनानात्वस्य तद्भावसमारोपात् स्थितिभ्रान्तिः। यावन्तोऽस्य परभावास्तावन्त एव यथास्वं निमित्तभाविनः समारोपा इति तद्व्यवच्छेदकानि भवन्ति प्रमाणानि सफलानि स्युः। तेषां तु व्यवच्छेदफलानां नाप्रतीतवस्त्वंशप्रत्यायने प्रवृत्तिः तस्य दृष्टत्वाद्। अनंशस्य चैकदेशेन दर्शनाऽयोगात्॥

तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः।
भ्रान्तेर्निश्चीयते नेति साधनं संप्रवर्त्तते ॥४७॥

इति संग्रहश्लोकः।

तस्मान्नादृष्टग्रहणाय दृष्टे प्रमाणान्तरवृत्तिः॥

वस्तुग्रहेऽनुमानाच्च धर्मस्यैकस्य निश्चये।
सर्वधर्मग्रहोऽपोहे नायं दोषः प्रसज्यते ॥४८॥

न केवलं प्रत्यक्षदृष्टे प्रमाणान्तराऽवृत्तिः क्वचित् यदानुमानमपि वस्तु विधिना प्रत्याययति, न व्यवच्छेदकृत्, तदैकधर्मनिश्चये तदव्यतिरेकात् सर्वधर्मनिश्चय इति प्रमाणा-

---

[१] स तावत्—क०   [२] क्षेमी—क०

न्तराऽवृत्तिः। न हि तस्मिन्निश्चिते तदात्माऽनिश्चितो युक्तः। यदा पुनरनुमानेन समारोपव्यवच्छेदः क्रियते, तदा नैकसमारोपव्यवच्छेदादन्यव्यवच्छेदः कृतो भवतीति तदर्थमन्यत् प्रवर्त्तेत।

ननु नावश्यं विपर्यासपूर्वक एवाप्रतीतनिश्चयो भवति। यथा अकस्माद् धूमादग्निप्रतिपत्तिः। न हि तत्रानग्निसमारोपः संभाव्यते। तन्न सर्वत्र व्यवच्छेदः क्रियते। उक्तमत्र—धर्मिप्रतिपत्तावभेदात् सर्वप्रतिपत्तिः। भेदे वा, असंबद्धस्य तत्राप्रतिपत्तिरिति। तस्मात्तत्रापि तद्दर्शिनः तत्स्वभावानिश्चयः। कुतः? विपर्यासात्। स च तं प्रदेशं तद्विविक्तेन रूपेण निश्चिन्वन्नग्निसत्ताभावनाविमुखया बुद्धया कथमविपर्यस्तो नाम। तदाकारसमारोपा(प)संशयरहितश्च तत्प्रतिपत्तौ न लिङ्गमनुसरेत्। न तस्यान्वयव्यतिरेकयोराद्रियेत।

तस्मादपोहविष[य]मिति लिङ्गं प्रकीर्त्तितं।
अन्यथा धर्मिणः सिद्धावसिद्धं किमतः परम्॥४९॥

इति संग्रहश्लोकः।

क्वचिद् दृष्टेऽपि यज्ज्ञानं सामान्यार्थं विकल्पकम्।
असमारोपितान्यांशे तन्मात्रापोहगोचरम्॥५०॥

यद्रूपादिदर्शनानन्तरमलिङ्गं निश्चयज्ञानं भवति, तत्कथमसति समारोपे भवद्व्यवच्छेदविषयं भवति? समारोपविषयेऽभावात्। यत्र ह्यस्य समारोपो यथा स्थिरः सात्मक इति वा, न तत्र भेदो(दे) निश्चयो भवति॥

निश्चयारोपमनसोर्बाध्यबा[7b]धकभावतः।

न हि सर्वतो भिन्नो दृष्टोऽपि भावस्तथैव प्रत्यभिज्ञायते। क्वचिद्भेदे व्यवधानसंभवात्। यथा शुक्तेः शुक्तित्वे। यत्र तु प्रतिपत्तुर्भ्रान्तिनिमित्तं नास्ति तत्रैवास्य तद्दर्शनाविशेषेऽपि स्मार्त्तो निश्चयो भवति।

समारोपनिश्चययोर्बाध्यबाधकभावाव(भावात्) निश्चयस्य—

समारोपविवेकेऽस्य प्रवृत्तिरिति सज्यते(गम्यते)॥५१॥

तद्विवेक एव चान्यापोहः। तस्मात्तदपि तन्मात्रापोहगोचरम्। न वस्तुस्वभावनिश्चयात्मकम्। तथा हि कस्यचिन्निश्चयेऽप्यन्यस्याऽप्रतिपत्तिदर्शनात्। तत्स्वभावनिश्चये च तस्यायोगात्॥

यावन्तोंऽशसमारोपास्तन्निरासे विनिश्चयाः।
तावन्त एव शब्दाश्च तेन ते भिन्नगोचराः॥५२॥
अथै(अन्यथै)केन शब्देन व्याप्त एकत्र वस्तुनि।
बुद्धया वा नान्यविषय इति पर्यायता भवेत्॥५३॥

इत्यन्तरश्लोकौ।

यस्यापि नानोपाधेः धीर्ग्राहिकाऽर्थस्य भेदिनः ।

योऽपि मन्यते भिन्ना एवोपाधयः परस्परमाश्रयाच्च। तन्निबन्धना[:] श्रुतयः तदाधारेषु प्रवर्त्तन्ते, तत्रैव वा । तदयमप्रसङ्ग इति । तस्यापि—

नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे ॥५४॥
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः ।

यद्यप्युपाधयो भिन्ना एव शब्दज्ञानान्तराणां निमित्तमर्थे; स तु तैस्तद्वानेक एवोपलीयते। तस्य नानोपाधीनामुपकाराश्रयशक्तिस्वभावस्य स्वात्मन्यभेदात् । सर्वात्मना ग्रहणे क एवोपाधिभेदोऽनिश्चितः स्यात्, सर्वोपाध्युपकारकत्वेन ग्रहणात् ? न ह्युपकारकत्वमन्यदेव तस्य स्वरूपेण गृह्यमाणस्यागृहीतं नाम । अतो यदेवास्य स्वभावेन ग्रहणं तदेवोपकार[क]-त्वेनापीति ॥

तयोरात्मनि संबन्धादेकज्ञाने द्वयग्रहः ॥५५॥

आत्मभूतस्योपाधितद्वतोरुपकार्योपकारकभावस्य ग्रहणादेकज्ञाने द्वयोरपि ग्रहणमिति । एकोपाधिविशिष्टेऽपि तस्मिन् गृह्यमाणे सर्वोपाधीनां ग्रहणम्, तद्ग्रहणनान्तरीयकत्वादुपाधिमद्ग्रहणस्य । अन्यथा तथापि न गृह्येत । न ह्यन्य एवान्योपकारको यो न गृहीतः स्यात् । न चाप्युपकारके तथागृहीते उपकार्याग्रहणं तस्याप्यग्रहणप्रसङ्गात् । स्वस्वामित्ववत् ।

तस्मादर्थान्तरोपाधिवादेऽपि समानः प्रसङ्गः ॥

अथापि स्याद्भिन्ना एव शक्तयः शक्तिमतो याभिरुपाधीनुपकरोति । ततो नायं प्रसङ्ग इति ।

धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि ।
नोपकारस्ततस्तासां तदा स्यादनवस्थितिः ॥५६॥

यदि प्रत्युपाध्युपकारकत्वानि तस्य न स्वात्मभूतान्येव, नापि तत उपकारमनुभवन्ति, किं तस्येति ता उच्यन्ते ? उपकारे वा स्वात्मभूताभिरयमेकः शक्तिभिः शक्तीरुपकुर्वन्नेकोपाधिनापि गृह्यमाणः सर्वात्मना गृह्यत एव । तथा ह्युपाधिग्रहणे तदुपकारिण्याः शक्तेर्ग्रहणम् । तद्ग्रहणे तदुपकारी भावः स्वात्मभूतसकलशक्त्युपकारो गृहीतः सर्वाः शक्तीर्ग्राहयति, ताश्चोपाधीनिति तदवस्थः प्रसङ्गः ।

अथ ता अपि शक्त्युपकारिण्यः शक्तयो भिन्ना एव भावात् । एवमुपाधीनां तच्छक्तीनां चापरापरास्वेव शक्तिष्वपर्यवसानेन घटनात् स एकस्ताभिः कदाचिदप्यगृहीतः तदुपकारात्मा तद्वत्ते(त्वे)न न गृह्येत । यदि पुनः केवलानेवोपाधीन् शब्दज्ञानान्युपलीयेरन् तदा तस्याऽसमावेशात न भवति तत्प्रतिपत्तिसु(मु)खेन सर्वप्रतिपत्तिः; तदापि तस्य शब्दैरनाक्षेपान्न स्यात् तत्र प्रवृत्तिरिति व्यर्थः शब्दप्रयोगः स्यात् । अर्थक्रियाश्रयो हि सर्वो विधिप्रतिषेधाभ्यां व्यवहारः । उपाधयस्य(श्च) तत्रासमर्थाः । समर्थस्य(श्च) नैवोच्यत इति किं शब्दप्रयोगैः ? ततश्चोपाधयो नोपाधयः स्युः । क्वचित् प्रवृत्तौ हि कस्यचित् प्रधानस्याङ्गभावात् तदपेक्षया

[8a] तथोच्यन्ते । तस्य शब्दैरनाक्षेपान्न कस्यचिदङ्गभूता इति किमुपाधयः ? लक्षितलक्षणाददोष इति चेत् । समानः प्रसङ्गः । स तावत्तैरुपाधिभिर्नान्तरीयकतयोपलक्ष्यमाण एकेनाप्युपलक्षणेन सर्वात्मनोपलक्षित इति तदवस्थः प्रसङ्गः । को ह्यत्र विशेषः शब्दा वैनमुपलक्षयेयुः, तल्लक्षिता वोपाधयः ? स तावत्तदानीं निश्चीयते सर्वोपकारक इति न किंचिदेतत् ।।

तस्मात्—

एकोपकारके ग्राह्ये नोपकरास्ततोऽपरे ।
दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रहः ।।५७।।

इति संग्रहश्लोकः ।

यदि भ्रान्तिनिवृत्त्यर्थं गृहीतेप्यन्यदिष्यते ।

स्यादेतत्—निर्भागस्य वस्तुनो ग्रहणे कोऽन्यस्तदा न गृहीतो नाम ? स तु भ्रान्त्या नावधारयत(धार्यत) इति प्रमाणान्तरं प्रवर्त्तते । यद्येवम्—

तद्व्यवच्छेदविषयं सिद्धं तद्वत्ततोऽपरम् ।।५८।।
असमारोपविषये वृत्तेः

तर्ह्हि भ्रान्तिनिवृत्त्यर्थं प्रवृत्तं प्रमाणमन्यव्यवच्छेदफलमिति सिद्धमन्यापोहविषयम् । तद्वदन्यदपि, असमारोपविषये वृत्तेः । यत्रास्य समारोपो न तत्र निश्चय इति समारोपाभावे च वर्त्तमानोऽन्यापोहविषयः सिद्धः ।।

अपि च निश्चयैः ।
यन्न निश्चीयते रूपं तत्तेषां विषयः कथम् ।।५९।।

इयमेव खलु निश्चयानां स्वार्थप्रतिपत्तिः यत्तन्निश्चयनम् । तच्चेदाकारान्तरवदनिश्चितं कथं तैर्गृहीतम् ?

कथमिदानीमनिश्चीयमानं प्रत्यक्षेणापि गृहीतं नाम ? न प्रत्यक्षं कस्यचिन्निश्चायकम् । तद् यमपि गृह्णाति तन्न निश्चयेन । किं तर्हि ? तत्प्रतिभासेन । तन्न निश्चयानिश्चयवशात् प्रत्यक्षस्य ग्रहणाग्रहणे । नैवं निश्चयानाम्, किंचिन्निश्चिन्वतोऽप्यन्यत्रानिश्चयेन प्रवृत्तिभेदाद् ग्रहणाग्रहणम् । तस्मात्तदेवास्य ग्रहणं यो निश्चयः, अन्यथैकाकारेऽपि तन्न स्यात् ।

किं पुनः कारणम्—सर्वतो भिन्ने वस्तुनि रूपो(पे)ऽनुभवोत्पत्तावपि तथैव न स्मार्त्तो निश्चयो भवति ? सहकारिवैकल्यात् । ततश्च

प्रत्यक्षेण गृहीतेऽपि विशेषेंश[वि]वर्जिते ।
यद्विशेषावसायेऽस्ति प्रत्ययः स प्रतीयते ।।६०।।

यद्यप्यंशरहितः सर्वतो भिन्नस्वभावोऽनुभूतः, तथापि न सर्वभेदेषु तावता निश्चयो भवति, कारणान्तरापेक्षत्वात् । अनुभवो हि यथा विकल्पाभ्यासं निश्चयप्रत्ययान् जनयति । यथा रूपदर्श[8b]नाविशेषेऽपि कुणप-कामिनी-भक्ष्यविकल्पाः । तत्र बुद्धिपाटवम्, तद्वासनाभ्यासः,

प्रकरणमित्यादयोऽनुभवात् त(भे)दनिश्चयोत्पत्तिसहकारिणः। तेषामेव च प्रत्यासत्तिताऽर-तम्यादिभेदात् पौर्वापर्यम्। यथा जनकत्वाऽध्यापकत्वाऽविशेषेऽपि पितरमायान्तं दृष्ट्वा—'पिता मे आगच्छति' इति न 'उपाध्यायः' इति। सोऽपि भवन्निश्चयोऽसति भ्रान्तिकारणे भवति।

तस्मान्नानुभूत इत्येव सर्वाकारनिश्चयः॥

तत्रापि चान्यव्यावृत्तिरन्यव्यावृत्त इत्यपि।
शब्दाश्च निश्चयाश्चैव सङ्केतमनुरुन्धते॥६१॥

तत्राप्यन्यापोहेन व्यावृत्तिरन्या। अन्य एव व्यावृत्तः। तद्व्यावृत्तेर्निवर्त्तमानस्य तद्भावप्रसङ्गात्। तथा च व्यावृत्तेरभावः। तस्माद्यैव व्यावृत्तिः स एव व्यावृत्तः। शब्द-प्रतिपत्तिभेदस्तु सङ्केतभेदात्। न वाच्यभेदोऽस्ति॥

ननु च वाच्यविशेषाभावात् संकेतभेदोऽप्ययुक्तः, द्वयोरेकाभिधानात्। तथा च व्यतिरेकिण्या विभक्तेरयोगः, तस्या भेदाश्रयत्वात्।

द्वयोरेकाभिधानेऽपि विभक्तिर्व्यतिरेकिणी।
भिन्नमर्थमिवान्वेति [1]वाच्यलेशविशेषतः॥६२॥

न वै शब्दानां काचिद्विषयस्वभावायत्ता वृत्तिः, इच्छातो वृत्त्यभावप्रसङ्गात्। ते यथा व्यतिरिक्तेऽव्यतिरिक्ते वा प्रयोक्तुमिष्यन्ते, तथा नियुक्तास्तमप्रतिबन्धेन प्रकाशयन्ति। तेन गौर्गोत्वमित्येकाभिधानेऽपि कस्यचिद्विशेषस्य प्रत्यायनार्थं कृते संकेतभेदे व्यतिरिक्तार्था विभक्तिरर्थान्तरमिवादर्शयन्ती प्रतिभात्यनर्थान्तरेऽपि, तथाप्रयोगदर्शनाभ्यासात्। न तावता सर्वत्र भेदः, अन्यत्रापि पुरुषेच्छावशात् प्रवृत्तस्य प्रतिबन्धाभावात्। यथैकं क्वचिदेकवचनेन ख्याप्यते। तदविशेषेऽपि गौरवादिख्यापनार्थं बहुवचनेन॥

प्रयोजनाभावात्त् संकेतभेदो न स्यात्। तदप्यस्त्येव। तथाहि।

भेदा[न्तर]प्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयोः।
संकेतभेदस्य पदं ज्ञातृवाञ्छाऽनुरोधिनः॥६३॥

यदाऽयं प्रतिपत्ता तदन्यव्यवच्छेदभावानपेक्षः पिण्डविशेषेऽश्वव्यवच्छेदमात्रं जिज्ञासते, तथाभूतज्ञापनार्थं तथाकृतसंकेतेन शब्देन प्रबोध्यते—अनश्वत्वमस्यास्तीति। यदा पुनर्व्य-वच्छेदान्तराऽनिराकाङ्क्षः तं ज्ञातुमिच्छति, तदा परित्यक्तव्यवच्छेदान्तरे तत्रैवाश्वव्यवच्छेदे तथाप्रकाशनाय प्रयुञ्जते—अनश्वोऽयमिति। अत एव पूर्वत्र प्रतिक्षिप्तभेदान्तरत्वाच्छब्दवृत्तेः न सामानाधिकरण्यम्, विशेषणविशेष्यभावो वा—गोत्वमस्य शुक्लमिति। तन्मात्रविशेषेण बुद्धेस्तदाश्रयभूतायाः एकत्वेनाप्रतिभासनात्, निराकाङ्क्षत्वाच्च। द्वितीये तु भवति। तथा संकेतानुसारेण संहृतसकलव्यवच्छेदधर्मैर्विभागवत एकस्येव संदर्शनेन प्रतिपत्तिभासनात्, व्यवच्छेदान्तरसापेक्षत्वाच्च॥

---

[1] वाच्ये—क०

भेदोऽयमेव सर्वत्र द्रव्यभावाभिधायिनोः ।
शब्दयोर्न तयोर्वाच्ये विशेषस्तेन कश्चन ॥६४॥

तस्मान्न सर्वत्र धर्मधर्मिवाचिनोः शब्दयोर्वाच्येऽर्थे निश्चयप्रत्ययविषयत्वेन कश्चिद्विशेषः । एकस्तमेव प्रत्याययन् प्रतिक्षिप्तभेदान्तरः प्रत्याययति । अन्योऽप्रतिक्षेपेणेत्ययं विशेषः ।

जिज्ञापयिषुरर्थं तं तद्धितेन कृतापि वा ।
अन्येन वा यदि ब्रूयाद्भेदो नास्ति ततोऽपरः ॥६५॥

एतावन्तमेव च भेदं संदर्शयन् तद्धितेन वा दर्शयेत् पाचकत्वमिति । कृताऽपि वा पाक इति । अन्येन वा तथाभूतज्ञापनाय स्वयंकृतेन समयेन । न पुनस्तथाभिधानमात्रेणार्थान्तरमेव तद्भवति । तथाभूतस्यैव ज्ञापनाय शब्दस्य कृतसंकेतत्वात् ।

ननु च पाचकत्वमिति संबन्ध उच्यते, न पाक एव । [न वै पाकेनान्य एव] कश्चित् पाचको नामाभिधीयते यादृशो वर्ण्यते । यत् पुनरस्याभिधेयं तत् कथितम् । तदेव पाचकत्वेनापीति अलमप्रतिष्ठितैर्मिथ्याविकल्पैः । यथा च नार्थान्तरभूता क्रियास्ति तत्समवायो वा तत्प्रत्याययिष्यामः ॥

तेनान्यापोहविषये तद्वत् पक्षोपवर्णनम् ।
प्रत्याख्यातं पृथक्त्वे हि स्याद्दोषो जातितद्वतोः ॥६६॥

यदाहुः "अन्यापोहेऽपि शब्दार्थ[9a]तद्विशिष्टाभिधानात् तद्वत्पक्षोदितः सर्वः प्रसङ्गः समानः" इति । तदप्यनेन प्रतिव्यूढम् । तत्र ह्यर्थान्तरमुपादायान्यत्र प्रवर्त्तमानो ध्वनिरस्वातन्त्र्यादिदोषैरुपद्रूयते । न चार्थान्तरमन्यव्यावृत्ति[:] व्यावृत्त[ात्], द्वयोरेकाभिधानादित्युक्तम् । कथमिदानीमेकस्य व्यावृत्तस्यान्याननुगमाद् अन्यव्यावृत्तिः सामान्यं ? तद्बुद्धौ तथाप्रतिभासनात् । न वै किंचित् सामान्यं नास्ति । शब्दाश्रया बुद्धिरनादिवासनासामर्थ्यादसंसृष्टानपि धर्मान् संसृजन्ती जायते । तस्याः प्रतिभासवशेन सामान्यं सामानाधिकरण्यं च व्यवस्थाप्यते असदर्थाप्य(र्थव्यापि, अ)र्थानां संसर्गभेदाभावात् । तस्य सर्वस्य तत्कार्यकारणतयाऽन्येभ्यो भिद्यमानाः अर्थाः समाश्रयो ध्वनिश्चानिष्टपरिहारेण प्रवर्त्तयतीत्यन्यापोहविषय उक्तः ।

तत्रानपेक्षितबाह्यतत्त्वो बुद्धिप्रतिभासवशादेकोऽनेकव्यावृत्तः शब्दैर्विषयीक्रियते तदनुभवाहितवासनाप्रबोधजन्मभिर्विकल्पैरध्यवसिततद्भावार्थैः । तत्रैव चायं धर्मधर्मिव्यवहारः परस्परं तत्त्वान्यत्वाभ्यामवाच्यः प्रतन्यते । न ह्यन्यो धर्मो धर्मिणोऽर्थान्तरानभिधानात् । नापि स एव । तद्वाचिनामिव धर्मवाचिनामपि व्यवच्छेदान्तराक्षेपप्रसङ्गात् । तथा चेष्टाऽप्रत्यायनात् संकेतभेदाकरणमित्येतच्छब्दार्थेऽवाच्यत्वं धर्मधर्मिणोः । वस्तुनि तु स्वलक्षणे सामान्यलक्षणमवाच्यमभावात् ॥

ननु च धर्मधर्मिणोरभेदे भेदे वा दृष्टाः षष्ठ्यादिविभक्तयः, धर्मबहुत्वात् तत्र दृष्टो वचनभेदश्च धर्मिणि न स्यात् । उक्तमत्र शब्दानां स्वातन्त्र्याभावादिति । अपि च—

येषां वस्तुवशा वाचो न विवक्षापराश्रयाः ।
षष्ठीवचनभेदादिचोद्यं तान् प्रति युक्तिमत् ॥६७॥

यदि नामैते शब्दाः पुरुषैः क्वचित् प्रणिनीषिता अपि न शक्यन्ते प्रणेतुं वस्तुप्रतिबन्धाद् धूमादिवत्, तदायं उपालम्भः स्यात्—कथं षष्ठ्यादय इति ?

यदा पुनः —

यद्यथा वाचकत्वेन वक्तृभिर्विनियम्यते ।
अनपेक्षितबाह्यार्थं तत्तथा वाचकं वचः ॥६८॥

न हि 'व्यतिरेके षष्ठी' 'बाहुल्ये जसादयः' इत्येतदपि पुरुषाभिप्रायनिरपेक्षं वस्तुसंनिधिमात्रेण स्वयं प्रवृत्तम् । ते तु तत्र तथा प्रयुञ्जत इति ततस्तथाप्रतीतिर्भवति । एवमन्यत्रापि कथंचित्तैः प्रयुक्ताः प्र(त)थैव प्रतीतिहेतवो भवन्तीति किमुपालम्भः ?

तत्र वाच्येषु पुरुषायत्तवृत्तीनां शब्दानामवस्तुसंदर्शिनां यथाभ्यासं विकल्पप्रबोधहेतूनां प्रवृत्तिचिन्ता, तद्वशाद्वस्तुव्यवस्थापनं च केवलं जाडयख्यापनम् ।

तथाकृतव्यवस्थाः शब्दाः धर्मधर्म्यादिषु, न पुनर्व्यतिरेकवस्तुभेदादिति कुत एतत् ? तथाव्यवहाराऽयोगात् । न हि धर्मधर्मिणोर्भेदे तत्त्वरूपत्वे वा[१] सामान्यतत्संबन्धसामानाधिकरण्दविशेषविशेष्यभावा युज्यन्ते । शब्दानां वा, यथा वस्तुवृत्ताविति वक्ष्यामः ॥

यश्चायं सर्वत्र वस्तुकृतमेव शब्दप्रवृत्तिभेदमिच्छति, तस्य

दाराः षण्णगरीत्यादौ भेदाभेदव्यवस्थितेः ।
खस्य स्वभावः खत्वं वे[२]त्यत्र वा किं निबन्धनम् ॥६९॥

यदैकापि स्त्री दाराः, एकमपि सिकताद्रव्यं सिकता इति व्यवहारः, तत्र किं बाहुल्यं येनैवं भवति ? शक्तिभेद इति चेत् । सर्वत्रोत्सन्नमिदानीमेकवचनम्, एकशक्तेरभावात् । यत्नश्च व्यर्थः । वस्त्वभेदादन्यत्रैकवचनमिति चेत् । इहाप्यस्तु । तदयं निर्वस्तुको नियमः क्रियमाणः स्वातन्त्र्यमिच्छायाः शब्दप्रयोगे ख्यापयति ।

षण्णगरीति च कथं बहुष्वेकवचनम् ? न हि नगराण्येव [9b] किंचित् । कुतस्तेषां समाहारः ? प्रासादपुरुषादीनां विजातीयानामनारम्भात् कुतस्तत्समुदायो द्रव्य[म् ? अ]संयोगाच्च । न संयोगः । प्रासादस्य च स्वयं संयोगात्मकस्य परेणासंयोगाच्च । तत एव संख्याभावः । तत्संयोगपुरुषविशिष्टा सत्ता नगरमिति चेत् । किमस्या निरतिशयाया विशेषणम् ? सत्तायाश्चैकत्वात् नगरबहुत्वेऽपि नगराणीति बहुवचनं न स्यात् । द्वयस्य परस्परसहि[त]तेति चेत् । अनुपकार्योपकारकयोः कः सहायीभावः ? पुरुषसंयोगसत्तानां च बहुत्वान्नगरमिति कथमेकवचनम् ? तथाभूतानां क्वचिदर्थेऽभिन्ना शक्तिरस्ति । सा निमित्तमिति चेत् । न । शक्तेर्वस्तुरूपाऽव्यतिरेकात् । व्यतिरेके वाऽनुपकार्यस्य पारतन्त्र्यायोगादिति.। उपकारे

---

[१] च—क०

[२] चेत्य—क०

वा शक्त्युपकारिण्या अपि शक्तेर्व्यतिरेक इत्यनवस्थितेरप्रतिपत्तिः । तदव्यतिरेके वा, आद्यायामपि प्रसङ्ग इति यत्किंचिदेतत् ।

खस्य स्वभावः खत्वमिति व्यतिरेकाश्रया षष्ठी न स्यात् । न हि तत्र सामान्यमस्ति । नापि विभुत्वादयो गुणास्तथोच्यन्ते, अर्थान्तरस्य तत्स्वभावत्वाऽयोगात्, तेषां च निःस्वभावत्वप्रसङ्गात् । तस्याप्यर्थान्तरस्वभावत्वेऽतिप्रसङ्गः । तथा चाप्रतिपत्तिः ।

एवं षट्पदार्थवर्गादयोऽपि वाच्याः । न हि तत्र सामान्यं संख्या संयोगो वा संभवति । कथमिदानीमसत्यतिशये 'खस्य स्वभाव' इति न खमित्येव । खस्यार्थान्तरसाधारणरूपाऽपरामर्शेन खशब्दप्रवृत्तिनिबन्धनं रूपं तथाजिज्ञासायामेवमुच्यते ।

ननु सर्वतो व्यावृत्तस्य रूपस्याभिधानं न संभवति । न चैतदेव रूपं बुद्धौ समर्प्यते, अनतीन्द्रियत्वप्रङ्गात् । केवलमयं तथाभूतं प्रत्याययिष्यामीति शब्देन श्रोतर्यसंसृष्टतत्स्वभावं विकल्पप्रतिबिम्बमर्पयति । यदाह "अदृष्टार्थेऽर्थविकल्पमात्रम्" इति । नैवं प्रतिपाद्यप्रतिपादकाभ्यां स्वलक्षणं प्रतिपन्नं प्रतिपादितं वा भवति । स्वर्गादिश्रवणेऽपि तदनुभा(भ)विनामिव प्रतिभासाऽभेदप्रसङ्गात् ।

तस्मादयमप्रतिपद्यमानोऽपि भावस्वभावं तथाभूत एव विकल्पप्रतिबिम्बे तदध्यवसायी संतुष्यति । तथाभूतत्वादेव शब्दार्थप्रतिपत्तेः । तेनैतदेवमुच्यते स्वरूपमाहेति । न पुनः स्वरूपप्रतिभासस्यैव विज्ञानस्य जननात् ।

कथं तर्हीदानीमेकान्तव्यावृत्तरूपेषु भावेषु सामान्यं नाम तेषामसंसर्गात्, अन्यस्याच्चा(स्य चा)भावात् ? उक्तं यादृशं सामान्यम्—असंसृष्टानामेकाऽसंसर्गस्तद्व्यतिरेकिणां समानतेति ।

अपि च—

पररूपं स्वरूपेण यया संव्रियते धिया ।
एकार्थप्रतिभासिन्या भावानाश्रित्यभेदिनः ॥७०॥
तया संवृतनानात्वाः(र्थाः) संवृत्या भेदिनः स्वयम् ।
अभेदिन इवाभान्ति भावा रूपेण केनचित् ॥७१॥
तस्या अभिप्रायवशात् सामान्यं सत् प्रकीर्त्तितम् ।
तदसत् परमार्थेन यथा संकल्पितं तया[१] ॥७२॥

बुद्धिः खलु तदन्यव्यतिरेकिणः पदार्थानाश्रित्योत्पद्यमाना विकल्पिका स्ववासनाप्रकृतिमनुविदधती भिन्नमेषां रूपं तिरोधाय प्रतिभासमभिन्नमात्मीयमध्यस्य तान् संसृजन्ती संदर्शयति । सा चैकसाध्यसाधनतया अन्यविवेकिनां भावानां तद्विकल्पवासनायाश्च प्रकृतिः यदेवमेषा प्रतिभाति । तदुद्भवा सा चेयं संवृतिः संव्रियतेऽनया स्वरूपेण पररूपमिति । ते च तया संवृतभेदाः स्वयं भेदिनोऽप्यभेदिन इव केनचिद्रूपेण प्रतिभान्ति । तदेषां बुद्धिप्रतिभासमनुरुन्धानैः [10a] बुद्धिपरिवर्त्तिनामेव भावानामाकारविशेषपरिग्रहाद्बहिरिव [२]स्फुरतां सामान्यमित्युच्यते ।

---

[१] तथा—क०   [२] परिस्फुरतां—क०

कथमिदानीमन्यापोहः सामान्यम् ? स एव खल्वन्यापोहः । तमेव गृह्णती सा प्रकृतिविभ्रमात् विकल्पानां वस्तुग्राहिणीव च प्रतिभाति । सा हि तदन्यविवेकिष्वेव भावेषु भवन्ती विवेकविषयेति गम्यते ।

ननु बाह्याः विवेकिनः । न च तेषु विकल्पवृत्तिरिति कथं तेषु भवति ? व्याख्यातार एवं विवेचयन्ति । न तु व्यवहर्तारः । ते तु स्वालम्बनमेवार्थक्रियायोग्यं मन्यमानाः दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्तन्ते । तदभिप्रायवशादेवमुच्यते । तथा तत्कारितयाऽतत्कारिभ्यो भिन्नान् शब्देन प्रतिपादयन्ति वक्तारः । तत्त्वचिन्तकास्तु प्रतिभासभेदादिभ्यो नाभेदमनुसन्धत्ते ।

यदि प्रतिपत्त्रभिप्रायोऽनुविधीयते तदा अन्यापोहोऽपि सामान्यं मा भूत् । न ह्येवं प्रतिपत्तिरिति । न वै केवलमेवमप्रतिपत्तिः व्यक्तिव्यतिरिक्ताऽव्यतिरिक्तनित्यव्यापिताद्याकारैरपि न प्रतिपत्तिः । केवलमभिन्नाकारा बुद्धिरुत्पद्यते । तस्याः क आश्रय इत्यन्यापोह उच्यते । तस्य वस्तुषु भावादविरोधात् । व्यवहारस्य च शब्दाश्रयस्य तथादर्शनात् । न पुनर्वस्तुभूतं किंचित् सामान्यं नामास्ति यथेयं बुद्धिः प्रतिभाति । यस्माद्—

व्यक्तयो नानुयन्त्यन्यदनुयायि न भासते ।

न हीमा व्यक्तयः परस्परमन्वाविशन्ति, भेदाभावेन सामान्यस्यैवाभावप्रसङ्गात् । अन्यच्च न ताभ्यो व्यतिरिक्तं किंचित्तथा बुद्धौ प्रतिभाति । अप्रतिभासमानं च कथमात्मनाऽन्यं ग्राहयेत्, व्यपदेशयेद्वा । न च तैस्संबद्धमेकमित्येव सामान्यं भवत्यतिप्रसङ्गादित्युक्तम् । अभिन्नाभिधानप्रत्ययनिमित्तमेकं सामान्यम्, न सर्वमिति चेत् । कथमन्यतोऽन्यत्र प्रत्ययवृत्तिः ? तत्संबन्धात् [इति चेत्] । संख्याकार्यद्रव्यादिष्वपि प्रसङ्गः । असामान्यात्मकत्वान्नेति चेत् । ननु स एवायं विचार्यते कोऽयं सामान्यात्मेति ? तत्र सति संबन्धे प्रत्ययवृत्तिः । ततः सामान्यमिति । अत्रोच्यते । अनेकसंबन्धेभ्यः कार्यद्रव्यादिभ्यो निमित्तसंभवात् प्रत्ययवृत्तिः । ततश्च सामान्यात्मता । अन्यथाऽन्यत्रापि मा भूद्विशेषाभावात् । तथा च द्रव्यगुणसामान्यानां रूपसंकर इति ॥

एवं तर्हि बुद्धेरेव प्रतिभासो ज्ञानरूपत्वात्सन्नेव सामान्यम् । तन्न । यस्मात्—

ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत् ॥७३॥

ज्ञानस्य रूपं कथमर्थानां सामान्यम्, तस्य तेष्वभावात् । तद्भावाध्यवसायात् तथा भ्रान्त्या व्यवहार इति चेत् । तत्र तथाज्ञानोत्पत्तेः किं निबन्धनम् ? अनाश्रयस्य चोत्पत्तौ सर्वत्र स्यात् । अथवा ज्ञानादव्यतिरिक्तमेकस्मात् कथमन्यस्य पुनर्ज्ञानस्य रूपं स्यात् व्यक्त्यन्तरभाविनः ? ततश्च ज्ञानान्तरं व्यक्त्यन्तरं वा अव्याप्नुवत् कथं सामान्यं स्यात् ?

तस्मान्मिथ्याविकल्पोऽयमर्थेष्वेकात्मताग्रहः ।

न ह्यर्थाः व्यतिरिक्तेनाऽव्यतिरिक्तेन वा केनचिदात्मना समानाः । तथैषां ग्रहणं मिथ्याविकल्प एव ॥

इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका ॥७४॥

यस्य प्रत्यायनार्थं संकेतः क्रियते—अभिन्नसाध्यान् भावानतत्साध्येभ्यो भेदेन ज्ञात्वा तत्परिहारेण प्रवर्तेतेति । सोऽयमितरेतरभेदस्तस्यैकत्वप्रतिभासिनो मिथ्याविकल्पस्य बीजम् । तमेव गृह्णन्नेष विकल्पः स्ववासनाप्रकृतेरेवं प्रतिभाति ॥

कथं पुनर्भिन्नानामभिन्नं कार्यम्, येन तदन्येभ्यो भेदा[द]भेद इत्युच्यते ? प्रकृतिरेषा भावानां यद्—

एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने ।
भेदेऽपि नियताः केचित् स्वभावेनेन्द्रियादिवत् ॥७५॥

यथेन्द्रियविषयालोकमनस्काराः, आत्मेन्द्रियमनोर्थतत्सन्निकर्षा वा असत्यपि तद्भावनियते सामान्ये रूपविज्ञानमेकं जनयन्ति । एवं शिंशपादयोऽपि भेदाः परस्पराऽनन्वयेऽपि प्रकृत्यैवैकमेकाकारं प्रत्यभिज्ञानं जनयन्ति, अन्यां वा यथाप्रत्य[10b]यं दहनगृहादिकां काष्ठसाध्यामर्थक्रियाम् । न तु भेदाविशेषेऽपि जलादयः, श्रोत्रादिवद्रूपादिज्ञाने ॥

ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा ।
दृष्टा यथा वौषधयो नानात्वेऽपि न चापराः ॥७६॥

यथा गुडूचीव्यक्त्यादयः[१] सह प्रत्येकं वा ज्वरादिशमनलक्षणमेकं कार्यं कुर्वन्ति । न तत्र सामान्यमपेक्षन्ते भेदेऽपि, तत्प्रकृतित्वात् । न तदविशेषेऽपि दधित्रपुसादयः ॥

स्यादेतत्—सामान्यमेव किंचित्तासु तथाभूतासु विद्यते । तत एव तदेकं कार्यमिति । तदयुक्तम् ।

अविशेषात्

सामान्यस्य ।

न सामान्यं

तत्कार्यकृत् । तस्यापि

अविशेषप्रसङ्गात् (गतः) ।

तासां क्षेत्रादिभेदेऽपि

यदि हि सामान्यात् ज्वरादिशमनं कार्यं स्यात्, तस्माद्वि(तस्यावि)शेषाद्व्यक्तीनां क्षेत्रादिभेदेपि चिरशीघ्रप्रशमनादयो विशेषाः गुणतारतम्यं च न स्यात् । विशेषे वा सामान्यस्य स्वभावभेदात् स्वरूपहानम् ।

[१] गुडूचीमुस्तादयः—म०

ध्रौव्याच्च

सामान्यस्य।

अनुपकारतः ॥७७॥

यदि ह्युपकुर्यादनाधेयविशेषस्याऽनन्यापेक्षणात्[1] सकृत् सर्वं स्वकार्यं जनयेत्। न वा तज्जननस्वभावम्। व्यक्तयस्तु कालदेशसंस्कारवशेन विशिष्टोत्पत्तयो विशेषवत् कार्यं कुर्युरित्यविरोधः। तद्वदर्थोऽपि(र्था पि) केचित् स्वभावभेदेऽप्येकप्रत्यभिज्ञानादिकार्यक्रियां कुर्वन्तस्तदकारिभ्यो भेदादभिन्ना उच्यन्ते। एकेन वाऽनेको जनितोऽतज्जन्येभ्यो भेदात्।

किं पुनरनेन भेदलक्षणेन सामान्येन स्वलक्षणं समानमिति प्रत्येयम्, अथान्यदेव ? किं चातः ? यदि स्वलक्षणं कथं विकल्पस्य विषयः ? अन्यतो वा कथमर्थक्रिया ? स्वलक्षणे चानित्यत्वाद्यप्रतीतेरताद्रूप्यम्। तेषां चावस्तुधर्मता।

नैष दोषः, ज्ञानप्रतिभासिन्यर्थे सामान्यसामानाधिकरण्यधर्मधर्मिव्यवहारात्। यदेतत् ज्ञानं वस्तुस्वभावग्राहिणानुभवेनाहितां वासनामाश्रित्य विकल्पकमुत्पद्यते, अतद्विषयमपि तद्विषयमिव, तदनुभवाहितवासनाप्रभवप्रकृतेरध्यवसिततद्भावस्वरूपम्, अभिन्नकार्यपदार्थप्रसूतेः अभिन्नाकारार्थग्राहीव तदन्यभेदपरमार्थसमानाकारम्।

तत्र योऽर्थाकारः प्रतिभाति बाह्याइव एक इवानर्थक्रियाकार्यपि तत्कारीव, व्यवहारीणां तथाध्यवसायप्रवृत्तेः, अन्यथा प्रवृत्त्ययोगात्। तदर्थक्रियाकारितया प्रतिभासनात् तदकारिभ्यो भिन्नमिव। न च तत् तत्त्वम्, परीक्षानङ्गत्वादिति प्रतिपादयिष्यामः। तेऽर्था बुद्धिनिवेशिनः। तेन समाना इति गृह्यन्ते, कुतश्चिद्व्यावृत्ता [इति] प्रतिभासनात्। न स्वलक्षणन्नेत्रा(णं तेन, तत्रा)प्रतिभासनात्।

त एव कुतश्चिद्व्यावृत्ताः पुनरन्यतोऽपि व्यावृत्तिमन्तोऽभिन्नाश्च प्रतिभान्तीति। स्वयमसतामपि तथा बुद्ध्या उपदर्शनात् मिथ्यार्थ एव सामान्यसामानाधिकरण्यव्यवहारः क्रियते। सर्वश्चायं स्वलक्षणानामेव दर्शनाहितवासनाकृतो विप्लव इति। तत्प्रतिबद्धजन्मनां विकल्पानामतत्प्रतिभासित्वेऽपि वस्तुन्यविसंवादो मणिप्रभायामिव मणिभ्रान्तेः। नान्येषां तद्भेदप्रभवे सत्यपि यथादृष्टविशेषानुसरणं परित्यज्य किंचित्सामान्यग्रहणेन विशेषान्तरसमारोपात्। दीपप्रभायामिव मणिबुद्धेः।

तेन न विकल्पविषयेष्वर्थेष्वर्थक्रियाकारित्वम्। नापि स्वलक्षणस्यानित्यत्वाद्यभावः। यस्मान्नानित्यत्वं नाम किंचिदन्यच्चलाद्वस्तुनः। क्षणप्रत्युपस्थानधर्मतया तस्य हि तथाभूतस्य ग्रहणादेतदेवं भवति--'अनित्योयम्' 'अनित्यत्वमस्य' इति च। तद्धर्मतामेवावतरन्तो विकल्पा नानैकधर्मव्यतिरेकान् संदर्शयन्ति। न च ते निराश्रयास्तद्भेददर्शनाश्रयत्वात्। नावस्तुधर्मता, तत्स्वभावस्यैव तथाख्यातेः। वस्तुनस्तु नानैकव्यतिरेकग्रहो विभ्रमः स्यात्। तस्यैकानेक-

---

१ ०स्यान्यानपे० क०

कार्यकारिणस्तज्जिज्ञासासु तथाभावख्यापनाय तथाकृतस्थितित्वान्न वस्तुभेदात् । तस्यैकस्यानेकत्वायोगात् । अनेकस्य चैकत्वायोगाद् व्यतिरिक्तस्य च निषेधात् । तेषां प्रकृतिभेदात् यथा[11a]वस्तुशब्दार्थाभ्युपगमे सामानाधिकरण्यायोगात् ।

तदुपाधेरेकस्याभिधानाददोष इति चेद् । अनुपकारिणि पारतन्त्र्यायोगाद् अनुपाधिः । पारतन्त्र्ये[1] च जन्यजनकभावात् सहानवस्थितेर्द्वयोरनभिधानम् । एकस्य बुद्ध्याध्याहारे न वस्तुविषयः [2]शठः(ब्दः) स्यात् । बुद्धिप्रतिभाति(स)विषयत्वे च सर्वं तथैवास्तु । तथा भिन्नोपाधिमतः एकग्रहणेऽप्रतिभासनात् ।

उपकार्योपकारिणोरप्युपाधितद्वतोः सहावस्थानाददोष इति चेत् । न । निष्पन्नस्य पारतन्त्र्याभावादनुपाधित्वम्, नानिष्पन्नस्य, स्वरूपासिद्धेः । सर्वथाऽसत् पारतन्त्र्यमिति कल्पनारोपितं कृत्वा व्यवहारे सर्वथा[3] सैव किं न बुद्धिरनुविधीयते । एकशब्दप्रमाणेन विषयीकरणे वस्तुबलाव(द)शेषात्क्षे(षाक्षे)पात्तदन्यवैयर्थ्यं च न स्यात् । बुद्धिप्रतिभासस्य निर्वस्तुकत्वात् वस्तुसामर्थ्यभाविनामप्रसङ्गः ।

तदभिन्नमेकाकारविषयीकरणेऽप्यनिश्चितान्याकारमाकारान्तरसाकाङ्क्षबुद्धिग्राह्यं भिन्नशब्दार्थोपसंहारेऽप्यभिन्नं बुद्धौ प्रतिभातीति सामान्यविशेषणविशेष्यभावसामानाधिकरण्यानि यथाप्रतीति न विरुध्यन्ते । धर्मधर्मिभेदोऽप्यस्यानेकार्थभेदसंभवे तदेकार्थभेदविधिप्रतिषेधजिज्ञासायां तदेव वस्तु प्रतिक्षिप्तभेदान्तरेण धर्मशब्देन [4]संबोध्य बुद्धेस्तथाप्रतिभासनात् व्यतिरिक्तं धर्ममिवाऽविशेषेणापरमस्य स्वभावं धर्मितया व्यवस्थाप्य प्रदर्श्यते । तावता चांशेन धर्मधर्मिणोर्भेदात् भेदवती बुद्धिः प्रतिभाति । न वस्तुभेदाद्यथोक्तदोषात्तथाभूतभेदबाहुल्यचोदनया वचनभेदः साध्यसाधनभेदश्च तत्स्वभावसमाश्रयैः धर्मप्रतिभासभेदैस्तत्स्वभावप्रतिपत्तये क्रियत इति ।

तत्स्वभावग्रहाद्या धीस्तदर्थे वाप्यनर्थिका ।
विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते ॥७८॥

तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः ॥७९॥

अर्था ज्ञाननिविष्टास्ते यथा व्यावृत्तिरूपिणः ।
तेनाभिन्न इवाभान्ति व्यावृत्ताः पुनरन्यतः ॥८०॥

त एव तेषां सामान्यसमानाधारगोचरैः ।
ज्ञानाभिधानैर्मिथ्यार्थो व्यवहारः प्रतन्यते ॥८१॥

स च सर्वः पदार्थानामन्योन्याभावसंश्रयः ।
तेनान्यापोहविषयो वस्तुलाभस्य संश्रयः ॥८२॥

---

[1] न्त्र्येपि जन्य०—क०
[2] शब्दार्थः—क०
[3] सर्वत्र—क०
[4] संचोद्य—क०

यत्रास्ति वस्तुसंबन्धो यथोक्तानुमितौ यथा ।
नान्यत्र भ्रान्तिसाम्येऽपि दीपतेजो मणौ यथा ॥८३॥

तत्रैककार्योऽनेकोऽपि तदकार्यान्यिताश्रयैः ।
एकत्वेनाभिधाज्ञानैः व्यवहारं प्रतार्यते ॥८४॥

तथाऽनेककृदेकोऽपि तद्भावपरिदीपने ।
अतत्कार्यार्थभेदेन नानाधर्मा प्रतीयते ॥८५॥

यथाप्रतीतिकथितः शब्दार्थोऽसावसन्नपि ।
सामानाधिकरण्यं च वस्तुन्यस्य न संभवः ॥८६॥

धर्मिधर्मव्यवस्थानं भेदोऽभेदश्च यादृशः ।
असमीक्षिततत्त्वार्थो यथालोके प्रतीयते ॥८७॥

तं तथैव समाश्रित्य साध्यसाधनसंस्थितिः ।
परमार्थावताराय विद्वद्भिरवकल्प्यते ॥८८॥

संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः ।
रूपमेकमनेकं च तेषु बुद्धेरुपप्लवः ॥८९॥

भेदस्ततोऽयं बौद्धेऽर्थे सामान्यं भेद इत्यपि ।
तस्यैव चान्यव्यावृत्त्या धर्मभेदः प्रकल्प्यते ॥९०॥

साध्यसाधनसंकल्पे वस्तुदर्शनहानितः ।
भेदः सामान्यसंसृष्टो ग्राह्यो नात्र स्वलक्षणम् ॥९१॥

समानभिन्नाद्याकारैर्न तद् ग्राह्यं कथंचन ।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगतः ॥९२॥

तद्रूपं सर्वतो भिन्नं तथा तत्प्रतिपादिका ।
न श्रुतिः कल्पना [१]चास्ति सामान्येनैव वृत्तितः ॥९३॥

इति संग्रहश्लोकाः ।

किं पुनः कारणं स्वलक्षणे शब्दा न प्र[11b]युज्यन्ते ? यस्मात्—

शब्दाः संकेतितं प्राहुर्व्यवहाराय स स्मृतः ।
तदा स्वलक्षणं नास्ति संकेतस्तेन तत्र न ॥९४॥

न हि शब्दा असंकेतितमर्थं प्रकाशयन्ति । संकेतश्च व्यवहारार्थं क्रियतेऽपि नामेतः शब्दात् कृतसंकेतादुत्तरकालमिममर्थं प्रतिपद्येतेति । न च प्राक्कृतसंबन्धस्यैकत्र स्वलक्षणे शब्दस्य पश्चात् प्रयोगो युक्तः, तस्य देशकालव्यक्तिभेदाऽनास्कन्दनात् । तस्मान्न स्वलक्षणे समयः ॥

[१] वास्ति—क०

सामान्यं तर्हि व्यतिरिक्तमव्यतिरिक्तं वाच्यापि(क्तं व्यापि) शब्दैरभिधीयते । तत्र व्यवहारकालाभावा(व)दोषः । नैतदस्ति । यस्माद्—

अपि प्रवर्त्तेत पुमान् विज्ञायार्थक्रियाक्षमान् ।
तत्साधनायेत्यर्थेषु संयोज्यन्तेऽभिधायकाः ॥९५॥

न खलु वै व्यसनमेवैतल्लोकस्य यदयमसंकेतयन्नप्रयुञ्जानो वा शब्दान् दुःखमासीत् । किं तर्हि ? सर्व एवास्यावधेय आरम्भः फलार्थः, निष्फलारम्भस्योपेक्षणीयत्वात् ॥

तदयं क्वचिन्नियुञ्जानः किञ्चित्फलमेवेहितुं युक्तः । तच्च सर्वमिष्टानिष्टप्राप्ति-परिहारलक्षणम् । तेनायमिष्टानिष्टसाधनासाधनं ज्ञात्वा तत्र प्रवृत्तिं निवृत्तिं च कुर्यां कारयेयं वेति शब्दान् नियुञ्जीत नीयोगे वाद्रियेत, अन्यथोपेक्षणीयत्वात् ॥

तत्रानर्थक्रियायोग्या जातिः

न हि जातिः क्वचिद्वाहादावुपतिष्ठते । न [1]च तादृशं प्रकरणमन्तरेण लोके शब्द-प्रयोगो व्यवहारेषु ।

व्यक्तेरशक्यचोदनत्वात् लक्षितलक्षणार्थं जातिचोदनेति चेद् । अशब्दचोदिते सत्यपि संबन्धे कथं प्रवर्त्तेत ? न हि कश्चिद्दण्डं छिन्धीत्युक्ते दण्डिनं छिनत्ति । नाप्यसंभवाद्व्यक्तौ प्रवृत्तिः । एवं ह्यसंबद्धप्रलापी स्यात् । न ततोऽन्यत्र प्रवृत्तिर्बलीवर्ददोहचोदनावत् ।

न चार्थान्तरचोदनेनार्थान्तरस्य लक्षणम् । न हि संबन्धे सत्यपि दण्डशब्दाद्दण्डिनि प्रतिपत्तिः । अनियतसंम्बन्धत्वात्तत्र नेति चेत् । तत्तुल्यं जातावपि, व्यक्तीनामपाये केवलायाः जातेरवस्थानात् । भ्रात्रादिशब्दास्तु संबन्धिशब्दत्वादाक्षिपेयुः परम् । न तथा गोत्वादि-श्रुतयः संबन्धिवाचिन्यः, अपेतव्यक्तीनामपि जातीनां तच्छ्रुतिभ्यो नित्यमनुगमनप्रसङ्गात् । सर्वदा तत्संबन्धयोग्यताप्रतीतेरिष्टमेवेति चेत् । सर्वदा तर्हि गोशब्दादप्रवृत्तिः, सहिता-सहितावस्थयोर्विशेषेणाऽनाक्षेपात् । व्यक्तिसंबन्धिन्या जातेश्चोदनाददोष इति चेत् । सापि तर्हि तद्विशेषणत्वेनाऽवस्थिता व्यक्तिराक्षिप्तैवेति तद्वानभिधेयः स्यात् ।

न च जातिव्यक्तयोः कश्चित् सम्बन्धोऽन्योन्यमजन्यजनकत्वेनाऽनुपकारात् । ततो लक्षणमप्ययुक्तम् । तस्मान्न जातिशब्दनिवेशनम्, फलाभावात् ॥

एवं तर्हि

तद्वानलं

अर्थक्रियास्विति तत्र शब्दो नियोक्ष्यते ।

स च ।

---

[1] वा—क०

साक्षान्न योज्यते कस्माद्

यदि व्यक्तौ शब्दनिवेशनं फलवत् । स च शब्दः कस्मान्न साक्षाद्व्यक्तिष्वेव नियुज्यते । किं तत्रान्येन व्यवधिना ?

आनन्त्याच्चेदिदं समम् ॥९६॥

स्यादेतत्—आनन्त्याद्व्यक्तीनामशक्यः शब्देन संबन्धः कर्त्तुम् । एवं सतीदमानन्त्यं तद्वत्यपि समानम् । जात्यापि हि विशिष्टा व्यक्तय एव वक्तव्या इत्यकृतसंबन्धस्यानभिधानादवश्यं तत्र संबन्धः करणीयः । स च न शक्यते । तत्सम्बन्धिनि करणात्तत्रापि कृत एवेति चेत् । उक्तमत्र—कृतादन्यत्राऽप्रतीतिः । न च संबन्धोऽस्तीति ॥

अपि च

तत्कारिणामतत्कारिभेदसाम्ये न किं कृतः ।

यामर्थक्रियामधिकृत्यायमर्थे शब्दान्नियुङ्क्ते तत्कारिणामर्थानामन्येभ्यो भेदात् तत्रैव चैषामभेदे किं न शब्दः प्रयुज्यते ।

तद्वद्दोषस्य साम्याच्चेदस्तु जातिरलं परा ॥९७॥

स्यादेतत्—अन्यव्यावृत्तेऽपि शब्दार्थे व्यावृत्तिविशिष्टस्य तद्वतोऽभिधानात् न तद्वत्पक्षाद्विशेषः । को ह्यत्र विशेषो व्यावृत्तिर्जातिर्व्यावृत्तिमान् जातिमानिति । अस्तु नाम तद्वद्दोषो जातिरन्या मा भूत् । जातिमपि ह्यभ्युपगच्छताऽवश्यं भावानां भेदोऽभ्युपगन्तव्यः । तदभावे [12a]तस्या अप्यभावप्रसङ्गात् । स चैकस्माद्भेदस्तदन्येषामभेदस्तद्विशिष्टेष्वर्थेषु प्रतिपत्तिरस्तु । सर्वथा दोषपरिहारस्य कर्तुमशक्यत्वात् । अर्थान्तराभ्युपगमे प्रयोजनाभावात् । तदर्थस्यान्येन साधनात् । तदभ्युपगमस्य चावश्यंभावित्वात् ॥

अपि च

तदन्यपरिहारेण प्रवर्त्तेतेति च ध्वनिः ।
उच्यते तेन तेभ्योऽस्याऽव्यवच्छेदे कथं च सः ॥९८॥

शब्दं ह्येष प्रयुञ्जानोऽर्थेष्वनिष्टपरिहारेण प्रवर्त्तेतेति प्रयुङ्क्ते । तत्रान्यत्र च प्रवृत्त्यनुज्ञायां तन्नामग्रहणवैयर्थ्यात् । प्रवृत्तिनिवृत्त्यनुज्ञायां चैकचोदनाऽनादरादवचनमेव स्याद् अन्यव्यावृत्ताऽनभिधाने । तस्मादवश्यं शब्देनान्यव्यवच्छेदश्चोदनीयः । स चाभिन्नस्तदन्येष्विति जातिधर्मोऽप्यस्ति । तन्नियताभ्युपगमं नियतचोदनं जात्यर्थप्रसाधनं च परित्यज्यार्थान्तरकल्पनमनर्थनिर्बन्ध एव । यथाकल्पनमस्याऽयोगात् । न वै व्यवच्छेदो न क्रियते । प्रवृत्तिविषयं तु कथयद्भिर्जातिरुक्ता ॥

व्यवच्छेदोऽस्ति चेदस्य नन्वेतावत् प्रयोजनम् ।
शब्दानामिति किं तत्र सामान्येनापरेण वः ॥९९॥

ननूक्तं प्रवृत्तिविषयः प्रदर्श्यते इति । उक्तमिदमयुक्तं तूक्तम् । तथा हि न सा प्रवृत्तियोग्येति निवेदितमेतत् । तद्द्वारेणाचोदितेऽवृत्तिरप्युक्ता । तद्वच्चोदनेऽपि व्यवधानम् । जातितद्वतोः प्रवृत्तिविषयत्वे व्यावृत्तितद्वन्तौ किं नेष्येते ? व्यावृत्तेरवस्तुत्वेनाऽसाधनत्वाच्चेत् । तत्तुल्यं जातेः । तद्वतः साधनाददोष इति चेत् । तुल्यं तद्व्यावृत्तिमतः ।

अवस्तुग्राही च व्यावृत्तिवादिनां शाब्दः प्रत्ययः । स विभ्रमवशादकारकेऽपि कारकाध्यवसायी प्रवर्त्तयति । वस्तुसंवादस्तु वस्तूत्पत्त्या तत्प्रतिबन्धे सति भवत्यन्यथा नैवास्ति । वस्तूत्पत्तेरभ्रान्तिरिति चेत् । न । अतत्प्रतिभासिनस्तदध्यवसायात् । मणिप्रभायां मणिभ्रान्तिदर्शनेन व्यभिचारात् । भ्रान्तेरवस्तुसंवाद इति चेत् । न । यथोक्तेनैव व्यभिचारात् । वितथप्रतिभासो हि भ्रान्तिलक्षणम् । तन्नान्तरीयकतया तु संवादो न प्रतिभासापेक्षी ।

वस्तुनि तु यथाभावमर्पितचेतसः प्रवृत्तौ ग्राह्यस्य सामान्यस्यानर्थक्रियायोग्यत्वाद् अप्रवृत्तिः । अन्यत्र च प्रवृत्तावतिप्रसङ्गात् । तद्वद्ग्रहणे च(चा)सामर्थ्य[1]वैयर्थ्यादयः प्रोक्ताः। जातिग्रहणेऽपि संबन्धाच्छ्लिष्टाभासा बुद्धिः प्रवर्त्तयतीति चेत् । तदा न जातिर्न तद्वान् एकस्यापि [2]स्वभावा(व)स्थिते[र]ग्रहणादिति परवाद एवाश्रितः स्यात् ॥

एवं तर्ह्यन्वयिनः कस्यचिदर्थस्याभावात् प्रकृतिभिन्नेष्वर्थेषु तदेवेदमिति प्रत्यभिज्ञानं न स्यात् । नैष दोषः । यस्मात्—

ज्ञानाद्यर्थक्रियां तां तां दृष्ट्वा भेदेऽपि कुर्वतः ।
अर्थांस्तदन्यविश्लेषविषयैर्ध्वनिभिः सह ॥१००॥
संयोज्य प्रत्यभिज्ञानं कुर्यादप्यन्यदर्शने ।

यु(उ)क्तमेतत्—भेदेऽपि भावास्तुल्यार्थक्रियाकारिणः, चक्षुरादिवदिति । तामेकां ज्ञानादिकामर्थक्रियां तेषु पश्यतो वस्तुधर्मतयैवान्येभ्यो भिद्यमाना भावास्तद्व्यावृत्तिविषयध्वनिसंसृष्टं 'तदेवेदम्' इति स्वानुभववासनाप्रबोधेन संसृष्टभेदं मिथ्याप्रत्ययं जनयन्ति । अन्यथा न भेदसंसर्गवती बुद्धिः स्याद्यथा दण्डिषु । न हि तत्रैव दण्डयोगेऽप्यन्यत्र 'स एवायम्' इति । किं तर्हि ? 'तदिह' इति । न चैवं प्रत्यभिज्ञानम् । किं तर्हि ? 'तदेवेदम्' इति । तन्न तदेकमनेकत्र पश्यतोऽपि भेदसंसर्गवद्युक्तम् । विभ्रमबलात्तु तथा ज्ञाने न विरोधः ।

निमित्ताऽभावाद्विभ्रमोऽयुक्त इति चेत् । त एव भावास्तदेकार्थकारिणोऽनुभवद्वारेण प्रकृत्या विभ्रमफलाया विकल्पवासनाया हेतुत्वान्निमित्तम् । मरीचिकादिष्वपि जलादिभ्रान्तेस्तावेवाभिन्नाकारपरामर्शप्रत्यय[12b]निमित्तानुभवजननौ भावौ कारणं भिन्नावपि । न हि तत्रान्यदेव किंचित् सामान्यमस्ति, यत्तथा प्रतीयते । सत्त्वे वा सदर्थग्राहिणी बुद्धिर्भ्रान्तिर्न स्यात् ।

अभूताकारसमारोपाद् भ्रान्तिरिति चेत् । न तर्हि सा तत्सामान्यग्राहिणी । यमेव खल्वाकारमियमारोपयति, स एवास्या विषयः, अविषयीकृतस्याऽशक्यसमारोपात् । आकारान्त-

---

[1] सामान्यवै० क० [2] स्वभावस्थित्यग्रहणात्—क०

रवत् । स च तत्र नास्तीत्यसामान्यम् । सति सामान्यग्रहणे तदारोपः, नान्यथाऽतिप्रसङ्गादिति चेत् । सत्येककार्यकारिग्रहण इति किं नेष्यते ? अवश्यं चेच्छतापि सामान्यं व्यक्तीनामेककार्यजननशक्तिरेष्टव्या । ततस्ता एवान्योन्या(एवान्येभ्यो) भिद्यमानास्तादृशं प्रत्ययं जनयन्तीति किमत्र सामान्येन ? यथाभावमेवाऽसंसृष्टभेदं किं न प्रत्येति चेत् । अशक्तिरेषा विकल्पानामविद्याप्रभवात् ।

न वै बाह्यापेक्षा एव भ्रान्तयो भवन्ति । किंतु विप्लवादान्तरात् । केशादिविभ्रमवत् । अविद्योद्भवाद्विप्लवत्वे चक्षुर्विज्ञानादिष्वपि प्रसङ्गः । न । तस्याः विकल्पलक्षणत्वात् । विकल्प एव ह्यविद्या । सा स्वभावेनैव विपर्यस्यति । [१]न चैवमिन्द्रियज्ञानानि विकल्पकानि । न वा तेष्वप्येष दोषोऽद्वयानां द्वयनिर्भासादिति वक्ष्यामः ।

सर्वेषां विप्लवेऽपि प्रमाणतदाभासव्यवस्था आश्रयपरावृत्तेरर्थक्रियायोग्याभिमतसंवादनात् । मिथ्यात्वेऽपि वा प्रशमानुकूलत्वात् । मातृसंज्ञादिवत् । मरीचिकायां जलज्ञानस्यान्यस्य च विभिन्नभावोत्पत्तेर्विभ्रमस्य चाविशेषेऽप्यभिप्रेतार्थक्रियायोग्याऽयोग्योत्पत्तेः अर्थसंवादेतरौ ।

अयोग्यात् कथमुत्पत्तिरिति चेत् । विकल्पानामर्थप्रतिबन्धनियमाभावात् । न हि विकल्पा यथार्थमेव जायन्ते । सति मरीचिकादर्शने जलभ्रान्तिरिति तदुद्भवेत्युच्यते, न यथास्वभावमजलविवेकिनार्थेन स्वभावानुकारप्रत्यर्पणेन जननात् । सा तु विशेषलक्षणाऽपाटवात् प्रत्ययापेक्षिणा स्ववासनाप्रबोधेन जन्यते । तस्माद्भिन्नजन्मनो विकल्पविभ्रमात् 'तदेवेदम्' इति प्रत्यभिज्ञानम् । [न] तद्व्यतिरिक्तस्य सामान्यस्य दर्शनात्, नाऽव्यतिरिक्तस्य, व्यक्तिवदनन्वयाद् ॥

अपि च

परस्यापि न सा बुद्धिः सामान्यादेव केवलात् ॥१०१॥

न हि परोप्येनां बुद्धिं केवलं सामान्यभाविनीं वक्तुमर्हति ॥

नित्यं तन्मात्रविज्ञाने व्यक्त्यज्ञानप्रसङ्गतः ।

यदि हि नित्यमनया बुद्धया सामान्यमेव गृह्येताप्रतीतैव व्यक्तिः स्याद् अनेन ज्ञानेन ॥

तदा कदाचित् संबद्धस्याऽगृहीतस्य तद्वतः ॥१०२॥

तद्वत्तानिश्चयो न स्याद्व्यवहारस्ततः कथम् ?

यदा सामान्यग्राहिणो विज्ञानस्य न भेद आलम्बनभावेनोपयुज्यते, तदा न तौ कदाचिदपि श्लिष्टौ गृहीताविति 'इदमस्य सामान्यम्, अयं वा तद्वान्' इति न स्यात् । तथा च तत्प्रतिपत्त्या तद्वति प्रतिपत्तिर्न स्यादर्थान्तरवत् ॥

---

[१] नैवमिन्द्रि०—क०

एकवस्तुसहायाश्चेद्व्यक्तयो ज्ञानकारणम् ॥१०३॥

स्यादेतत्—भवन्ति व्यक्तयस्तस्याऽलम्बनभावेन कारणं न तु केवलाः । यदा पुनरासामेकं सहकार्यस्ति तदा तत्सहिता गृह्यन्त इति ॥

तदेकं वस्तु किं तासां नानात्वं समपोहति ।
नानात्वाच्चैकविज्ञानहेतुता तासु नेष्यते ॥१०४॥

किं चैतेषां भेदानां तेनैकेन नानात्वं निराक्रियते । नानात्वं हि तेष्वेकज्ञानाकारणत्वे कारणमुच्यते ॥

अनेकमपि यद्येकमपेक्ष्याभिन्नबुद्धिकृत्

न ब्रूमोऽनेकमेकं प्रत्ययं न जनयति भेदादिति । न भेदो जननविरोधी । किं तर्हि ? कैवल्यम् । तेनैकसहिता जनयन्त्येव । एवं तर्हि

ताभिर्विनाऽपि प्रत्येकं क्रियमाणां धियं प्रति ॥१०५॥

तेनैकेनापि सामर्थ्यं तासां नेत्यग्रहो धिया ।

कथमिदानीं व्यक्तीनां तत्र ज्ञाने सामर्थ्यगतिः ? प्रत्येकं तासामभावेऽपि तद्भावादसति सामान्येऽभावादितरथा च भावात् । नैष दोषः । यथा नीलादिष्वेकापायेऽपि चक्षुर्विज्ञानं भवतीति न समूहेऽपि तेषामसामर्थ्यम् । तथेहापि प्रत्येकमेकापाये भवतीति न सर्वदाऽसामर्थ्यम् ॥

विषम उपन्यासः । तथाहि—

नीलादेर्नेत्रविज्ञाने पृथक् सामर्थ्यदर्शनात् ॥१०६॥

शक्तिसिद्धिः समूहेऽपि नैवं व्यक्तेः कथंचन ।

नीलादीनां चक्षुर्विज्ञाने प्रत्येकमपि सामर्थ्यं [13a] दृष्टमिति समूहेऽपि शक्तिरविरुद्धा । तथा न कदाचित् व्यक्तयः सामान्यनिरपेक्षा अन्वयि विज्ञानं जनयन्ति । तस्मादसमर्था एव व्यक्तयस्तत्रेति न गृह्येरन् ॥

तासामन्यतमापेक्षं तच्चेच्छक्तं न केवलम् ॥१०७॥

अथापि स्यान्न वेमरहितः कुविन्दः पटं करोति । प्रत्येकं वेमाभावेऽपि कुविन्दः करोतीति न तत एवोत्पत्तिः । तथा न केवलमेकैकव्यक्त्यपाये विज्ञानोत्पत्तावपि सामान्यं तद्धेतुः । तासां व्यक्तीनामेकां कांचिदपेक्ष(क्ष्य) विज्ञानमुत्पादयतीति ॥

एवं सति

कथमेकमुपकुर्युस्ताः कथमेकां धियं च न ।

भिन्नानां ह्यर्थानामेकार्थोपक्रिया विरोधिनीति सर्वोऽयमारम्भः । ताश्चेद्व्यक्तयो भिन्ना अप्येकं सामान्यमुपकुर्वन्ति, कः पुनरासां विज्ञानेनापराधः कृतो यत्तन्न कुर्वन्ति ? किं तेनासामन्तर्गडुना सामान्येन ? यथा भिन्नानामप्येकसामान्योपकारशक्तिरेवं तदेवैकं विज्ञानं कुर्वन्तु ॥

किं च

कार्यश्च तासां प्राप्तेऽसौ जननं यदुपक्रिया ॥१०८॥

न ह्यनतिशयमात्मानमस्य पूर्ववद् बिभ्रत्तः कश्चिदुपकारको नामातिप्रसङ्गात् । अर्थान्तरजननेऽपि तस्य किं तेन ? तस्य तदाश्रयत्वेऽनुपकारिणः कोऽयमाश्रयाश्रयिभावोऽतिप्रसङ्गो वा । उपकारेऽपि तत्रैव तत्प्रतिबन्ध इति किमन्यस्तत्करणात्तदुपकारी । तदपेक्षस्याश्रयस्य तदुपयोगेऽनुपकार्यत्वे केयमपेक्षा नाम ? तदुत्पत्तिधर्मा स्वभावप्रतिबन्धादपेक्षते नाम । अनाधेयातिशयात्मा च परैं(परान् अ)पेक्षते चेति व्याहतमेतत् । तस्माद्यः कश्चित् कस्यचित् क्वचित् प्रतिबन्धः स सर्वो जन्यतायामेवान्तर्भवति[1], परभावोत्पादने तदनुपकारात् । अकिंचित्करस्य चानुपकारात् ।

तस्माद्व्यक्त्युपकृतस्य सामान्यस्य विज्ञानजनने व्यक्तमस्य तत्कार्यताऽनुषज्यते । केवलस्य तत्सामर्थ्ये व्यक्तीनां क्वचिदप्यत्र सामर्थ्याऽसिद्धेरग्राह्यत्वम् । समर्था व्यक्तयः, ज्ञाने प्रतिभासनादिति चेत् । कथमसिद्धोपकाराणां प्रतिभास इति ? स एव सामान्याभ्युपगमे चिन्त्यते । यस्मान्नानुपकारको विषयोऽतिप्रसङ्गात् । नाऽविषयस्य विज्ञाने प्रतिभासः । अनुपकारकस्याविषयत्वेऽतीतानागतादीनामविषयत्वमसतामुपकाराऽसामर्थ्यादिति चेत् । भवन्तु नाम तज्ज्ञानानि निर्विषयाणि । निर्विषयत्वेऽपि तदनुकारी प्रतिभासः । तद्रूपानुभवाहितवासनोत्पत्तेरात्मभूत एव विज्ञानस्य । भावाभावानुविधानाच्च सामर्थ्यम्, न प्रतिभासनाद् । अप्रतिभासिनोऽपि व्यक्तिव्यतिरेकेण सामान्यस्य भावात् । प्रतिभासिनामपि केशादिविप्लवानामभावाद् ॥

अभिन्नप्रतिभासा धीर्न भिन्नेष्विति चेन्मतम् ।

न ब्रूमोऽनेकमेककार्यकृन्न भवतीति । किं तर्हि ? न भिन्नेषु पदार्थेष्वपिततदाकारा बुद्धिरभिन्नप्रतिभासिनी स्यात् । न वै सामान्यग्राहिणीषु स्वलक्षणप्रतिभासः । तदभावेऽपि तासां भावात् । आकारान्तरेण च स्वज्ञाने प्रतिभासनात् । अनेकाकारायोगादेकस्यातिप्रसङ्गाच्च । तस्मान्नेयं भिन्नार्थग्राहिण्यभिन्ना प्रतिभाति तदुद्भवा । अतत्प्रतिभासिन्यप्यध्यवसायविभ्रमात् व्यवहारयति लोकम् । स तु तस्यां प्रतिभासमान आकारो नार्थेष्वस्त्यन्यत्र भेदादभेदिनः । स चारूपः । तमेवैषा गृह्णती तया विप्लवत इत्युक्तं प्राक् ।

अपि च—वस्तुसामान्यवादिनोऽपि भिन्ना एव व्यक्तयः ।

कथं तास्वभिन्नाभासा बुद्धिरिति तुल्यं चोद्यम् । न तुल्यम् । तत्राभिन्नस्य सामान्यस्य

---

[1] मेवोद्भवति—क०

सद्भावात् । ननु तत्र तस्याभासः ततोऽपि न लक्ष्यते । सा हि वर्णसंस्थानप्रतिभासवतीति भाव्यते । न चेदृशं [13b]सामान्यम् । न च ततो व्यतिरिक्तः कश्चिदभिन्न आकारोऽस्ति ।

आकृतिसामान्यवादिनोऽपि विशेषवत्तस्याऽव्यत्तिरेकादर्थान्तरेऽवृत्तिरिति भेदान्नाभिन्नः प्रतिभासो युज्यते ॥

अथवाऽस्तु

प्रतिभासो धियां भिन्नः समाना इति तद्ग्रहात् ॥१०९॥

नैव तास्वभिन्नः प्रतिभासोऽस्ति समाना इति ग्रहणात् । न ह्येकस्मिन् प्रतिभासे समाना इति युक्तम् । किं तर्हि ? तदेवेति । द्वयस्य ग्रहणाददोष इति चेत् । तथापि 'तदिह' इति स्यान्न समाना इति । तदेव तासां साम्यमिति चेत् । कथमन्योन्यस्य साम्यम् ? तत्संबन्धादिति चेत् । न । अप्रतिबद्धस्य संबन्धायोगात् अतिप्रसङ्गाच्च ॥

कथं ता भिन्नधीग्राह्याः समाश्चेत्

ननु समाना इति ग्रहणादास्वभिन्नः प्रतिभासः । न चैतद्दर्शने भिन्नाभिन्नयोः प्रतिभासनात् समाना इति प्रतीतिः । किं तर्हि ?

एककार्यता ।

सादृश्यम्

न हि वयमर्थज्ञाने द्वावाकारौ पश्यामः । अपश्यन्तश्च कथमर्थद्वयकल्पनेनाऽऽत्मानमेव विप्रलम्भामहे । एककार्यास्तु व्यक्तयः कल्पनाविषयतामुपयान्त्यस्तथाऽनया विभ्रमात् मिश्रीक्रियत इत्यनवद्यमेतत् ।

ननु धीः कार्यं तासां सा च विभिद्यते ॥११०॥

प्रतिभावम् । तद्वत्तत्प्रतिभासिनो विज्ञानस्यापि भेदात् कथमेककार्याः ?

तद्धि तासां कार्यं तच्च भिद्यते । यदप्युदकाहरणादिकमेकं घटादिकार्यं तदपि प्रतिद्रव्यं भेदाद्भिद्यत एवेति नैकं भेदानां कार्यमस्ति । नैष दोषः । यस्मात्—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥१११॥

निवेदितमेतद्यथा—न भावानां स्वभावसंसर्गोऽस्तीति । तत्र संसृष्टाकारा बुद्धिर्भ्रान्तिरेव । तां तु भेदिनः पदार्थाः क्रमेण विकल्पहेतवो भवन्तो जनयन्ति । स्वभावत इति च । स त्वेषामभिन्नो भेद इत्युच्यते, ज्ञानादेः कस्यचिदेकस्य करणादतत्कारिस्वभावविवेकः । तदपि प्रतिद्रव्यं भिद्यमानमपि प्रकृत्यैकप्रत्यवमर्शस्याभेदावस्कंदिनो हेतुर्भवदभिन्नं ख्याति । तथाभूतप्रत्यवमर्शहेतोरभेदावभासिनो ज्ञानादेरर्थस्य हेतुत्वाद्व्यक्तयोऽपि संसृष्टाकारं स्वभावभेदपरमार्थं स्वभावत एकं प्रत्ययं जनयन्तीत्यसकृदुक्तमेतत् ।

तस्मादेककार्यतैव भावानामभेदः ॥

सा चाऽतत्कार्यविश्लेषः

एव ।

तदन्यस्यानुवर्त्तिनः ।

वस्तुनः ।

अदृष्टेः प्रतिषेधाच्च

न हि दृश्यं विभागेनाप्रतिभासमानमस्तीत्युक्तमेतत् । सति वा क्वचिदनाश्रितं कथं ज्ञानहेतुरिति ? प्रतिषेधस्य च विधानात्तत्कल्पना युक्तेति ।

तस्मात्

संकेतः

अपि

तद्विदर्थिकः ॥११२॥

एव युक्तः । योऽयमन्योन्यं विवेको भावानां तत्प्रतीतय एव संकेतोऽपि क्रियमाणः शोभेत ॥

अतत्कारिविवेकेन प्रवृत्त्यर्थतया श्रुतिः ।

यदि हि न तत्प्रतीत्यर्थः संकेतस्तस्य व्यवहारकालेऽप्यसंस्पर्शान्नान्यपरिहारेण प्रवर्त्तेत । न हि तेषां तेभ्यो विवेकः शब्देन चोदित इति ॥

सा च श्रुतिः

अकार्यकृतितत्कारितुल्यरूपावभासिनीं ॥११३॥
धियं वस्तुपृथग्भावमात्रबीजामनर्थिकाम् ।
जनयन्त्यप्यतत्कारिपरिहाराङ्गभावतः ॥११४॥
वस्तुभेदाश्रयाच्चार्थे न विसंवादिका मता ।
ततोऽन्यापोहविषया तत्कर्त्राश्रितभावतः ॥११५॥

एकस्वभावरहितेष्वर्थेषु तमध्याहारो(ध्यारो)प्योत्पद्यमानां मिथ्याप्रतिभासत्वादकार्यकारिणमपि कार्यकारिणमिवाध्यवस्यन्ती वस्तुपृथग्भावमात्रबीजां समानाध्यवसायां मिथ्याबुद्धिं श्रुतिर्जनयन्त्यपि । तदन्यपरिहाराङ्गभावात् । परमार्थतस्तद्व्यतिरेकिषु पदार्थेषु न विसंवादिकेत्युच्यते । तथा हि स तेषु व्यतिरेको भूतः सर्वथाऽव्यतिक्रमणीयत्वात् । नैको व्यतिरिक्तोऽव्यतिरिक्तो वा, सर्वथाऽयोगात् । तस्य समावेशने वस्तुनि दूरोत्सृष्टमेव वस्तु स्यात्, शब्द-

ज्ञानाभ्यां तद्विषयाभिमतस्य तस्याभा[14a]वात् । अन्यस्य च वस्तुधर्मस्य कस्यचिदसंस्पर्शात् । तत एव च सा श्रुतिरन्यापोहविषयेत्युच्यते अन्यव्यावृत्तेष्वर्थेषु व्यावृत्तिभेदमुपादायाऽविशेषेण निवेशनात् । व्यवहारेऽप्यन्यपरिहारेण प्रवर्त्तनात् ॥

अवृक्षव्यतिरेकेण वृक्षार्थग्रहणे द्वयम् ।
अन्योन्याश्रयमित्येकग्रहाभावे द्वयाग्रहः ॥११६॥
संकेताऽसंभवस्तस्मादिति केचित् प्रचक्षते ।

यद्यवृक्षेभ्यो भेदो वृक्षस्तस्यावृक्षग्रहणमन्तरेण तथा ग्रहीतुमशक्यत्वात्, अविज्ञातवृक्षेणावृक्षस्यापि तद्व्यवच्छेदरूपस्यापरिज्ञानात् बुद्धावनारूढेऽर्थे [न] संकेतः शक्यत इत्येके ।

तेषामवृक्षाः संकेते व्यवच्छिन्ना न वा

ये एवमेकं वस्तु सामान्यमभ्युपगम्येतरेतराश्रयमन्यव्यवच्छेदेन संकेते चोदयन्ति, तेषां तत्रापि संकेतकरणेऽवृक्षा व्यवच्छिन्ना न वा ?

यदि ॥११७॥

व्यवच्छिन्नाः कथं ज्ञाताः प्राक् वृक्षग्रहणादृते ।

न हि तदा प्रतिपत्ता वृक्षं वेत्ति, नावृक्षम् । तज्ज्ञानायैव तदर्थितयोपगमात् । सोऽजानानः कथमवृक्षव्यवच्छेदं प्रतिपद्येत संकेते । [अ]प्रतिपत्तौ चापरिहृततदन्यनिवेशिनः शब्दात्—

अनिराकरणे तेषां संकेते व्यवहारिणाम् ॥११८॥
न स्यात्तत्परिहारेण प्रवृत्तिर्वृक्षभेदवत् ।

न हि संकेते पराव्यवच्छेदेन निवेशिताच्छब्दात् व्यवहारे तत्परिहारेण वृत्तिर्युक्ता शिंशपादिभेदवत् ॥

अथापि स्यात्—

अविधाय निषिध्यान्यत् प्रदर्श्यैकं पुरः स्थितम् ॥११९॥
वृक्षोऽयमिति संकेतः क्रियते[१] तत्प्रपद्यते ।
व्यवहारेऽपि तेनायमदोष इति चेत्

न वै वस्तुसामान्यवादिना कस्यचिद् व्यवच्छेदेन किंचिद्विधीयते । किं तर्हि ? एकमग्रतो व्यवस्थितं वस्तु संदर्श्य वृक्षोऽयमिति संकेतः क्रियते । संकेतकाले तथा दृष्टमेवायमर्थं तत् संबन्धिनं च व्यवहारेऽपि प्रतिपद्यत इत्यसमानः प्रसङ्गः ॥

---

[१] कृतः—क०

नाऽसमानो यस्मात्तत्रापि

तरुः ॥१२०॥

अयमप्ययमेवेति प्रसङ्गो न निवर्त्तते ।

एकं प्रदर्श्य 'अयं वृक्षः' इति ब्रुवाणोऽयमप्ययमेवेत्युभयीं गतिं नातिवर्त्तते । तयोश्च स एव दोषः ।

न दोषो दृष्टविपरीतस्य सुज्ञानत्वात् । एकं हि कंचित् पश्यतोऽन्यत्र तदाकार-विवेकिनीं बुद्धिमनुभवतः ततोऽन्यदिति यथाऽनुभवं तद्विवेचनो वैधर्म्यनिश्चय उत्पद्यते । स ह्ययमेव वृक्ष इति प्रदर्श्य व्युत्पादितो यत्रैतन्न पश्यति तमेवावृक्षं स्वयमेव प्रतिपद्यते । नेदं व्यवच्छेदवाचिनः संभवति, एकत्र दृष्टस्य रूपस्य क्वचिदनन्वयाद् । दर्शनेन प्रतिपत्तौ व्यक्त्यन्तरेऽपि न स्यात्तथा प्रतीतिः ॥

एवं तर्हि तत्रापि तुल्यमेव तत् । यस्माद्—

एकप्रत्यवमर्शाख्ये ज्ञान एकत्र हि स्थितः ॥१२१॥
प्रतिपत्ता तदतद्धेतूनर्थान् विभजते स्वयम् ।

निवेदितमेतत् प्राग् यथैते भावाः प्रकृतिभेदिनोऽपि विज्ञानादिकमेकं कार्यं केचित् कुर्वन्ति नान्य इति । तानयं तत्र स्वयमेव तद्धेतूनतद्धेतूंश्च विभज्य प्रत्येति ॥

तस्य—

तद्बुद्धिवर्त्तिनो भावान् [1]भावो हेतुतया धियः ॥१२२॥

अहेतुरूपविकलानेकरूपानिव स्वयम् ।
भेदेन प्रतिपद्येतेत्युक्तिर्भेदे नियुज्यते । १२३॥

तं तस्याः [2]प्रती(ति)यती धीः भ्रान्त्यैकं वस्त्विवेक्षते ।

तेषां प्रकृत्यैव प्रत्ययवशात्तथाभूतविकल्पकारणानामन्वयात्तद्द्रष्टुर्बुद्धौ विपरिवर्त्तमानां-स्तज्ज्ञानहेतुतया तदन्यव्यावृत्त्या वाऽतथाभूतानपि तथाध्यवसितानविभक्तबाह्याध्यात्मिकभेदान् प्रतिपत्ता प्रतिपत्तिमनुसृत्य 'एते वृक्षाः' इति स्वपरविकल्पेष्वेकप्रतिभासानादर्श(र्श्य) विकल्प-विज्ञाने व्यवस्थितस्तद्विज्ञानहेतून्न(तून्)भेदेन प्रतिपद्येतेत्युक्तिमतद्धेतुभ्यो भेदे नि[14b]युङ्क्ते । तं तस्याः प्रतिपद्यमाना बुद्धिर्विकल्पका भ्रान्तिवशादेवैकवस्तुग्राहिणीव प्रतिभाति । न पुनरेकं वस्तु तत्र दृश्यमस्ति । यस्य दर्शनादर्शनाभ्यां भिन्नदर्शनेप्येष वृक्षावृक्ष[वि]भागं कुर्वीत । तस्य शाखादिप्रतिभासविभागेन दण्डवद्दण्डिन्यग्रहणात् । अगृहीतस्य चापरप्रविभागेनानुप-लक्षणात् ।

[1] भातः—क० म०   [2] प्रतियती—क० म०

आकृतेरप्येकत्र दृष्टाया अन्यत्र द्रष्टुमशक्यत्वात् तदतद्वतोर्वृक्षावृक्षत्वे व्यक्तिरेकैव वृक्षः स्यात् ॥

भवतु नाम घटादिशब्देष्वर्थान्तरव्यवच्छेदः । अथ ज्ञानादिपदेषु कथम् ? न ह्यज्ञेयं किंचिदस्ति यतो भेदः स्यात् । ततो भेदेन विषयीकरण एव तस्य ज्ञेयत्वात् । नैष दोषो यस्मात्——

क्वचिन्निवेशनायार्थे विनिवर्त्त्य कुतश्चन ॥१२४॥

बुद्धेः प्रयुज्यते शब्दस्तदर्थस्यावधारणात् ।
व्यर्थोऽन्यथा प्रयोगः स्यात् तज्ज्ञेयादिपदेष्वपि ॥१२५॥

व्यवहारोपनीतेषु व्यवच्छेद्योस्ति[१] कश्चन ।

शब्दं हि प्रयुञ्जानः सर्वोन्वयव्यतिरेकौ नातिवर्त्तते । तस्य प्रवृत्तिनिवृत्त्यर्थत्वात् । यदि ह्ययं न कस्यचित् कुतश्चिन्निवर्त्तयेत् प्रवर्त्तयेद्वा बुद्धिं यथाभूतानुज्ञानात् सर्वव्यवहारेषु न किंचिद्व्याहरेद्व्याहारस्यावधारणनान्तरीयकत्वात् । यथा 'घटेनोदकमानय' इति । यदि घटेनाञ्जलिना वोदकानयनं यथाकथंचिदभिमतं स्यात् 'उदकमानय' इत्येव वक्तव्यं स्यात् । न घटेनेति । तथा पांशुना वान्येन वा येन केनचिदानीतेनार्थ 'आनय' इत्येव स्यादनाक्षिप्त-करणकर्मकम् । एवमानयनमन्यद्वा किंचिदनुष्ठानमननुष्ठानं वाभिमतं तदा 'आनय' इत्यपि न ब्रूयात् । व्यर्थत्वाद्वचनस्य । तथा व्यवहारोपनीतानां ज्ञेयादिशब्दानामपि केनचिद्व्यवच्छेद्येन भवितव्यम्, अनन्याशङ्कायां प्रयोगायोगात् । तत्र हि यदेव मूढमतेराशङ्कास्थानं तदेव निवर्त्त्यम् । अनाशङ्कमानो वा किं परस्मादुपदेशमपेक्षेत । अश्रोतृसंस्कारं च ब्रुवाणः कथं नोन्मत्तः स्यात् ? तत्संस्कारायैव शब्दानां कृतसङ्केतत्वात् । अव्यवहारोपनीतश्च नैव कश्चित् ज्ञेयादिशब्दोऽस्ति । वाक्यगतस्य पदस्यार्थचिन्तनात् ।

क्व पुनरेते शब्दाः प्रयुज्यन्त इति प्रयोगविषयचिन्तायामन्यापोह उच्यते । अनिर्दिष्ट-प्रयोगं तु ज्ञेयशब्दस्य कोऽर्थ इति प्रश्ने न कश्चिदर्थ[ः । त]तः क्वचिदप्रतिपत्तेः । तथा घटादिशब्दानामपि । यापि क्वचित् प्रकरणे केवलशब्दश्रवणात् प्रतिपत्तिर्दृष्टप्रयोगविषयानुसारेण साकाङ्क्षत्वादपरिसमाप्ततदर्था विप्लव एव घटादिशब्दे । तादृशो ज्ञेयादिशब्देष्वपि यथादर्शनमस्त्येव ।

तस्मात् सर्व एव शब्दप्रयोगः कुतश्चिद् बुद्धिं विनिवर्त्त्य क्वचिन्निवेशनार्थस्तत्साफल्यात् ॥

निवेशनं च यो यस्माद्भिद्यते विनिवर्त्त्य तं ॥१२६॥

तद्भेदे भिद्यमानानां समानाकारभासिनि ।

स चायमन्यव्यावृत्त्या गम्यते तस्य वस्तुनः ॥१२७॥

कश्चिद्भाग इति प्रोक्तो रूपं नास्यापि किंचन ।
तद्गतावेव शब्देभ्यो गम्यतेऽन्यनिवर्त्तनम् ॥१२८॥

---

१ च्छेदोस्ति—क०

न तत्र गम्यते कश्चिद्विशिष्टः केनचित् परः ।
न चापि शब्दो द्वयकृदन्योन्याभाव इत्यसौ ॥१२९॥
अरूपो रूपवत्त्वेन दर्शनं बुद्धिविप्लवः ।

निवेश(श्य)मानोऽप्येष शब्दो यो यस्माद्भिद्यते तं विनिवर्त्त्य भिद्यमानानां भेदे समानरूपप्रतिभासिनि आक्षिप्ततदन्यव्यावृत्तिर्निवेश्यते । स एव चायम्—'अर्थान्तरव्यावृत्त्या तस्य वस्तुनः कश्चिद्भागो गम्यते । शब्दोऽर्थान्तरनिवृत्तिविशिष्टानेव भावानाह' इत्यादिना निर्दिष्टः । स हि तं भेदं कथयन्नर्थान्तरव्यवच्छेदमाक्षिपन्नेव वर्त्तते । एकगतभेदस्य चोदनायास्तदन्यव्यावृत्त्याक्षेपनान्तरीयकत्वात् । स एव भेदस्तद्व्यावृत्त्या गतो भागस्तद्गतेस्तदुपाधित्वात्तद्विशिष्टो गत इत्युच्यते । न पुनरर्थान्तरनिवृत्तिविशेषणभूता केषांचिदर्थानां [15a] यया विशिष्टाः शब्दैश्चोद्यन्ते । दण्डिवत् । द्वयोर्हि भिद्यमानयोर्भेदस्योभयगतत्वात् । एकगतभेदाभिधानेऽपि नान्तरीयकस्तदन्याक्षेपो भवतीति न तयोर्विशेषणविशेष्यभावः । एकभेदाभिधानेऽप्यन्यव्यावृत्तिगतेरन्वयव्यतिरेकचोदनया व्यवहाराङ्गतां शब्दानां दर्शयन्—"तद्व्यावृत्त्या गम्यते । तद्विशिष्टो वा" इत्याह । अत एव च शब्दस्य न द्वौ व्यापारौ—तदन्यव्यावर्त्तनं स्वार्थाभिधानं च । स्वार्थाभिधानस्य तदन्यव्यावृत्तिगतेः, स्वार्थस्य भेदरूपत्वात् । न ह्यन्वयोऽव्यतिरेकः, अनन्वयो वा व्यतिरेकः, एकान्वयस्य परिहार्याभावे निष्फलचोदनत्वात् । तथैकपरिहारस्य क्वचित् स्थित्यभावे । स चायं भेदोऽरूपः । रूपवत्त्वेन त्वस्य दर्शनं केवलं बुद्धिविप्लव एव ॥

तेनैवापरमार्थोऽसावन्यथा न हि वस्तुनः ॥१३०॥
व्यावृत्तिर्वस्तु भवति भेदोऽस्याऽस्मादितीरणात् ।

रूपं हि परमार्थः । भेदश्चेद्रूपं स्यात्—तत् तद्रूपं स्यादतद्रूपं वा ? ताद्रूप्ये तदेवेति नान्यस्ततो भिद्येत । न हि तस्य रूपमन्यस्य स्यात् ।

न तदेव भेदस्य रूपम् । रूपं चासौ । ततोऽन्यदेव स्यात् । ततश्च भावस्तस्माद्व्यावर्त्तेत । ततोऽस्मात्तस्य भेद इति न स्यात् । यत् खलु यद्भेदाद्व्यावर्त्तते तदेव तद्भवतीति सोऽस्य भेद इति च न स्यात् । न ह्यन्योऽन्यस्य भेदो भवतीति संबन्धाभावात् । सति वा स कार्यकारणभाव इति रूपं तज्जनितं भेद इत्यविशेषात् सर्वकार्याणि स्वकारणानां व्यावृत्तयः स्युः । [१]रूपान्तरत्वे च भेदस्य ततोऽप्यस्य भेद इति भेदोपाधित्वाद् द्रव्यान्तरवन्न भेदः स्यात् ।

न हि भेदोपाधिरेव भेदोऽयमत इति विशेषनिर्देशात् । ततश्चोपाध्यभावे भेदस्यैवाभावः स्यात् । तस्मान्न व्यतिरिक्तस्तदन्यगत्यभावाच्च वस्तुनो न परमार्थः ॥

कथं तर्ह्यभिन्नस्य वस्तुनः शब्देन चोदने तस्यैवान्यतोऽपि भेदादनंशस्यैकभेदचोदने सर्वभेदगतेस्तत्र शब्दप्रमाणान्तराणि व्यर्थानि न स्युः ? यस्मात्

एकार्थश्लेषविच्छेद एको व्याप्रियते ध्वनिः ॥१३१॥

[१] अर्थान्तरत्वे—क०

लिङ्गं वा तत्र विच्छिन्नं [१]वाच्यं वस्तु न किंचन ।
यस्याभिधानतो वस्तुसामर्थ्यादखिले गतिः ॥१३२॥
[२]भवेन्नानाफलः शब्द एकाधारो भवत्यतः ।

उक्तं प्राग्यथा "संसृष्ट-बाह्याध्यात्मिकभेदा बुद्धिः स्वमेवाभावं(सं) व्यवहारमर्थक्रिया-योग्यमध्यवसाय शब्दार्थमुपनयति तत्र" इति । तत्रैव च ते शब्दाः तैस्तैर्भ्रान्तिकारणैः संसृष्टरूप इवाभाति यथासंकेतं विच्छेदाय व्याप्रियन्ते । न चैकसाध्यं व्यवच्छेदमन्यः करोति । संकेत-प्रतिनियमात् । न तु विच्छिन्नं किंचिद्वस्त्वाक्षिप्यते, यस्याभिधानाद्वस्तुबलेनाखिले गतिः स्यात् । शब्दानां बुद्धिविप्लवविषयत्वात् । तत्र चावस्तुनि वस्तुसामर्थ्याभावात् । तथा-भूतार्थदर्शनद्वारेणायं नानेकधर्मभेदाभेदप्रतिभासविप्लवानुसारी व्यवहार इति तस्य तत्प्रति-बन्धे सति तदव्यभिचारस्ततो वितथादप्यन्ते तथाभूत एव वस्तुनि ज्ञानसंवादात् । न पुनर्भिन्ना-कारग्राहिणां ज्ञानशब्दानामेकवस्तुविषयत्वात् नानाफलः शब्द एकाधारः, व्याघातात् । यथा वर्णिते तु बुद्धिप्रतिभासाश्रये न दोष इति ॥

विच्छेदं सूचयन्नेकमप्रतिक्षिप्य वर्त्तते ॥१३३॥
यदान्यं तेन स व्याप्त एकत्वेन च भासते ।
सामानाधिकरण्यं स्यात् तदा बुद्ध्यनुरोधतः ॥१३४॥
वस्तुधर्मस्य संस्पर्शो विच्छेदकरणे ध्वनेः ।
स्यात् सत्यं स हि तत्रेति नैकवस्त्वभिधायिनि ॥१३५॥
बुद्धावभासमानस्य दृश्यस्याभावनिश्चयात् ।

[३]इत्यन्तरश्लोकाः ॥

तेनान्यापोहविषयाः प्रोक्ताः सामान्यगोचराः ॥१३६॥
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसंभवात् ।

यदि हि विधि[15b]रूपेण वस्त्वेव शब्दैर्विकल्पैर्वा विषयीक्रियते[४] सोऽयं सर्वार्थ-सर्वाकारप्रतीतिप्रसङ्गोऽसामानाधिकरण्यादयश्चेति मन्यमानः प्रणेता न्यायशास्त्रस्यान्यापोह-विषयावेतौ प्राह ॥

तथाहि—

एकत्वाद्वस्तुरूपस्य भिन्नरूपा मतिः कुतः ॥१३७॥

अन्वयव्यतिरेकौ वा नैकस्यैकार्थगोचरौ ।

---

[१] बाह्यं—क०
[२] कुर्वन्ना—क०
[३] इति संग्रहश्लोकाः—क०
[४] क्रियेत—क

तदेकमनंसं(शं) वस्तु कथं भिन्नाकाराभिर्बुद्धिभिर्विषयीक्रियेत, आकारभेदाश्रयत्वाद्भेदस्य। तस्य चाभेदात् । तदात्मनोऽपि सामान्यस्य तदेकयोगक्षेमत्वात् । तदयमन्योन्यार्थपरिहारेणैकविषययोः वृत्त्यभावात् सामानाधिकरण्यादिर्न स्यात् ।

न च वस्त्वात्मन एकस्य तत्रैव वृत्तिरवृत्तिश्च युक्ता, व्याघातात् । न चान्यत्रावर्तमानं सामान्यं स्यात् । सामान्यस्य वृत्तिर्न विशेषस्येति चेत् । न । भेदाभावात् । तद्धयेकरूपं सामान्यं वा भवेद्विशेषो वा । न ह्यसति रूपभेदेऽयं विभागो युक्तः । सति वा, अव्यतिरेको न स्यादित्युक्तम् । तदयमविभागोऽन्वियाद्वा न वा । न पुनरन्वयीऽनन्वयी च ॥

योऽपि भिन्नमेव सामान्यमाह, तस्यापि—

अभेदव्यवहाराश्च भेदे स्युरनिबन्धनाः ॥१३८॥

यथास्वं शब्दा भिन्नमर्थमभिदधानाः कथमेकार्थबुद्ध्याश्रयाः स्युः, अर्थान्तराभिधायिनश्चानाक्षेपका निराकाङ्क्षत्वात् कथं विशेषणविशेष्यभावाश्रयाः ?

सर्वत्र भावाद्व्यावृत्तेः नैते दोषाः प्रसङ्गिनः ।

यथा ह्येकस्तस्माद्भिन्नस्तथान्योऽपीति भेदस्याऽसामान्यदोषोऽपि नास्ति । परिशिष्टाभावस्तु प्रागेवोक्तः ॥

अपि च—

एककार्येषु भेदेषु तत्कार्यपरिचोदने ॥१३९॥
गौरवाशक्ति[वै]फल्याद्भेदाख्यायाः समा श्रुतिः ।
कृता वृद्धैरतत्कार्यव्यावृत्तिविनिबन्धना ॥१४०॥
न भावे सर्वभावानां [स्व]स्वभावव्यवस्थितेः ।
यद्रूपं शावलेयस्य बाहुलेयस्य नास्ति तत् ॥१४१॥
अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते ।
अर्थाभेदेन च विना शब्दाभेदो न युज्यते ॥१४२॥
तस्मात्तत्कार्यताऽपीष्टाऽतत्कार्यादेव भिन्नता ।
चक्षुरादौ यथा रूपविज्ञानैकफले क्वचित् ॥१४३॥
अविशेषेण तत्कार्यचोदनासंभवे सति ।
सकृत् सर्वप्रतीत्यर्थं कश्चित् सांकेतिकीं श्रुतीम् ॥१४४॥
कुर्यादृतेऽपि तद्रूपसामान्याद्व्यतिरेकिणः ।

योऽपि मन्यते—कथमभिन्नमर्थमन्तरेण बहुष्वेका श्रुतिस्तेषामसामान्यात् । एकवृत्तेरन्यत्र प्रत्ययाजननात् । अप्रत्यासत्तिके च प्रत्ययोत्पादेऽतिप्रसङ्गात्तेषु चैकशब्दनिवेशनवैफल्यादेकार्थनियोगाभावात् । भिन्नस्वभावानां पृथग्नियोगे च तथा चोदितानां विभागापरिज्ञानादिति ।

तस्याप्येकमस्तीत्येव लोकेन शब्दो निवेशनीयस्तद्वैकमेनां श्रुतिं वस्तुशक्त्यैव ध्वनयतीति । नास्त्येतत् । किं तर्हि ? केनचित् प्रयोजनेन केनचिच्छब्दः क्वचिन्निवेश्यते । तत्र यद्यनेक-मेकत्रोपयुज्येत, तदवश्यं तत्र चोदनीयम् । तस्य पृथक् पृथक् चोदनेतिगौरवं स्यात् । न चास्यानन्यसाधारणं रूपं शक्यं चोदयितुम् । नाप्यस्यायासस्य किंचित् साफल्यम् । केवलमनेन तत्र योग्यास्तेऽर्थाश्चोदनीयाः । त एकेन वा शब्देन चोद्येरन्, बहुभिर्वेति स्वातन्त्र्य-मत्र वक्तुः ।

तदियमेका श्रुतिर्बहुषु वक्त्रभिप्रायवशात् प्रवर्त्तमाना नोप(पा)लम्भमर्हति । न चेयमशक्यप्रवर्त्तना, इच्छाधीनत्वात् । यदि हि न प्रयोक्तुरिच्छा कथमियमेकत्रापि प्रवर्त्तेत । इच्छायां वा क एनां बहुष्वपि प्रतिबद्धुं समर्थः ।

प्रयोजनाभावात् अप्रवर्त्तनमिति चेत् । उक्तमत्र—प्रयोजनं भिन्नेष्वप्येकस्मात् प्रतीति-रप्रयोजनभेदेनेति, न पुनः स्वभावस्यैकत्वात् । यथास्वं व्यवस्थितस्वभावानां भावानामन्यो-न्यरूपासंश्लेषात् कथमेकस्वभावनिमित्तः शब्दो भिन्नेषु भवेदित्युक्तं प्राक् ।

अतत्प्रयोजनव्यावृत्तिस्तु भिन्नानामप्यविरुद्धेति स एवार्थाऽभेदः शब्दाभे[16a]दस्य कारणं भवतु । तेनेमे तत्प्रयोजना इत्यतत्प्रयोजनेभ्यो भिन्ना एवोक्ताः । न पुनरेषामन्या तत्कार्यता । अन्यत्रान्यतो भेदाद्यथा चक्षूरूपालोकमनस्कारेष्वात्मेन्द्रियमनोर्थतत्सन्निकर्षेषु वा रूपविज्ञानैककार्येषु तत्कार्यसामान्यचोदनासंभवे कुतो रूपविज्ञानमिति व्यवहारलाघवार्थं कश्चित् सांकेतिकीं श्रुतिं निवेशयेत् प(स)रो रूपविज्ञानहेतुः शरो वेति । अपि नाम सर्वेषां तद्धेतूनां सकृत् प्रतीतिर्यथा स्यादिति । न चात्रानुगामि किंचिद्रूपमस्ति केवलं तदर्थतया ते भावा अतदर्थेभ्यो भिन्ना इति भेद एवैषामभेदः ।

एवंजातीयाश्च सर्वे समूहसन्तानावस्थाविशेषशब्दाः ये समस्ताः किंचिदेकं कार्यं कुर्वन्ति । तेषां तत्र विशेषाभावात् अपार्थिका विशेषचोदनेति सकृत् सर्वेषां नियोजनार्थमेकमयं लोकः शब्दं तेषु नियुङ्क्ते घट इति । तेऽपि सजातीयादन्यतश्च भेदाऽविशेषेऽपि तत्प्रयो-जनाङ्गतया तदन्येभ्यो भिद्यन्त इति अभेदात् ततोऽविशेषेण प्रतीयन्ते । तत्र घटस्य रूपादय इत्यपि घटस्वभावा रूपादय उदकधारणविशेषादिकार्यसमर्था इति यावत् । सामान्यकार्यसाधन-प्रसिद्धेनात्मना रूपादिशब्दैः सिद्धाः विशिष्टकार्यसाधनाख्येन विशेषेण विशिष्टास्त एवमुच्यन्ते । न पुनरत्रान्यत् किंचिद्यथावर्णितलक्षणं द्रव्यमस्ति, तस्य तादृशस्यानुपलम्भात् ।

एकवचनमपि तदेकशक्तिसूचनार्थम्, संकेतपरतन्त्रं वा ।

तथा ये हेतुफलविशेषभूताः किंचिदेकं साधयन्ति, साध्यन्ते वा तेऽपि सकृत् प्रत्यायनार्थं व्रीह्यादिशब्दैः कृतसंकेताः कथ्यन्त इति पूर्ववद्वाच्यम् । येऽपि पृथक् समस्ता वा क्वचिदुप-युज्यन्ते ते अवस्थाविशेषवाचिभिः शब्दैः सकृदेव प्रत्यायनार्थं ख्याप्यन्ते—सनिदर्शनाः सप्रतिघा वेति तदन्येभ्यो भेदसामान्येन । यथैककार्यास्तत्कार्यचोदनायां तदन्याभेदेन घटादिशब्दैः कृत-समयास्तथा कारणापेक्षयाऽप्यनेक एकेन व्यवहारार्थमेव यथा शावलेयो बाहुलेयः प्रयत्नानन्त-रीयकः कृतको वेति । तथा तत्कार्यप्रतिषेधेनाप्यचाक्षुषः शब्दोऽनित्योऽनात्मा वेति । तत्का-

रणप्रतिषेधेनापि—अस्वामिकः शून्य इत्येवं यथायोगमन्यदपि वाच्यम् । शून्यानित्यादिशब्देषु यथाकल्पनं समीहिताकारं बुद्धावारोप्य तद्व्यवच्छेदेन व्यपदेशः क्रियते । बुद्धिसमीहासंदर्शितविभागत्वात् सर्वस्य शब्दार्थस्य । अप्रतिपक्षदोषोपक्षेपादयोऽपि दुर्मतिविस्पन्दितानीत्युपेक्षणीयाः ॥

अथ

एकवृत्तेरनेकोऽपि यद्येकश्रुतिमान् भवेत् ॥१४५॥

न केवलमेककार्यास्तदन्यभेदाऽविशेषादेकशब्देनोच्यन्तेऽपि त्वेकवृत्त्याऽप्यनेक एकशब्देनोच्येत को विरोधः स्यात् ? उक्तमत्र—तस्योपलभ्याभिमतस्यानुपलब्धेरभावोऽनुपलभ्यतायां च तद्दर्शनाश्रयाः व्यपदेशप्रत्यभिज्ञानादयो न भवेयुरित्यादि ॥

अपि च

वृत्तिराधेयता व्यक्तिरिति तस्मिन्न युज्यते ।

यदेतदेकमनेकं (कत्र) वर्त्तमानमेकां श्रुतिं वर्त्तयति तस्य केयं वृत्तिराधेयता वा स्यात् यथा कुण्डे बदराणि वर्त्तन्त इति, व्यक्तिर्वा तैरभिव्यक्तेः ? यद्याधेयता

नित्यस्यानुपकार्यत्वान्नाधारः

नित्यं हि सामान्यमिष्यते । अनित्यत्वे परापरोत्पत्तेरनेकत्वाद् भेदवदेकप्रत्ययायोगात् । नित्यस्य च किं कुर्वाण आधारः स्यात् ? तस्य तत्र समवायादाधार इति चेत् । कोऽयं समवायो नाम ? अपृथक्सिद्धानामाश्रयाश्रयिभावः । तदेवेदमनुपकारकस्य आश्रयत्वं न संभावयामोऽतिप्रसङ्गात् ।

तस्मात् समवायसंयोगैकार्थसमवायादयोऽपि वस्तुसंबन्धाः कार्यकारणभावात् न व्यतिरिच्यन्ते । परस्परमन्यतो वाऽनुपकारिणामप्रतिबन्धादप्रतिबन्धस्य चासंबन्धात् । यद्यप्येकार्थसमवायिनां परस्परमनुपकारस्तत एकस्मादुपकारेण भाव्यमभावे यथोक्तदोषप्रसङ्[16b]गात् । अतः स्वोपकारकद्वारेणैवापरमपि बुद्ध्या संघटय्य ख्याप्यते । तस्मात्तत्रापि कार्यकारणभावकृत एव प्रतिबन्धः । तदयमाश्रयः सामान्यस्य स्वात्मन्यनुपकुर्वाणोऽनपेक्षस्याधार इति याचितकमण्डनमेतत् ॥

कथं तर्हीदानीमजनकं कुण्डं बदराणामाधारः ?

प्रविसर्पतः ॥१४६॥

शक्तिस्तद्देशजननं कुण्डादेर्बदरादिषु ।

प्रकृत्यैव गुरुणो द्रव्यस्याऽसमानदेशकार्योत्पादनधर्मणः समानदेशकार्योत्पादनभाव आधारकृतः । तस्मात्तत्पूर्वक्षणसहकारि कुण्डं तत्रैव बदरकार्यं जनयदाधार इत्युच्यते । अन्यथा 'इह कुण्डे बदराणि' इत्यपि न स्यात् । न वै तदुपकारकृतोऽयं व्यपदेशः । किं तर्हि ? संयोगकृतः । किं पुनः स तयोरेव संयोगः ? ताभ्यां जननात् समवायाद्वा । स किमत्रैव न समवैति जन्यते वा ? तस्याऽसामर्थ्यात् । तदसमर्थं पृथक् । तत्र (तत) सहितमपि तादृश-

मेवेत्यनुपकारकत्वान्न संयोगेन तद्वत् स्यात् । सहितस्य तदन्योपकारात् विशेषोत्पत्तेः सामर्थ्यम् । कोऽयमजन्यजनकभूतानामनुप(नामु)पकारः ? स्वरूपस्य सिद्धेरकार्यत्वात् पररूपक्रियायामपि तत्रानुपकारात् । उभयता[था] कारकस्याकिंचित्करत्वेनानुपकारकत्वादित्युक्तप्रायम् ।

तस्मात् सर्व एव वस्तुसंबन्धा जनकस्यैवोपयोगविशेषवशात् प्रविभागेन कार्यकारणभावात् व्यवस्थाप्यन्ते । तदयं कुण्डादीनामप्याधारभावो बदरादिषु जननशक्तिरेव ॥

न संभवति साप्यत्र

न ह्ययं जननविशेषलक्षण आधारभावः सामान्ये सामान्याश्रयस्य संभवति, तस्याऽजन्यत्वात् ।

तदभावेऽप्यवस्थितेः ॥१४७॥

न स्थितिः

अथापि स्यात् स्थापक आश्रयः सामान्यस्य । ततः स्थितिहेतुत्वादाधारो न जननादिति । तदयुक्तम् । तस्य तदभावेऽपि स्थानात् । पतनधर्मणां हि भावानां पातप्रतिबन्धादजनकोऽपि स्थापको भवेत्, अत्रापि यदि कश्चित् प्रतिबन्धं न पर्यनुयुञ्जीत । स हि पातप्रतिबन्धो नार्थान्तरमेव यः स्थापयित्वा क्रियेत । अर्थान्तरत्वे तत्रैवास्योपयोग इति कः पततः प्रतिबन्धः ? प्रतिबन्धादपातेऽपि तुल्यः पर्यनुयोगोऽनवस्था वा ।

तस्मात् पाताभावः पातप्रतिबन्धः । स कथं केनचित् क्रियेत ? अभावं करोतीति हि नाभावो नाम कश्चित् कार्यः । तस्य कथंचित् कार्यरूपत्वेऽभावायोगात् । तस्माद्भावक्रियाप्रतिषेधनिर्देश एषः भावं न करोतीति यावत् । तथा चायं न किंचित् करोतीति अकिंचित्करश्च कः कस्य स्थापको नाम ? तेनाऽयं केनचिदप्रतिबद्ध इति न कदाचित्तिष्ठेत् । तस्मात् पातप्रतिबन्ध इत्यपि क्षणिकानां भावानामुपादानसमानदेशोत्पादनमुच्यते ॥

अस्तु नामाजननं पातिनां तत्प्रतिबन्धस्तत्करणाद्गतिमतो द्रव्यस्य कश्चित् स्थापकोऽप्यस्तु । सामान्यस्याक्रियस्य किं लक्षणां स्थितिं कुर्वाणः स्थापकः स्यात् ? स्थितिर्हि तस्य स्वरूपाप्रच्युतिरेव । सा च नाश्रयायत्ता नित्यत्वात् ।

साप्ययुक्तैव भेदाभेदविवेचने ।

अस्तु नामाश्रयहेतुका स्थितिः । सा सामान्यादन्या वा स्यादनन्या वा ? अन्या चेत् । तामेव स आश्रयः करोति । सा चाऽप्रतिबद्धा सामान्य इति किं सामान्यस्याश्रयेण ? प्रतिबन्धे वा कः प्रतिबन्धः इति वाच्यम् । स्थितिकरणं चेत् । तत्रापि तुल्यः प्रसङ्गोऽनवस्था च । तत उपकारानवधारणा[त्] तस्येयं स्थितिरित्यप्रतीतिः । जननं चेत् । किमाश्रयेणाऽनुपकारिणाऽपेक्षितेन ? अपेक्षि(क्षे)ति हि तत्प्रतिबन्धः । स चानाधेयविशेषस्य सामान्यस्यायुक्त इति केवलं जनयेदिति नास्त्यन्यः स्थितिहेतुः ।

अभेदे वा स्थितेः सामान्यात्, स्वरूप[17a]मेव तत्तस्य । तच्च नित्यमस्तीति न स्थितिरस्य केनचित् क्रियते । तस्मान्न सामान्यस्याधारोऽस्ति । तन्नाधेयतास्य वृत्तिः ॥

अथ पुनः सतोऽपि सामान्यस्याव्यक्तस्य व्यक्त्या ज्ञाना(न)कारणत्वात् तद्व्यक्तिस्तत्र वृत्तिः स्यात् । न युक्तमेवं भवितुं यस्मात्—

विज्ञानोत्पत्तियोग्यत्वायात्मन्यन्यानुरोधि यत् ॥१४८॥

तद्व्यङ्ग्यं योग्यतायाश्च कारणं कारणं(कं) मतम् ।

प्रागेवास्य च योग्यत्वे तदपेक्षा नु(न) युज्यते ॥१४९॥

सामान्यस्याविकार्यस्य तत्सामान्यवतः कुतः ।

न खलु वै कारकाद्व्यञ्जकस्य कश्चिद्भेदः । स्वविषयविज्ञानोत्पादनसमर्थमपरं सजातीयोपादानापेक्षमनपेक्षं च जनयद्भावमेव व्यञ्जक उच्यते । परत्र तु ज्ञानजननशक्तिरनाक्षिप्ता जन्यस्येति जननमात्रेण कारकत्वम् । यो हि यतो विज्ञानोत्पादनयोग्यतां प्रतिलभते, स चेन्न तस्य जन्यः स्यात्, साम्य(स्य) स्वभावभूता योग्यता प्रागेवास्तीति न विज्ञानजनने तमपेक्षेत । परभूतायां चास्यां सैव ततो [1]भव[ती]ति स्थिति[2]प्रसङ्गः ।

तस्माद्व्यञ्जको न तं करोति नाप्यन्यमिति अकिंचित्करश्चापेक्षत इति व्याहतमेतत् ।

नत्व(न्व)जनका अपि कार्यत्वाद्धूमादयो व्यञ्जकाः । सत्यम् व्यञ्जकाः । न तु धूममपेक्षा(क्ष्या)ग्निरात्मनि ज्ञानं जनयति । तथाभूतस्याग्नेः साक्षादजनकत्वात् । केवलमुपादानबलेनैव हि तत्र ज्ञानमुत्पद्यते, न विषयबलेन । असत्यपि तस्मिन् भावात्, परम्परया लिङ्गानुसारेण । नापि सामान्यलक्षणावभासिनां प्रत्ययानां संनिहितविषयता विषयबलेन उत्पत्तिर्वेति निवेदितमेतन्निवेदयिष्यते च ।

तस्माद्ये विषयाः साक्षादुपयोगेन विज्ञानं जनयन्तस्तत्र परमपेक्षन्ते, तेऽवश्यं तत आत्मानं प्रतिलभन्ते । न चायमात्मप्रतिलम्भः सामान्यस्य नित्यस्य कुतश्चित् संभवति । तस्मान्न तत् केनचिद्व्यङ्ग्यम् ।

न वै योग्यताप्रतिलम्भं सामान्यस्य व्यक्तिं ब्रूमः । किं तर्हि ? स्वाश्रयसमवायम् । स्वाश्रयसमवेतं हि तदात्म[न्य]न्यत्र वा विज्ञानहेतुरिति । उक्तमत्र—अजन्यजनकयोः कोऽयमाश्रयाश्रयिभावलक्षणः समवाय इति । स्वाश्रयसमवायापेक्षो विज्ञानहेतुः । तेन जन्य एव स्यात्, तद्धेतोः स्वभावस्य प्रागभावात्, पश्चात्ततो भावात् । नित्यं तत्स्वभासद्भावे प्रागपि समवायाद्विज्ञानोदयप्रसङ्गात् ॥

न वै व्यक्तिः सामान्यस्य संस्काराद्व्यञ्जिका । किं तर्हि ? तद्ग्राहिण इन्द्रियस्य । सोऽपि—

अञ्जनादेरिव व्यक्तेः संस्कारो नेन्द्रियस्य च ॥१५०॥

---

[1] भूतेति—**क०**   [2] स्थितिवत्प्रसङ्गः—**क०**

प्रतिपत्तेरभिन्नत्वात्तद्भावाभावकालयोः ।

संस्कृतमञ्जनादिभिरिन्द्रियं प्रतिपत्तौ किंचिदतिशयमासादयति स्पष्टास्पष्टभेदात्, अतत्कारिणश्चातत्संस्कारकत्वात् । नैवं व्यक्तेरिन्द्रियस्य कस्यचित् संस्कारस्तद्भावाभावकालयोस्तत्प्रतिपत्ति प्रत्यविशेषात् । विषयसंस्कारस्त्विन्द्रियाऽविशेषेऽपि तद्विशेषाधानादुपकारी स्यात्, नेन्द्रियसंस्कारः । प्रागदृश्ये दर्शनशक्त्याधानादुपकारक इति चेत् । सोऽतीन्द्रियमर्थं दर्शयन् कथं न प्रतिपत्तेर्भेदकः ? एकप्रतिनियमे च सामान्यान्तरस्य दर्शको न स्यात् । व्यक्त्या चेन्द्रियसंस्कारात्तद्दर्शने तद्व्यङ्ग्येषु सामान्येषु कदाचिदनिश्चयो न स्यात्, एकनिश्चयो वा, तस्या अविभागायास्तेषु विशेषाभावात् । व्यक्तेर्यदीन्द्रियसंस्कारो यदि नेन्द्रियसंस्कारः सामान्यस्य विज्ञानजननस्वभाव इति स्वभावादच्युतेरनपेक्ष्यैवेन्द्रियसंस्कारं विज्ञानं जनयेत् ।

संस्कृतेन्द्रियसहकारित्वात् केवलमसमर्थमिति चेत् । कोऽयमनाधेयातिशयस्य सहकारार्थः ? अनित्या हि भावाः सहकारिणो विशिष्टात्मलाभास्तमपेक्षेरन् । यो ह्येषां जनक आत्मा, स तदै[17b]व ततो भवतीति जन्यते(तै)वैषां परस्परतोऽपेक्षा । सामान्यं पुनरनासाद्य परं नित्यं तत्स्वभावं किमितीन्द्रियमपेक्षते ? न हि तस्य केवलस्य यो न तत्स्वभावः स पुनः कथंचिद्भावी । व्यक्तेरिन्द्रियसंस्कारः, तत्सहकारि सामान्यं विज्ञानहेतुरित्यपि पारम्पर्येण व्यक्तेः कार्यमेव सामान्यमुक्तं स्यात् ॥

अपि च—

व्यञ्जकस्य च जातीनां जातिमत्ता यदीष्यते ॥१५१॥

प्राप्तो गोत्वादिना तद्वान् प्रदीपादिः प्रकाशकः ।

यो हि यद्विषयविज्ञानहेतुः स तस्य व्यञ्जकः । विज्ञानहेतुत्वं गोत्वादिषु प्रदीपादेरप्यस्ति, तेजःसंस्कारापेक्षिणश्चक्षुषोऽर्थप्रतिपत्तेः । ततः प्रदीपादयो गोत्वादिना तद्वन्तः स्युः । न हि व्यक्तेरपि ज्ञानहेतुतां मुक्त्वाऽन्या काचिदभिव्यक्तिः सामान्यस्य, स्वभावातिशयस्याधातुमशक्यत्वात् । समवायोऽभिव्यक्तिरिति चेत् । उक्तोत्तरमेतत्तस्य समवायायोगादिति । समवायमात्रं हि व्यक्त्या सहास्य जातं नान्यः कश्चिद्विशेष इति पूर्ववत् पश्चादपि न ज्ञानहेतुः स्यात् । समवायादेव विज्ञानहेतुत्वे स्वाश्रयसमवायिनामन्येषामपि दृश्यतापत्तिः । तस्मात् ज्ञानहेतुतैव व्यञ्जकत्वम् । तच्च तुल्यं प्रदीपादाविति स एव प्रसङ्गः ।

तन्नाधेयता न व्यक्तिर्वृत्तिः सामान्यस्येति । अवृत्तेर्नानेकत्र ज्ञानहेतुः ॥

अत एव

व्यक्तेरन्याऽथवाऽनन्या येषां जातिस्तु विद्यते ॥१५२॥

तेषां व्यक्तिष्वपूर्वासु कथं सामान्यबुद्धयः ।

विद्यत एवेत्यवधारणार्थस्तुशब्दः । विद्यमानो हि पदार्थः स्वसामर्थ्येनान्यत्र बुद्धिं जनयन् स्वरूपानुकारिणीं तत्संबन्धमपेक्षते अन्यथातिप्रसङ्गात् । स च सामान्यस्य सतः तत्त्वान्यत्वपक्षयोर्न संभवतीति ॥

एकत्र दृष्टस्यान्यत्र दर्शनासंभवात्

सा हि बुद्धिरेकभाविनी व्यक्त्यन्तरमेवमास्कन्देत्, भूतग्राहिणी यदि तत्र दृष्टं किंचिदन्यत्र पश्येत् । तच्च

सतः ॥१५३॥

अनन्यत्वेऽन्वयाभावाद् अन्यत्वेऽप्यनपाश्रयात् ।

न संभवति ।

स्वभावो हि भावान्न तत्त्वमन्यत्वं वा लङ्घयेत्, रूपस्यातद्भूतस्यान्यत्वाव्यतिक्रमात् । इदमेव खलु रूपस्यान्यत्वं यत्तत् (यन्न तत्) । आकारान्तरवदविशेषात् । तच्चेत् सामान्यस्य रूपमनन्यत् । तदेव तद्भवति । अतत्त्वे वस्त्वन्तरवदन्यत्वप्रसङ्गात् । न चैकव्यक्त्यात्मनो व्यक्त्यन्तरान्वावेशो व्यक्त्यन्तरत्वप्रसङ्गात् । ततो नाव्यतिरेकिणः सामान्यादन्वयिनी बुद्धिः स्यात् । नापि व्यतिरेकिणस्तस्य क्वचिदनाश्रयणात् । अन्यस्यापि व्यङ्ग्यव्यञ्जकभावादेः संबन्धस्य केनचिदनुपकार्यस्याप्रतिबन्धेनाभावात् । असंबन्धाच्च ज्ञानोत्पत्तावतिप्रसङ्गात् । तदयमेकवस्तुदर्शनेनैकवृत्तेः प्रत्ययस्यान्यत्र वृत्तिमिच्छंस्तत्त्वान्यत्वे नातिक्रामतीत्युक्तमेतत् ।

तस्मादियमर्थेष्वेकरूपा प्रतीतिर्विकल्पवासनासमुचि(त्थि)ता भ्रान्तिरेव । भावभेदो वासनाप्रकृतिश्चास्या आश्रय इति निर्लोठितमेतत्[1] ।

कथं तर्हीदानीं प्रधानेश्वरादिकार्यशब्दाः भावेष्वतद्भूतभेदेष्वभेदेन वर्त्तन्ते ? तेऽपि यथासंकेतवासनोपस्कृतत्वाच्चित्त[2]संतते(तेः) सर्वार्थदर्शनेष्वनपेक्ष्याऽपि तद्भेदं तथाध्यवसायात्तथाभूतकल्पितव्यवच्छेदेन विकल्प्य(ल्प)विज्ञानप्रतिभासिन्यर्थे उपादानबलप्रभवविकल्पसमुत्थिताः प्रवर्त्तन्ते । न हि तेषु तथाऽसत्सु किंचिद्व्यतिरिक्तमव्यतिरिक्तं वा सामान्यमस्ति । तथाभावकल्पनया तु तदन्यभेदः प्रतिपत्त्रभिप्रायवशात् स्यात् । तदभिप्रायवशादेव सामान्यं किं नेति चेत् । तेनावश्यं हि तत्र भेदो नान्तरीयक[3][18a]त्वादेष्टव्यः । स एव सामान्यकार्ये पर्याप्त इति निष्प्रयोजना सामान्यकल्पना ।

यदि सत्स्वसत्सु भावेषु सामान्यबुद्धिर्नेयमर्थवती केवलं विप्लव एवेति नास्माकमस्या विषयनिरूपणं प्रति कश्चिदादरः । क्वचिदविसंवादोऽस्या वस्तुनि कार्यकारणभावप्रतिबन्धात्, न तथाभूतग्राह्यसमावेशात् । प्रत्यक्षवत् । अतथाभावेऽपि भावादिति निवेदयिष्यामो निवेदितं च । भेदविषयत्वं पुनरस्या बहुलं भिन्नपदार्थदर्शनबलेन तेषु भावाध्यवसायात् । तथाभावकल्पनायामेवापरत्र भावात् ॥

अपि चायं सामान्यमर्थान्तरं कल्पयन् स्वाश्रयमात्रगतं कल्पयेत्, सर्वगतं वाकाशादिवत् । तत्र यदि स्वाश्रयमात्रगतं घटत्वादिशून्येषु प्रदेशेषु घटाद्युत्पत्तौ कथं तेषु भिन्नदेशद्रव्यवर्त्तिनः सामान्यस्य संभवो यस्मात्तत्पूर्वद्रव्यादुत्पित्सुद्रव्यं

---

[1] निर्णीतमे०—क० [2] त्वाद्विज्ञानसं०—क० [3] कतयेष्ट०—क०

न याति

निष्क्रियत्वोपगमात् । न ह्यन्यवृत्तेर्भावस्य ततोऽविचलतो भिन्नदेशेन भावेन तदुभयान्तरालाऽव्यापिनो योगो युक्तः । प्राक् स

न च तत्रासीदस्ति पश्चात्

न च तत्रोत्पन्नो न कुतश्चिदायात इति क इमं व्याघातभारमुद्वोढुं समर्थोऽन्यत्र जाड्यात् ।

अपि च—

न चांशवत् ॥१५४॥

जहाति पूर्वं नाधारम्

उत्पित्सुदेशाद्भिन्नदेशम् । तयोश्च वर्त्तत इति ।

अहो व्यसनसन्ततिः ।

भिन्नदेशयोर्हि भावयोः संबन्धी द्विधा भवेत् । नानावयवात्मतयान्योन्याभ्यामवयवाभ्यां तत्संबन्धादालोक-रज्जुवंश-दण्डादिवत् । न हि सावयवत्वमन्तरेण भिन्नदेशाभ्यां युगपत् कस्यचिद्योगो युक्तस्तस्य द्वितीयात्माऽभावात्, एकात्मनश्च तत्प्रदेशवर्त्तिसंबन्धरूपत्वात् । अन्यथा तत्संबन्धायोगात् । एकस्याधेयस्य तत्र स्थानं तत्र तदैव तेनैवात्मनाऽस्थानमिति तत् स्थिताऽस्थितात्मनोरेकस्य विरोधादयुक्तमेतत् ।

सर्वत्र सर्वदा सर्वाकारस्थितात्मेति चेत् । तत्स्वभावदर्शनाश्रयः प्रत्ययः सर्वत्र सर्वाकारः स्यात् । तथा च गामप्यश्व इति प्रतीयात् । अश्वस्थितात्मना द्रव्यत्वेन संबन्धात् । तत्स्वभावप्रतिपत्त्या च तथा निश्चयात् । तस्य चैकस्याऽदृष्टाकारान्तराऽभावात् । तस्मान्नानवयवमनेकदेशे युगपदाधीयते ॥

पूर्वाधारत्यागे तु भिन्नदेशेऽपि वर्त्तेत । स च नाभिमतः ।

अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि ॥१५५॥
स्वस्माद्चलतः स्थानाद्वृत्तिरित्यतियुक्तिमत् ।
यत्रासौ वर्त्तते भावस्तेन संबध्यतेऽपि न ॥१५६॥
तद्देशिनं च व्याप्नोति किमप्येतन्महाद्भुतम् ।

इत्यन्तरश्लोकौ ॥

यस्य तु सर्वगतं सामान्यं तस्यापि

[१]व्यक्तैवैकत्र सा व्यक्त्याऽभेदात् सर्वत्रगा यदि ॥१५७॥

---

[१] व्यक्त्यैवै० म०; व्यक्तौ वै—क०

जातिर्दृश्येत सर्वत्र

न जातेर्नित्यायाः काचिद्व्यक्तिरिति निषिद्धमेतत् । तस्मान्नित्यमनपेक्षितपरोपकारा दृश्येत वा, न वा कदाचित्, तस्मिन् स्वभावे व्यवस्थानात् । स्वभावान्तरस्य कुतश्चिद्नुत्पत्तेः । अभ्युपगम्याऽपि व्यक्तिं व्यापिन्येकत्र व्यक्त्या भेदाभावाद्व्यक्तैव सर्वत्रेति व्यक्तिशून्येष्वपि देशेषु दृश्येत ।

न च सा व्यक्त्यपेक्षिणी ।[1]

यदि व्यक्त्यपेक्षिणी स्यात्;

व्यञ्जकाप्रतिपत्तौ हि न व्यङ्ग्यं संप्रतीयते ॥१५८॥

विपर्ययः पुनः कस्मादिष्टः सामान्यतद्वतोः ।

योऽपि हि—

"स्वाश्रयेन्द्रियसंयोगापेक्षप्रतिपत्तिकम् ।
सामान्यमाश्रयशून्येषु देशेषु न दृश्यते ॥"

इति प्रतिसमादधीत तस्याप्यस्त्येवेन्द्रियाश्रयसंयोग उपकारक इति । ततस्तद्दर्शी यथास्थितां पश्येत् । न हि तस्यां दृश्यमानायां रूपमदृष्टं [18b]तदीयं युक्तम् ।

व्यक्तिव्यङ्ग्यत्वात् सामान्यस्य व्यञ्जकरहितेषु प्रदेशेष्वदर्शनमित्यपि मिथ्या । तथाभूतस्य व्यङ्ग्यव्यञ्जकभावस्य तत्राभावात् । स्वप्रतिपत्त्या परप्रतिपत्तिहेतुर्हि व्यञ्जकः प्रदीपादिः स्वरूपशून्ये देशे स्वव्यङ्ग्यं न दर्शयति नैवं व्यक्तिर्विपर्ययात् । कथं हि सा व्यञ्जिका च स्यात् सामान्यस्य, तत्प्रतिपत्तिद्वारेण च दृश्या स्यात् ? व्यङ्ग्या च सैवं प्रसज्यते । प्रदीपघटवत् कथंचित्तत्प्रतिपत्तिमन्तरेणादृश्यरूपत्वात् ॥

अपि चानेन किमसंभवदभिसमीक्ष्यैवं बह्वायासः सामान्यवाद आश्रितः ? परस्परतो भेदाद्व्यतिरेकिणीषु व्यक्तिष्वन्वयिनः प्रत्ययस्यायोगात् । कथमिदानीं—

पाचकादिष्वभिन्नेन विनाप्यर्थेन वाचकः ॥१५९॥

पाचकपाठकादिष्वन्योन्यमनन्वयिष्वपि शब्दप्रत्ययानुवृत्तिरस्ति पाचकः पाठक इति । न हि तेष्वन्यदेकमभिन्नमस्ति येन भिन्नास्तथा प्रतीयेरन् ॥

कर्मास्ति चेत् । व्यक्तिभ्य एव तर्हि स प्रत्ययोऽस्तु । किमिदानीं कर्मणान्येन वा ? भिन्नमभिन्नप्रत्ययहेतुर्न भवतीत्येकं सामान्यमिष्टम् । तद्यदि भिन्नमपि कर्माभिन्नं प्रत्ययं जनयेत्, व्यक्तिभिः कोऽपराधः कृतो येन तास्तथा नेष्यन्ते ? तासामेकरूपत्वात् 'अस्येदम्' इति व्यतिरेकप्रतीतिरतदाकारविशेषवती च न स्यादिति चेत् । उक्तमत्र यथा व्यतिरेको विशेषप्रत्ययाश्च यथास्वमर्थान्तरविवेकादिति ।

[1] न च सा जात्यपेक्षिणी—क० अशुद्धमेतत् । सापि न व्यक्त्यपेक्षिणी—म०

तस्माद्व्यक्तिवत्

भेदान्न हेतुः कर्मास्य

पाचकाद्यभेदप्रत्ययस्य ॥

तत्कर्मजातिरभेदाद्धेतुरिति चेत् ।

न जातिः कर्मसंश्रयात् ।

न ह्यर्थान्तरसंबन्धिनी जातिरर्थान्तरे प्रत्ययहेतुः । गोत्वमिव कर्कादिषु । पाचककर्मसु च कर्मजातिः । न च तानि कर्माणि पाचकशब्देनाभिधीयन्ते । किं तर्हि ? तत्कर्माश्रयो द्रव्यम् ॥

तस्य कर्मसामान्यस्य

श्रुत्यन्तरनिमित्तत्वात्

पाकः पाक इति हि ततः स्यात्, न पाचक इति । तस्य कर्मनिमित्तत्वे प्रोक्तम् ।

किं च—

स्थित्यभावाच्च कर्मणः ॥१६०॥

न ह्यनित्यं कर्म सर्वदाऽस्ति । तस्य च प्रत्ययस्य कर्मनिमित्तत्वे निरुद्धे कर्मणि न पाचक इत्युच्येत । पचत एव कर्मसद्भावात् ॥

तत एव

असंबन्धान्न सामान्यं नायक्तं शब्दकारणम् ।

अतिप्रसङ्गात्

विनष्टे हि कर्मणि तत्सामान्यं न कर्मणि न कर्त्तरीति संबद्धसंबन्धोऽप्यस्य नास्तीत्यसंबन्धान्न शब्दज्ञानहेतुः, अन्यथाऽभि(ति)प्रसङ्गः स्यात् ।

अतीतमनागतं वा निमित्तीकृत्य तयोः प्रवृत्तिरिति चेत् ।

कर्मापि नासत् ज्ञानाभिधानयोः ॥१६१॥

निमित्तम् । तयोः

अनैमित्तिकतापत्तेः

असद्धि निरुपाख्यं कथं निमित्तं स्यात् ? कार्यकारणलक्षणत्वाद्वस्तुतत्त्वस्य । तत्प्रच्युताऽसंप्राप्तरूपमतीतानागतं कर्मानिमित्तम्, अन्यच्च व्यक्त्यादिकं नेष्टमित्यनिमित्ते ते स्याताम् । तथा च न जातिसिद्धिस्तस्या ज्ञानाभिधानयोर्निमित्तत्वेनेष्टत्वात् ॥

शक्तिः पाचकादिशब्दनिमित्तम्, न कर्म, न सामान्यमिति चेत् ।

न च शक्तिरनन्वयात् ।

न हि शक्तिर्नाम किंचिदन्यदेव पाचकादीनाम्, तस्या एव पाकाद्यर्थक्रियोपयोगेन द्रव्यस्यानुपयोगित्वप्रसङ्गात् । तस्यां तस्योपयोग इति चेत । किमिदानीं शक्त्या ? शक्त्युपयोगाय शक्त्यन्तरस्य व्यतिरेकिणोऽभ्युपगमेतिप्रसङ्गात् द्रव्यमेवोपयुज्यत इति वाच्यम् । तस्योपयोगे शक्तावर्थक्रियायामेवोपयुज्यत इति किं नेष्यते ? किमन्तरालेऽनर्थिकया शक्त्या ? तस्माच्छक्तिरिति द्रव्यमेव तत्कार्यम् । तच्च नान्वेतीति ततोऽन्वयी शब्दो न [19a]स्यात् ॥

सामान्यं पाचकत्वादि यदि प्रागेव तद्भवेत् ॥१६२॥

व्यक्तं सत्तादिवन्नो चेन्न पश्चादविशेषतः ।

अथापि पाचकत्वमिति सामान्यमेव किंचिद्भवेत् । सत्यर्थे तत्समवायस्याऽकादाचित्कत्वात् । सत्त्वादिवत् प्रागेव व्यक्तं स्यात् । यावन्ति हि सामान्यान्यर्थे समवायधर्माणि तानि सहोत्पादेनास्य समवयन्तीति समयः । तद्व्यतिक्रमेण तस्य पश्चादप्यविशेषात् न तत्समवायः स्यात् । तत्संबन्धिस्वभाववैगुण्याद्धि स तस्य प्राङ्नासीत् । तत्रैव चास्य स्वभावे स्थितश्च(स्य) पश्चाद्भवतीति दुरन्वयमेतत् ॥

क्रियोपकारापेक्षस्य व्यञ्जकत्वेऽविकारिणः ॥१६३॥

नो(ना)पेक्षातिशयेऽप्यस्य क्षणिकत्वात् क्रिया कुतः ।

कर्मोपकारकमपेक्ष्य[१] पाचकत्वं द्रव्येण व्यज्यत इति चेत् । स्थिरस्वभावस्यानतिशयादविशेषाधायिनि कापेक्षा ? अतिशये वा क्षणिकत्वात् कर्मणः प्रतिक्षणं स्वभावभूतस्यान्यान्यस्यातिशयोत्पत्तेस्तदपि क्षणिकं स्यात् । ततः स्वोत्पत्तिस्थानविनाशिनः क्रिया कुतो यदपेक्षं व्यञ्जकं स्यात् ॥

कथं तर्हीदानीमसत्यभिन्ने वस्तुनि ज्ञानशब्दयोरन्वयिनोर्वृत्तिः ? यथा पाचकादिषु । ननु तदेव चिन्त्यते कथं तेष्वपीति । चिन्तितमेतत् यथा तेषु न संभवतीति । तत् किमिदानीमनिमित्ते ते स्याताम् ? नाऽनिमित्ते । किं तर्हि ? न बाह्यतत्त्वनिमित्ते । यथास्वं वासनाप्रबोधाद्विकल्पोत्पत्तिः । ततः शब्दाः । न पुनर्विकल्पाभिधानयोर्वस्तुसत्ता समाश्रय इत्युक्तप्रायमेतत् । यथास्वं समयवासनावशाद्विरोधे(धि)रूपसमावेशेनाऽपरापरदर्शनेऽप्यन्वयिनोस्तयोर्दर्शनात् । न च तत्र तन्निबन्धनः कश्चित् स्वभावोऽस्ति परस्परविरोधिनोर्युगपदेकत्र समावेशायोगात् । अनियमेन तर्हि स्यात । न ह्यनिमित्तं भवत् क्वचिद् भवति क्वचिन्न भवतीति नियममर्हति । न खलु वैतदनिमित्तं वासनाविशेषनिमित्तत्वात् । बाह्यं तु तथाभूतं दृश्यं नास्तीति ब्रूमः । न चासति तस्मिन्न भवितव्यम्, सुप्ततैमिरिकोपलब्धेष्वर्थेषु, अभावेषु च समयवासनारोपितरूपविशेषेषु च तथा विकल्पोत्पत्तेः । न च तेऽसत्सूत्पद्यन्त इति सर्वत्र सर्वाकाराः, विभागेनैव तथोपलब्धानां विकल्पनात् । उक्तं चात्र किंचिदस्माभिः—प्रकृत्याऽपि केचिदेकज्ञानकार्याः स्वभावभेदादिति ।

---

[१] कर्मोपकारम०—क०

अपि च—

तुल्ये भेदे यया जातिः प्रत्यासत्त्या प्रसर्पति ॥१६४॥

क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम् ।

[१]इत्यन्तरश्लोकः ॥

न निर्वृत्तिं विहायास्ति यदि भावान्वयोऽपरः ॥१६५॥

एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदतः ।

यद्येते भावा व्यावृत्तिं मुक्त्वा स्वभावेन केनचिदन्वयिना शून्याः, नैषां बहूनामेकं कार्यं स्यात् । यो हि तस्य स्वभावो जनको न हि सोऽन्यस्यास्ति । योऽस्ति [न] स जनकः व्यतिरेकस्य निःस्वभावत्वात् । यज्जनकं तदेव वस्तु । तज्जनकं चापरत्र नास्तीति नापरं जनयेत् । [२]न हि तस्य स्वभावो यो जनकः सोऽन्यस्यापि । यदि स्यात् सतो नि(स तेन) स्वभावेन ततोऽभिन्नः स्यादित्यस्ति स्वभावान्वयः ॥

यद्येकात्मतयाऽनेकः कार्यस्यैकस्य कारकः ॥१६६॥

आत्मैकत्मा(त्रा)पि सोऽस्तीति व्यर्थाः स्युः सहकारिणः ।

यद्येकस्वभावत्वादनेक एकस्य कारकः, स तेषामभिन्नः स्वभाव एकसंनिधानेऽप्यस्तीत्यवैकल्यात् कारणस्यैकोऽपि जनकः स्यात् ॥

यस्मात्—

नापैत्यभिन्नं तद्रूपं विशेषाः खल्वपायिनः ॥१६७॥

न हि तस्याभिन्नस्य स्वभावस्यार्थान्तरे विशेषोऽस्ति, विशेषे वाऽभेदहानेः । स च तत्राप्यस्तीति नैकस्थितावपि तस्या[पा]योऽस्ति । ये तु विशेषास्तेषां सहस्थितिनियमाभावात् स्यादपायः । न च ते जनका इष्टाः । सहकारिणामेकस्वभावतया जनकत्वाभ्युपगमात् । ततो जनकस्य स्थानाद्, अस्था[19b]यिनश्चाजनकत्वादेकस्थितावपि कार्योत्पत्तिः स्यात् । न च भवति ॥

[३]अतः —

एकापाये फलाभावाद्विशेषेभ्यस्तदुद्भवः ।

तत्कार्यमनेकसहकारिसाधारणमेकविशेषापायेऽपि न भवति । पुनरविकलेषु सर्वेषु विशेषेषु भवति । न त्वविकलेष्वभिन्ने रूपे । कार्यं हि कुतश्चिद्भावधर्मि यन्न भवति तत्तस्य वैकल्यात् । न चाऽभिन्नस्य रूपस्यैकस्थितावपि वैकल्यमस्ति, अविकलेऽपि तस्मिन्नभवत्तस्याजनकात्मतां सूचयति । यत्साकल्यवैकल्याभ्यां च भावाभाववत् तत एवोत्पत्तिस्तस्मिन् सति

---

[१] इति संग्रहश्लोकः—क०

[२] स हि—क० [३] ततः—क०

नियमेन भवतः । ततस्त[दन्य]स्मादुत्पत्तिकल्पनायामतिप्रसङ्गात् । तस्माद्विशेषा जनका न सामान्यम् । [1]अतस्त एव वस्तु ॥

यस्मात्—

स पारमार्थिको भावो य एवार्थक्रियाक्षमः ॥१६८॥

इदमेव हि वस्त्ववस्तुनोर्लक्षणं यदर्थक्रियायोग्यतायोग्यता चेति वक्ष्यामः ॥

स च

अर्थक्रियायोग्योऽर्थो

नान्वेति योन्वेति न तस्मात् कार्यसंभवः ।

तस्मात् सर्वं सामान्यमनर्थक्रियायोग्यत्वादवस्तु । वस्तु तु विशेष एव, तत एव तन्निष्पत्तेः ॥

स्वभावानन्वयात्तर्ह्येकस्य जनकं रूपमन्यस्य नास्तीत्यजनकः स्यात् । जनकत्वे वा भेदाविशेषात् सर्वो जनकः स्यात् । नैतदस्ति । यस्मात्—

तेनात्मना [2]भिन्नमपि हेतुः कश्चिन्न चापरः ॥१६९॥
स्वभावोऽयम्

एकस्य जनकादात्मनो भिद्यमानाः सर्वे समं जनका न वा कश्चिदिति स्यादेतत् यद्येषां न विशेषः संभवेत् । ततो भेदाविशेषेऽपि कुतश्चिदात्मातिशयात् कश्चिज्जनको नापरः । स हि तस्य स्वभावो, नापरस्य । न [हि स्व]भावो भावानां पर्यनुयोगमर्हति—'किमग्निर्दहत्युष्णो वा नोदकम्' इति । एतावत्तु स्यात्—कुतोऽयं स्वभाव इति । निर्हेतुकत्वेऽनपेक्षिणो नियमाभावेनातिप्रसङ्गात् । तस्मात् स्वभावोऽस्य स्वहेतोरित्युच्यते । तस्यापि तज्जननात्मता तदन्यस्मादित्यनादिहेतुपरम्परा । भिन्नानां हि कश्चिद्धेतुर्नान्यः, स्वभावादित्यत्र न किंचिद्बाधकम् ।

अभेदे तु स्यातां नाशोद्भवौ सकृत् ।

अभेदात् स्वभावेनैव विश्वस्य स्वात्मवत् विभागोत्पत्तिस्थितिनिरोधादयो न स्युः, तथोपलक्षणादभेदस्य । इदमेव हि भेदाभेदयोर्लक्षणम्—एकाकारस्यापि व्यतिरेकोऽव्यतिरेकश्च, विरोधिनोरेकात्मन्यसंभवात् ॥

भेदोऽपि तेन नैवं चेत्

---

[1] ततस्त—**क०**

[2] तेनात्मनापि भेदे हि हे०—**म०**; तेनात्मना हि भेदेपि हे०—**क०** ।

न वै सर्वाकाराऽव्यतिरेकं ब्रूमो येनैवं स्यात् । कश्चिदस्यात्मा भिन्नोन्या(न्नो नाऽ)न्य इति भेदान्न सहोत्पत्त्यादयः ॥

एवं तर्हि

य एकस्मिन् विनश्यति ॥१७०॥

तिष्ठत्यात्मा न

स

तस्य

भेदः । स्थानास्थानयोरेकात्माश्रयत्वे कोऽन्यो धर्मो भेदक इति नानात्वमेव क्वचिन्न स्यात् । सर्वाकारविवेकाविवेकिनोवा(र्वाऽ)र्थयोरभ्युपगमान्नाम केवलं नेष्टं स्यात्, न [1]वस्त्वित्युक्तम् । तदिमे नैकयोगक्षेमा भावाः भिन्ना एव ।

अतो न स्यात् सामान्यभेदधीः ।

तदिदमर्थान्तरमनायत्तमजन्यत्वाद्—अस्येदं सामान्यं भेदो वेति व्यपदेशं नार्हति ॥

अन्यापोहेऽप्येष तुल्यः प्रसङ्ग इति चेत् । न तुल्यो यतो

निवृत्तेर्निःस्वभावत्वान्नास्थानस्थानकल्पना[2] ॥१७१॥

न ह्यन्यापोहो नाम किंचित् । तस्य च स्वभावानुषङ्गिण्यः [3]स्वभावस्थितिप्रच्युतिकल्पना न कल्पन्ते ।

उपप्लवश्च सामान्यधियस्तेनाप्यदूषणा ।

निर्विषयमेव खल्विदं मिथ्याज्ञानं यदनेकत्रैकाकारमिति न तद्विषयस्याभावात् स्थितिरस्थितिर्वा ।

यदुत्पु(यत्पु)नरेतदुक्तं तज्जनको हि स तस्य स्वभाव —

यत्तस्य जनकं रूपं ततोऽन्यो जनकः कथम् ॥१७२॥

इति । तत्र न ब्रूमोऽन्यस्य तज्जनकं रूपं नास्तीति । किं तर्हि ? यदेकस्य तज्जनकं तदन्यस्य नेति । अन्योऽपि स्वरूपेणैव जनको न पररूपेणातत्त्वात् । ते यथा[20a]स्वं भिन्नाश्च तज्जनकाश्च स्वभावेनेति कोऽत्र विरोधः ? एकरूपविकलस्तु तद्रूपो न स्यात्, नातत्कार्यः । तेनैव च तत्कार्यं कर्त्तव्यमिति कोऽत्र न्यायः ?

---

[1] न तु वस्तु—क०

[2] त्वान्न स्थानास्था०—क० म०

[3] स्वरूप—क०

अपि च ।

भिन्ना विशेष(षाः) जनकाः

इत्युक्तम् । न च ते विशेषास्तेनात्मना परस्परमनुयन्ति । यदेकस्य जनकं रूपमन्यस्य तन्नास्ति । न च तावताऽजनकाः ॥

अस्त्यभेदोपि तेषु चेत् ।

स्यादेतत्—सत्यं विशेषा जनकाः । न पुनस्तेषां विशिष्टमेव रूपम्, किं त्वभिन्नमपि । तदेकशक्तियोगाज्जनकाः ।

तेन तेऽजनकाः प्रोक्ताः

सत्यपि सामान्ये रूपे न तेन ते जनकाः, तस्य अनपायादेकस्थितावपि कार्योत्पत्ति-प्रसङ्गादित्युक्तं प्राक ॥

किं च—

प्रतिभासोऽपि भेदकः ॥१७३॥

अनन्यभाक्

उत्पत्तिस्थितिविनाशादिभेदश्चेत्यपिशब्दात् । योऽयमभिन्नान् सर्वार्थान् मन्यते तस्यायमर्थेषु बुद्धिप्रतिभासभेदो विरुद्धधर्माध्यासश्च न स्यात् । सति वा तस्मिन्नभेदेऽपि न कश्चिद्भेदः स्यात् । तथा चायं प्रविभागो न स्यादेकात्मवत् । तस्मादयं भिन्नप्रतिभासादिर्विशेष एव । न चात्रापरमभिन्नं प्रतिभासं पश्यामो यद्बलेनाभेदः(द)प्रतीतिः स्यात् । अतो विशेष एव ।

स एवार्थस्तस्य व्यावृत्तयोऽपरे ।
तत् कार्यं कारणं चोक्तं तत् स्वलक्षणमिष्यते ॥१७४॥

तत्त्यागाप्तिफलाः सर्वाः पुरुषाणां प्रवृत्तयः ।

यदर्थक्रियाकारि तदेव वस्त्वित्युक्तम् । स च विशेष एव । यत् पुनरेतत् सामान्यं नाम तत्तस्यैवापरस्माद्भेदः । न हि तस्यार्थत्वे दृश्यस्य रूपानुपलक्षणं युक्तम्, तदुपलक्षणकृतत्वा[द्] भेदेष्वभिन्नप्रत्यय य ॥

अपि च ।

यथाऽभेदाऽविशेषेऽपि न सर्वं सर्वसाधनः(नम्) ॥१७५॥
तथा भेदाऽविशेषेऽपि न सर्वं सर्वसाधनम् ।

यदुक्तम्—कथं तज्जनकस्वभावाद्भिन्नोऽस्य जनकः स्यात् ? जनकत्वे वाऽविशेषात् सर्वो जनकः स्यादिति । उक्तमत्र—यद्यविशेषः स्यात् स्यादेतदिति । यथा चास्य स्वयमभेदवादिनोऽभेदाविशेषेऽपि न सर्वः सर्वस्य जनकस्तथा भेदाविशेषेऽपि भविष्यति ॥

अथवा

भेदे हि कारकं किंचिद्वस्तुधर्मतया भवेत् ॥१७६॥
अभेदे तु विरुध्येते तस्यैकस्य क्रियाक्रियौ (ये) ।

भेदमात्राविशेषेऽपि स्वहेतुप्रत्ययनियमितस्वभावत्वात् केचिदेव कारकाः स्युर्नान्ये तत्स्वभावत्वादित्यत्र नैवं किंचिद्विरुद्धमस्ति । एकत्वे तु तस्य तत्रैव तथा कारकत्वमकारकत्वं चेति व्याहतमेतत् ॥

[1]भेदोऽप्यस्त्यक्रियातश्चेन्न कुर्युः सहकारिणः ॥१७७॥

न वै सर्वाकाराऽविवेकं ब्रूमो भेदस्यापि भावात् । तस्मात् कश्चिदकारकोऽपीति । तथापि कथंचित् भेदात् सहकारिणोऽकारकाः स्युः ॥

पर्यायेणाथ कर्तृत्वं स किं तस्यैव वस्तुनः ।

अथापि स्यात्—नैव कश्चिदकारकोऽस्ति । सर्वेषां सर्वत्र पर्यायेणोपयोगात्, शक्तेर्वा विपरिणतायास्तन्निवेशिन्याः रूपान्तरेणोपयोगादिति । स एव खल्वयं पर्यायो भेदाश्रयः एकस्य कथम् ? परिणामो वाऽव्यतिरेकिण्याः ? विशेषे वा कथंचिदेकत्वहानिरिति यत् किंचिदेतत् ॥

किं च—

अत्यन्तभेदाभेदौ हि स्यातां तद्वति वस्तुनि ॥१७८॥
अन्योन्यं वा तयोर्भेदः सदृशासदृशात्मनोः ।

भावाश्चेदभिन्नेनात्मना स्वात्मभूतेन भेदिनः तद्वन्तः स्युस्तदभिन्नस्वभावात्मत्वाद्भेदस्यापि कुतः परस्परं भेदः ? अथ न स तस्य समान आत्मा । तथा तदात्मना तेनापि न तथा युक्तं भवितुम् । तथाभावे ह्यतद्धर्मा स्यात् । न ह्ययं प्रवृत्तिनिवृत्तिमान् स्वभाव एको युक्तिः (क्तः) ॥

न सर्वात्मनाऽभेद एव

तयोरपि भवेद्भेदो यदि

न हि क्वचिदस्यैकान्तिको भेदोऽभेदो वा, विवेकेन व्यवस्थापनात्—सामान्यं विशेष इति[20b] ।

येनात्मा तयोः ॥१७९॥
भेदः सामान्यमित्येतद्यदि भेदस्तदात्मना ।
भेद एव

यदि सामान्यविशेषयोर्यमात्मानमाश्रित्य सामान्यं विशेष इति स्थितिस्तेनात्मना भेदस्तदा

---

[1] भदश्चेदक्रियाहेतुर्न कुर्युः सहकारिणः—क०

भेद एव। यस्मात्तौ हि तयोः स्वात्मानौ। तौ चेद्व्यतिरेकिणौ व्यतिरेक एव सामान्यविशेषयोः, स्वभावभेदात्। स्वभावो हि भाव इति।

तथा च स्यान्निःसामान्यविशेषता ॥१८०॥
भेदसामान्ययोर्यद्वद् घटादीनां परस्परम्।

व्यतिरेके च भेदसामान्ययोर्न भेदः सामान्यवान्, न सामान्यं भेदवत्, संबन्धाभावात् परस्परं घटादिवदित्युक्तम्॥

अपि च—

यमात्मानं पुरस्कृत्य पुरुषोऽयं प्रवर्त्तते १८१॥
तत्साध्यफलवाञ्छावान् भेदाभेदौ तदाश्रयौ।
चिन्त्येते स्वात्मना भेदो व्यावृत्त्या च समानता ॥१८२॥
अस्त्येव वस्तु नान्वेति प्रवृत्त्यादिप्रसङ्गतः।

सर्व एव गौरश्वाद्भिन्नोऽभिन्नो वेति भेदमभेदं वा पृच्छन् विशेषमेव भावस्य स्वभावाख्यमधिकृत्य प्रवर्त्तते। स एव हि तथोच्यते। द्रव्यत्वादयस्तु न तत्र शब्दचोदिताः, यथास्वं पृथगभिधानात्। अर्थस्य तदव्यभिचारात्ततो गतिः स्यात्। निर्लोठितं चैतद् आचार्येण।

तदयं गवादिशब्दप्रत्युपस्थापितमर्थं भिन्नमभिन्नं वा पृच्छन्नर्थान्तरोपक्षेपेण तत्र किमिति द्विमुखबुद्धिः क्रियते? तस्माद्योऽस्यात्माऽन्यसाधारणो यं पुरस्कृत्य पुरुषो विशिष्टार्थक्रियार्थी प्रवर्त्तते, यथा गोर्वाहदोहादौ, नान्यसंभविनोऽर्थस्य, यथा युद्धप्रवेशः, स एव स्वभावो यथास्वं शब्दचोदितः, न द्रव्यत्वादिसामान्यम्, तच्चोदनया तदा प्राप्तुमनभिप्रेतत्वात्, गवादिसमावेशा[त्], तदात्मभूतानां चानन्वयेन तत्रानुभयरूपत्वात्। तमेव चाय(यं) भावं प्रकारैः पर्यनुयुङ्क्ते। तस्य भेदे द्रव्यत्वाद्यभेदोऽस्याबाधक एव। सर्वत्र स्वभाव[1] एव भेदस्याभ्युपगमात्, सामान्यस्य च व्यावृत्तिलक्षणस्य। स्वभावभूतस्य च सामान्याभेदेऽप्युक्तम्। स्वात्मनैवाभेदे तु तत्स्वभावनिबन्धनार्थक्रियार्थी समं द्वयोरपि प्रवर्त्तेत। एकोऽपि तामर्थक्रियां तत्स्वभावत्वादेव करोति, तदन्य[स्य]ापि तत्तुल्यमपि(ल्यमिति) सोऽपि किन्न करोति?

एतेनैव यदह्रीकाः किमप्यश्लीलमाकुलम् ॥१८३॥
प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसंभवात्।

यदयमह्रीकः—स्यादुष्ट्रो दधि स्यान्नेति किमप्यश्लीलमयुक्तमहेयोपादेयमपरिनिष्ठानादाकुलं प्रलपति, तदप्यनेन निरस्तं स्वभावेनैकान्तभेदात्॥

तदन्वये वा

सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ॥१८४॥

---

[1] स्वभावेन—क०

चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ।

तथा ह्युष्ट्रोऽपि स्याद् दधि नापि स एवोष्ट्रो येनान्योऽपि स्यादुष्ट्रः। तथा दध्यपि स्यादुष्ट्रः। नापि तदेव दधि येनान्यदपि स्याद् दधि। तदनयोरेकस्यापि कस्यचित्तद्रूपाभावस्याभावात्, स्वरूपस्य वा तद्भाविनः स्वनियतस्याभावात् न कश्चिद्विशेष इति दधि खादेति चोदित उष्ट्रमपि खादेत ॥

अथास्त्यतिशयः कश्चिद्येन भेदेन वर्त्तते ॥१८५॥

स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम ।

अथानयोः कश्चिदतिशयोऽस्ति येनायं तथा चोदितः क्षीरविकार एव प्रवर्त्तते, नान्यत्र। स एवातिशयोऽर्थक्रियार्थिप्रवृत्तिविषयो दधि। तत्फलविशेषोपादानभावलक्षितस्वभावं हि वस्तु दधीति। स च तादृशः स्वभावोऽन्यत्र नास्तीति प्रवृत्त्यभावादर्थिनः। तस्मात्तन्नोभयरूपमित्येकान्तवादः ॥

अपि च

सर्वात्मत्वे च सर्वेषां भिन्नौ स्यातां न धीध्वनी ॥१८६॥

भेदसंहारवादस्य [1]तदभावादसंभवः ।

सोऽयमह्रीकः क्वचिदप्येकमाकारं प्रतिनियतमपश्यन् [21a] विभागाभावाद्भावानां कथमसंसृष्टाऽन्याकारवत्या बुद्ध्याऽधिमुच्येतार्थानभिलपेद्वा ? ततो भेदाग्रहात् तत्संहारवादो न स्यात्—स्यादुष्ट्रो दधि स्यान्नेति।

अथ पुनरसंसृष्टावाकारौ प्रतिपद्य संहरेद्। एकरूपसंसर्गिण्या बुद्धेः क्वचित् प्रतिनियमात्तत्प्रतिभासकृत एतयोः रूपयोः स्वभावभेदोऽपि स्यात्, एकानेकव्यवस्थितेः प्रतिभासविषयत्वात्। तथा च नैकस्तदुभयरूपः स्यादिति मिथ्यावाद एषः।

स्थितमेतन्न भावानां कश्चित् स्वभावान्वयोऽस्ति। भेदलक्षणमेव तु सामान्यम्। अथ च प्रकृत्या केचिदेकज्ञानादिफलाः केचिन्नेति।

भवतु नाम भावानां स्वभावभेदः सामान्यम्। येषां तु निरुपाख्यानां स्वभाव एव नास्ति तत्र कथं स्वभावभेदविषयाः शब्दाः ? तेष्ववश्यं शब्दप्रवृत्त्या भाव्यम्, कथंचिदव्यवस्थापितेषु विधिप्रतिषेधायोगात्। तथा च सर्वत्रायमन्वयव्यतिरेकाश्रयो व्यवहारो न स्याद्—उष्णस्वभावोऽग्निर्नानुष्ण इत्यपि, स्वभावान्तरस्यासतः कथंचिदव्यवस्थापनात् सर्वथाऽप्रतिपत्तेरग्निस्वभावस्याप्रतिपत्तिरिति व्यामूढं जगत् स्यात्।

स्यादेतत्—न तत्र कस्यचिदसतो निषेधः। अनुष्णं सदेवार्थान्तरं निषिध्यत इति। कथमिदानीं सदसन्नाम ? न ब्रूमः सर्वत्रासत्। तत्र नास्तीति देशकालधर्मनिषेध एव सर्वत्र भावेषु

---

[1] तदभेदाद—म०

क्रियते, न धर्मिणः । तन्निषेधे तद्विषयशब्दप्रवृत्त्यभावात् । अनिर्दिष्टविषयस्य नञोऽप्रयोगात् । सोऽपि तर्हि देशादिप्रतिषेधः कथम् ? यस्मात्तत्रापि न देशादीनां प्रतिषेधो नाप्यर्थस्य ।

संबन्धो निषिध्यत इति चेत् । ननु तन्निषेधेऽपि तुल्यो दोषोऽनिषेधाद् असति शब्दाऽप्रवृत्तिरित्यादि । असतो वास्य निषेधे तद्धर्मिणोऽपि निषेधः । न वै संबन्धस्य 'नास्तीति' निषेधः । किं तर्हि ? नेह घटो नेदानीं नैवमित्युक्तौ नानेन संबंधोऽस्ति, नैतद्धर्मा वेति प्रतीतिः । तथा च संबन्धो निषिद्धो भवति । तथापि कथं निषेधो यावदस्य संबन्धो धर्मो वा नास्तीति मतिर्न भवति । न चास्याः कथंचिद्भावे संभवः, अभावेषु तथा भावात् । तस्मात् संबन्धाभावप्रतीतेः—नायमिहेत्याद्या प्रतीतिः स्यात् । तदभावे न स्यात् । प्रतीतौ वा तदभावस्य यथाप्रतीतिमतस्तत्प्रभवाः शब्दाः केन निवार्यन्ते ? स एव हि शब्दानां न विषयो यो न वितर्काणाम् । ते चेत् प्रवृत्ताः को वचनस्य निषेद्धा ?

न ह्यवाच्यमर्थं बुद्धयः समीहन्ते । संबन्धस्य तु स्वरूपेणानभिधानमुक्तम्, अभिधाने संबन्धित्वेन बुद्धावुपस्थानात् यथाभिप्रायमप्रतीतिः । तदयं प्रतीयमानोऽपि संबन्धिरूप एवेति स्वरूपेण नाभिधीयते । तस्मान्न(न्नाऽ)भाववत् संबन्धेऽपि प्रसङ्गः ।

अपि चायमभावमभिधेयं ब्रुवाणं प्रति प्रतिविदधद(धन्न)ब्रुवाणः कथं प्रतिविदध्यात् ? वचने चास्य कथमभावोऽनुक्तः ? अथाभावमेव नेच्छेत् तेनावचनम् । तदेवेदानीं कथमभावो नास्तीति ? यत् पुनरेतद् 'अर्थनिषेधेऽनर्थकशब्दाप्रयोगात् निर्विषयस्य नञोऽप्रयोगः' इत्यत्रोत्तरं वक्ष्यते । तस्मात् सन्त्यभावेऽपि शब्दाः ॥

तेषु कथं स्वभावभेद इति ? तत्रापि

[१]रूपाभावादभावस्य शब्दा रूपाभिधायिनः ॥१८७॥

नाशङ्क्या एव सिद्धास्ते व्यवच्छेदस्य वाचकाः ।

वस्तुवृत्तीनां शब्दानां किं रूपमभिधेयमाहोस्विद्भेद इति शङ्काऽपि स्यात् । अभावस्तु विवेकलक्षण एव, निमित्तीकर्तव्यस्य कस्यचिद्रूपस्याभावात् । तद(द्)भावेऽभावायो[21b]-गात्, तद्भावलक्षणत्वाद्भावस्य । तस्मादयमेव स मुख्यो विवेकः । तस्य तथाख्यायिनः शब्दाः किं विवेकविषया इत्यस्थानमेवैतदाशङ्कायाः ।

तस्मात् सिद्धमेतत्—सर्वे शब्दाः विवेकविषयाः विकल्पात(ल्पाश्च) । एते एकवस्तु-प्रतिशरणा अपि यथास्वमवधिभेदोपकल्पितैर्भेदैः भिन्नेष्विव प्रतिभात्सु बुद्धौ विवेकेषूपस्थापनाद्भिन्नविषया एव । तेन स्वभावस्यैव साध्यसाधनभावेऽपि न साध्यसाधनसंसर्गः ।

तन्न प्रतिज्ञार्थैकदेशहेतुरिति ॥

स चायं हेतुत्वेनापदिश्यमानः

उपाधिभेदापेक्षो वा स्वभावः केवलोऽथवा ॥१८८॥

---

[१] द्रव्याभा०—म०

उच्यते साध्यसिद्धयर्थं नाशे कार्यत्वसत्त्ववत् ।

अपेक्षितपरव्यापारो हि स्वभावनिष्पत्तौ भावः कृतकः । तेनेयं कृतकश्रुतिः स्वभावाभिधायिन्यपि परोपाधिमेनमाक्षिपति ।

एतेन प्रत्ययभेदभेदित्वादयो व्याख्याताः ।

एवमुपाधिभेदापेक्षः क्वचित्तत्स्वभावहेतुरुच्यते । क्वचिदनपेक्ष्य सामान्येन यथा अनित्यत्व एव सत्त्वम् । क्वचित् स्वभावभूतधर्मविशेषपरिग्रहेण यथा तत्रैवोत्पत्तिः । अनया दिशाऽन्येऽपि स्वभावहेतुप्रविभागा द्रष्टव्याः ॥

सत्तास्वभावो हेतुश्चेन्न सत्ता साध्यते कथम् ॥१८९॥

अनन्वयो हि भेदानां व्याहतो हेतुसाध्ययोः ।

यदि सत्त्वमनित्यत्वेऽन्यत्र वा हेतुः स्यात् साध्यमपि कस्मान्नेष्यते ? तत् किलैवं प्रसाध्यमानं विशेषीभवतीति । न च विशेषः साधयितुं शक्यतेऽनन्वयात् । यथाह— "प्रमाणविषयाज्ञानात्" इति । सोऽयं विशेषो न साध्य एव व्याहन्यते । किं तर्हि ? हेतावपि तुल्यदोषत्वात् । न हि हेतुरनन्वयः सिद्धेरङ्गम्, ततः संशयात् ॥

नैष दोषो यस्मात् ।

[१]भावोपाधानमात्रे तु साध्ये सामान्यधर्मिणि ॥१९०॥

न कश्चिदर्थः सिद्धः स्यात् अनिषिद्धं च तादृशम् ।

न सर्वथा सत्तासाधने विशेषः साधितो भवति । भावमात्रविशेषणोऽस्ति कश्चिद्धर्मीति प्रसाधयतोऽनिर्दिष्टस्वभावविशेषस्य कस्यचित् सत्तामात्रे विरोधाभावात् । नेह सत्तासाधनप्रतिषेधः, किन्तु सर्वथास्ति कश्चिदिति कंचनाऽस्य भेदमपरामृशन् ब्रुवाणः कं स्वार्थं पुष्णाति ? तस्मादनेनोपात्तभेद एव साध्यः ।

उपात्तभेदे साध्येऽस्मिन् भवेद्धेतुरनन्वयः ॥१९१॥

सत्तायां तेन साध्यायां विशेषः साधितो भवेत् ।

स हि धर्मी प्रधानलक्षण एको नित्यः सुखाद्यात्मकोऽन्यो वेति यथा कथंचिदपि विशेषितस्तत्तत्स्वभावः साधितो भवति । स च तथा नान्वेति : यदपि सत्तामात्रमन्वेति न तेन सिद्धेन किंचित् । नन्वेवमग्न्यादिष्वपि प्रसङ्गः । तत्रापि नाग्निसत्तामात्रे कश्चिद्विवादः । विशिष्टाधारविशेषणस्य त्वभिमतस्याऽनन्वयादसिद्धिः । न सैव(न वै स) आधारस्तं विशेषीकरोति । तदयोगव्यवच्छेदेन विशेषणादित्युक्तम्, वक्ष्यते च ।

तस्मात्तत्र सामान्यमेव साध्यते तदयोगव्यवच्छेदेन । न तथेहापि क्वचित् सत्तायाः साधकं प्रधानादिशब्दवाच्यस्यैवार्थस्य क्वचिदभावात् । निर्विशेषणैव सा । कथमभावः ?

---

[१] भावोपादान—क० म०

ज्ञेयाभिधेयप्रमेयत्वैः सोऽपि सिद्ध एव प्रधानार्थः । तत् किमिदानीं ज्ञेयमस्तीति सिद्धिरस्तु ? तथापि किं सिद्धं स्यात् ? अन्यत्र तु तदेवाग्निसामान्यं तत्रासिद्धमिति साध्यते । ननु तत्रापि तदयोगविरहिणा सामान्येनान्वयो न सिद्ध एव । न वै कश्चित्तथाभूतेनार्थेनाऽन्वयं करोति । प्रतिपादयता हि परं धूमोऽग्निनान्तरीयको दर्शनीयः—यत्र धू[22a]मस्तत्राग्निरिति । स तथाग्निमात्रेण व्याप्तः सिद्धो यत्रैव स्वयं दृश्यते तत्रैवाग्निबुद्धिं जनयति । तत्र साध्ये(ध्य)-[निर्देशे]न न किंचित् । तत्र दर्शन[ात्] संबन्धाख्यानमात्रादि(त्राच्चे)ष्टसिद्धेस्तदनिर्देशे कथं तद्विशिष्टे नान्वयः । तदयमग्न्यविनाभावी सिद्धोऽर्थादेवाग्नेस्तत्प्रदेशायोगं व्यवच्छिनत्तीति स तथा साध्य उच्यते । न पुनस्तथास्योपन्यासपूर्वकोन्वयः, साध्योक्तेरिहानङ्गत्वात् । तत्पूर्वकत्वे वा कः प्रतिज्ञां साधनादपाकरोति ? तथा चाह[1]—

"लिङ्गस्याव्यभिचारस्तु धर्मेणान्यत्र दर्श्यते ।
तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥"

तस्मान्नाग्न्यादिसाधनवत् सत्तासाधनमप्यनवद्यमिति ॥

अपरामृष्टतद्भेदे वस्तुमात्रे [तु] साधने ॥१९२॥
तन्मात्रव्यापिनः साध्यस्यान्वयो न विहन्यते ।

साधने पुनः सत्त्वे स्वभावविशेषाऽपरिग्रहेण वस्तुमात्रव्यपिनि साध्यधर्मे नान्वय-व्याघातः । न हि तत्रावश्यं विशेषपरिग्रहः कार्यः । [2]तन्मात्राश्रयेऽपि साधनसामर्थ्यात्, न साध्यत्वे, वैफल्यात् ॥

अपि च—

नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः ॥१९३॥
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ।

सत्तायां हि साध्यायां सर्वस्तद्धेतुर्न त्रयीं दोषजातिमतिवर्त्तते—असिद्धं व्यभिचारं विरोधं च । तत्र यदि भावधर्मो हेतुरुच्यते, स कथमसिद्धसत्ताके स्यात् । यो हि भावधर्मं तत्रेच्छति स कथं तं भावं नेच्छेत् । स्वभाव एव हि कयाचिदपेक्षया धर्म इति व्यतिरेकीव धर्मिणो निर्दिश्यते । न हि धर्मधर्मिवाचिनोः शब्दयोर्वाच्ये कश्चिद्विशेषोऽस्तीत्युक्तमेतत् ।

अथ पुनरुभयधर्मं ब्रूयादनाश्रितवस्तुनोऽपर्युदासेन व्यतिरेकमात्रस्याभावेऽप्यविरोधात् । यथा न भवति मूर्त्त इत्यमूर्त्तत्वं निरुपाख्येऽपि स्यात् । निरुपाख्यस्याभावात् न प्रतिषेधविषयतेति चेत् । तत् किमिदानीं विधिविषयोऽस्तु ? तदपि नेति चेत् । कथमिदानीं न प्रतिषेध-विषयः, विधिनिमित्त(निवृत्ति)रूपत्वात् प्रतिषेधस्य ? तदेतद्व्यवच्छेदमात्रं द्वयोरपि संभवद्विपक्ष-प्रचाराशङ्काविच्छेदेन लभ्यं गमकत्वं कथमात्मसात् कुर्यात् ? स च स्वयं स्ववाचा उभयधर्मतां ब्रुवाणः सतोऽन्यत्राप्यस्य वृत्तिं भाषते, सत्तायां वाऽव्यभिचारमिति कथं नोन्मत्तः ?

---

[1] दिङ्नाग इति कर्णगोमी ।   [2] सन्मात्रा०—क०

अभावधर्मं तु भावमात्रव्यपिनोऽर्थस्य व्यवच्छेदं हेतुं सत्तायां वदतोऽस्य विरुद्धो हेतुः स्यात्, तस्य भावे क्वचिदसंभवात्, अभाव एव भावव्यवच्छेदस्य भावात् ।

तदयं त्रिप्रकारोऽपि धर्मः सत्तासाधने न हेतुलक्षणभाक् । न चान्या गतिरस्ति । तस्मान्न सत्ता साध्यते । साधनत्वे पुनरस्याः सामान्येन तन्मात्रव्यापिनि वस्तुधर्मे सिद्धसत्ताके धर्मिणि नासिद्धिः । तेन च साध्यधर्मेण व्याप्तिर्यदि कथंचिन्निश्चीयेत न विरोधव्यभिचाराविति नायं प्रसङ्गः । अनिश्चितायां तु व्याप्तौ धर्मिसमाश्रये वा तत्स्वभावतया गमको न कश्चिद् गमकः स्यात् ॥

अत एव स्वधर्मेण व्याप्तः

सिद्धः स्वभावो गमको

वाच्यः । न हि प्रकाशतया प्रकाशयन् प्रदीपस्तद्रूपाप्रतिपत्तौ स्वामर्थक्रियां करोति ।

व्यापकस्तस्य निश्चितः ॥१९४॥

गम्यः स्वभावः

तद्धर्मनिश्चयादेव निश्चितो व्यापकत्वेन तस्य धर्मिणो धर्मो गम्यः ।

तस्यायं निवृत्तौ वा निवर्त्तकः ।

तस्य व्याप्यस्य धर्मस्यायं निवर्त्तको व्यापकधर्मः स्वयं निवर्त्तमानः । एवं ह्ययमस्य व्यापकः सिद्धो भवति यद्यस्याऽभावे न भवेत् ।

तदनेन द्विविधस्यापि साधनप्रयोगस्य गमकतालक्षणमुक्तं वेदितव्यम् । द्विविधो हि प्रयोगः साधर्म्येण वैधर्म्येण च यथाहुरन्ये—अन्वयी व्यतिरेकी [22b]चेति । नानयोर्वस्तुतः कश्चिद्भेदोऽस्त्यन्यत्र प्रयोगभेदात् । साधर्म्येणापि हि प्रयोगेर्थाद्वैधर्म्यगतिः । असति तस्मिन् साध्येन हेतोरन्वयाऽभावात् । तथा वैधर्म्येऽप्यन्वयगतिरसति तस्मिन् साध्याभावे हेत्वभावस्य संदेहादिति विस्तरेण वक्ष्यामः ॥

अनित्यत्वे यथा कार्यमकार्यं वाऽविनाशिनि ॥१९५॥

अनेनोदाहरणमनयोर्दर्शयति । तत्रान्वयी—यत् किंचित् कृतकं तत् सर्वमनित्यं यथा घटादयः । शब्दश्च कृतक इति । कृतकस्याऽनित्यत्वेन व्याप्ति प्रदर्श्य शब्दस्य च कृतकत्वे कथिते सामर्थ्यादेवाऽनित्यः शब्द इति । तस्मान्नावश्यमिह पक्षनिर्देश इत्ययमन्वयिनः प्रयोगः ।

व्यतिरेक्यपि नानित्यत्वाभावे कृतकत्वं भवति । शब्दश्च कृतक इति । सिद्धतत्स्वभावतया तदभावे न भवतः कृतकत्वस्य च भावख्यातौ तदात्मनः सतो भाव इति सामर्थ्यात् सिद्धिः, पूर्ववन्न प्रतिज्ञावचनम् । अन्वयस्त्वर्थापत्त्या सिद्धः । न ह्यतदात्मनियतस्य तन्निवृत्तौ निवृत्तिः । तस्मात्तन्नियमं प्रसाध्य निवृत्तिर्वक्तव्या । सा चेत् सिध्यति, तदात्मनियममर्थादेव [1]सूचयतीति सिद्धोऽन्वयः ॥

---

[1] आक्षिपती०—क०

कथमिदानीं कृतकोऽवश्यमनित्य इति प्रत्येतव्यो येनैवमुच्यते। यस्मात्

अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता।

न हि भावा विनश्यन्तस्तद्भावे हेतुमपेक्षन्ते। स्वहेतोरेव विनश्वराणां भावात्। तस्माद्यः कश्चित् कृतकः स प्रकृत्यैव नश्वरः॥

तथा हि

सापेक्षाणां हि भावानां नावश्यंभावितेक्ष्यते ॥१९६॥

निरपेक्षश्च भावो विनाशे। सापेक्षत्वे हि घटादीनां केषांचिन्नित्यतापि स्यात्। येन

बाहुल्येऽपि हि[1] तद्धेतोर्भवेत् क्वचिदसंभवः।

यद्यपि बहुलं विनाशकारणानि सन्ति तेषामपि हि स्वप्रत्ययाधीनसन्निधित्वान्नावश्यं संनिधानमिति कश्चिन्न विनश्येदपि। न ह्यवश्यं हेतवः फलवन्तस्तेषां वैकल्यप्रतिबन्धसंभवात्॥

एतेन व्यभिचारित्वमुक्तं कार्याऽव्यवस्थितेः ॥१९७॥
सर्वेषां नाशहेतूनां हेतुमन्नाशवादिनाम्।

इत्यन्तरश्लोकः॥

तदयं भावोऽनपेक्षस्तद्भावं प्रति तद्भावनियतः, असंभवत्प्रतिबन्धैव कारणसामग्री सकला कार्योत्पादने।

नन्वनपेक्षिणामपि केषांचित् क्वचिन्नावश्यं तद्भावः, भूमिबीजोदकसामग्र्यामपि कदाचिदङ्कुरानुत्पत्तेः। न। तत्रापि सन्तानपरिणामापेक्षत्वात्। नैवं भावस्य काचिद-पेक्षा। तत्राप्यन्त्या सामग्री याऽव्यवहिता कार्योत्पत्तेः सा फलवत्येव। सैव च तत्राङ्कुरहेतुः, अन्यस्तु पूर्वः परिणामस्तदर्थ एव। न च तां तत्र कश्चित् [2]प्रतिबन्धुं समर्थः, एकत्र भावे विकारानुत्पत्तेः। उत्पत्तौ वैकत्वहानेः। तदात्मनश्चाप्रच्युतस्य तदुत्पादनं प्रति वैगुण्यं कारणस्याकुर्वाणस्य प्रतिबन्धहेतोरप्रतिबन्धकत्वात्।

ननु च यवबीजादयोऽपि शाल्यङ्कुरे जन्ये न सापेक्षाः, तदुत्पत्तिप्रत्ययानां कदाचित्तत्रापि संनिधानात्। कथं न सापेक्षाः? यावता स एवैषां स्वभावो नास्ति यस्तदुत्पादनः शालिबीजस्येति। अतस्तत्स्वभावापेक्षा। एवं तर्हि कृतकानामपि केषांचित् सतां वा स एव स्वभावो नास्ति, यो विनश्वरः। तस्मात्तत्स्वभावापेक्षत्वान्न विनश्वराः। शालिबीजादीनां स स्वभावः स्वहेतोरिति यो न तद्धेतुः सोऽतत्स्वभावः स्यात्। नियतशक्तिश्च स हेतुस्व-रूपेण प्रतीत एव। न च स्वभावनियमो नामाकस्मिको युक्तोऽनपेक्षस्य देशकालद्रव्यनियमाऽ-योगात्। तथाऽत्रापि नियमहेतुर्वक्तव्यो यत इमे केचिदनश्वरात्मानो भावा जाताः। न चात्र कश्चिन्नियामकः स्वभावस्यास्ति।

---

[1] बाहुल्येपि चेत् तस्य—**म०**		[2] प्रतिबद्धुं—**क०**

सर्वजन्मिनां विनाशसिद्धेर्जन्मिस्वभावो नाशीति चेत् । न [23a]वै जन्म नाशिस्वभावस्य हेतुः । न चाऽहेतोः स्वभावनियमः । तस्मान्नात्र कश्चिद्धेतोः स्वभावप्रविभागः । तदभावात् फलस्यापि नास्तीत्यसमानम् ।

सेयं निरपेक्षता विनाशस्य क्वचित् कदाचिच्च भावविरोधिनी तदभावं स्वभावेन साधयति । यो हि भावो निरपेक्षः स यदि कदाचिद्भवेत् क्वचिद्वा तत्कालद्रव्यापेक्ष इति निरपेक्ष एव न स्यादित्युक्तम् । स तर्हि नश्वरः स्वभावो निरपेक्ष इत्यहेतुकः स्यात् । नाहेतुकः, सत्ताहेतोरेव भावात् तथोत्पत्तेः । सतो हि भवतस्तादृशस्यैव भावात् ।

नावश्यं सतः कुतश्चिद्भाव इति चेत् । आकस्मिकी तर्हि सत्तेति । नेयं कस्यचित् कदाचित् क्वचिद्विरमेत् । तद्धि किंचिदुपलीयेत न वा यस्य यत्र किंचित् प्रतिबद्धमप्रतिबद्धं वा । सेयं सत्ताऽप्रतिबन्धिनी चेत् । न नियमवती स्यात् । तस्मान्नेयमाकस्मिकी क्वचित् ।

कथं तर्हीदानीमहेतुको विनाश उक्तः ? जातस्य तद्भावेऽन्याऽनपेक्षणात् । उक्तं चात्र 'न विनाशो नामाऽन्य एव कश्चिद्भावाद्भाव एव हि नाशः । स एव ह्येकक्षणस्थायी जातः' इति । तमस्य मन्दाः स्वभावमूर्ध्वं व्यवस्यन्ति, न प्राक्, दर्शने[ऽपि] पाटवाभावादिति । तद्वशेन पश्चाद्व्यवस्थाप्यते । विकारदर्शनेनेव विषमज्ञैः ।

तदयं सत्ताव्यतिरेकेण नान्यत् किंचिद्विनाशोऽपेक्षत इति तद्व्यापी ॥

कथं पुनरेतद् गम्यते निरपेक्षो विनाश इति ?

असामर्थ्याच्च तद्धेतोः

अभावकारिणः क्रियाप्रतिषेधाच्चेति चशब्दात् । कथमसामर्थ्यम् ? सिद्धे हि भावे कारको न तं करोति । नाप्यन्यक्रियायां तस्य किंचिदिति तदतद्रूपाकरणाच्चाकिंचित्करो नापेक्ष्यते ।

कथं क्रियाप्रतिषेधः ? विनाश इति हि भावाभावं मन्यन्ते । तदयं विनाशहेतुरभावं करोतीति प्राप्तम् । तत्र यद्यभावो नाम कश्चित् कार्यः स्यात् स्वभावः, स एव भाव इति नाभावः स्यात् । तस्मादभावं करोतीति क्रियाप्रतिषेधोऽत्र(ऽस्य) कृतः स्यात् । तथाऽप्ययमकिंचित्करः किमित्यपेक्षत इति सिद्धा विनाशं प्रत्यनपेक्षा भावस्य ॥

तस्माद्—

भवत्येव स्वभावतः ॥१९८॥

यत्र नाम भवत्यस्मादन्यत्रापि स्वभावतः ।

सोऽयं क्वचिद्भवन्दृष्टोऽनपेक्षत्वात् स्वभावत एव भवति तथान्यत्रापि स्वभावभावी विशेषाभावाविशेषादिति ॥

या काचिद्भावविषया द्विधैवानुमितिस्ततः[1] ॥१९९॥

स्वसाध्ये कार्यभावाभ्यां संबन्धनियमात्तयोः ।

तस्माद् द्विप्रकारैव वस्तुविषयानुमितिः कार्यलिङ्गा स्वभावलिङ्गा च। यथास्वं व्यापिनि साध्ये तयोरेव प्रतिबन्धाल्लिङ्गयोर्लिङ्गिनि यथोक्तं प्राक् ॥

प्रवृत्तेर्बुद्धिपूर्वत्वात्तद्भावानुपलम्भने ॥२००॥

प्रवर्त्तितव्यं नेत्युक्ताऽनुपलब्धेः प्रमाणता ।

तृतीयस्तु हेतुरनुपलब्धिरविशेषेण क्वचिदर्थे गमक इत्युच्यते ॥

सन्निश्चयशब्दव्यवहारप्रतिषेधे हि सर्वैवानुपलब्धिर्लिङ्गम् । सन्निश्चयाद्धि शब्दव्यवहाराः प्रवर्त्तन्ते । [तस्मात्ते] प्रवृत्तिरित्युक्ताः । तथा ह्यनुपलब्धिरेवासत्त्वमित्युक्तम् । तच्च प्रतिपत्तृवशान्न वक्तृवशात् । तावद्धि स भावोऽस्य नास्ति यावदत्राप्रतिपत्तिः, सताऽपि तेन तदर्थाकरणात् । वस्तुतस्त्वनुपलभ्यमानो न सन्नासन्, सतामपि स्वभावादिविप्रकर्षात्कदाचिदनुपलम्भात् । तस्याऽसत्स्वपि तुल्यत्वात् । तदेतत्प्रतिपत्तुः प्रमाणाभावान्निवृत्तं सत्त्वमनुपलब्धिलक्षणं स्वनिमित्तान् शब्दव्यवहारान् निवर्त्तयति ।

तेन याऽपीयमनुपलब्धिरुपलब्धिलक्षणप्राप्तानां वस्तुतोऽप्यसत्त्वरूपा, अप्रवृत्तियोग्यत्वात्, तस्या अप्येतत्तुल्यम्

[2]प्रामाण्यमत्र विषयेऽसन्निश्चयफलाऽपि सा ॥२०१॥

असत्ता[23b]यामपीयं प्रमाण ए(णमे)व—न ह्यस्ति संभवो यदुपलब्धियोग्यः सकलेष्वन्येषु कारणेषु सन्नोपलभ्येत ॥

न पुनः पूर्वाऽसत्तासाधनी यस्मात्

[3]शास्त्राधिकारेऽसंबद्धा बहवोऽर्था अतीन्द्रियाः ।

अलिङ्गाश्च कथं तेषामभावोऽनुपलब्धितः ॥२०२॥

सोऽयमसत्तां साधयन्ननुपलब्धिमात्रेण सर्वार्थानां प्रमाणत्रयनिवृत्त्या साधयेत् । तत्र न शास्त्रनिवृत्तिरभावसाधनी, तस्य क्वचिदनधिकारे[ऽ]प्रवृत्तेः । शास्त्रं हि प्रवर्त्तमानं कंचित् पुरुषार्थसाधनमुपायमाश्रित्य प्रवर्त्ततेऽन्यथाऽसंबद्धप्रलापस्याप्रामाण्यात् । तत्र च प्रकरणे बहवोऽर्था नावश्यं निर्देश्याः यथा—प्रत्यात्मनियताः काश्चित् पुरुषाणां चेतोवृत्तयः अनियतनिमित्तभाविन्यः, कालदेशव्यवहिता वा प्रकरणानुपयोगिनो द्रव्यविशेषाः । न तान् शास्त्रं

---

[1] ०विषयाऽनुमिति द्विविधैव सा—**म०**

[2] मुद्रितवृत्तौ कारिकांशोऽयं नोद्धृतः । किन्तु 'असत्तायामित्यादिना व्याचष्टे' इति वृत्त्यनुरोधात् कारिकांशोऽयम् ।

[3] शास्त्राधिकारासंबद्धाः—**क०, म०** ।

विषयीकरोति । न च तथाविप्रकृष्टेषु स्वसामर्थ्योपधानात् ज्ञानोत्पादनशक्तिरस्ति । न चावश्यमेषां कार्योपलम्भो येनानुमीयेरन् । न च ते प्रमाणत्रयनिवृत्तावपि न सन्तीति शक्यन्ते व्यवसातुम् । तस्मान्न सर्वानुपलब्धिः साधनी निवृत्तिनिश्चयस्य ॥

तदियम्

सदसन्निश्चयफला नेति स्याद्वाऽप्रमाणता ।

नैवेयमनुपलब्धिः प्रमाणं व्यवसायफलत्वात् प्रमाणानाम् । न हि प्रवृत्तिनिषेधेऽपीयं निःशङ्कपरिच्छेदं चेतः करोति । संशयादपि क्वचिल्लोकस्य प्रवृत्तेः । तथात्वे तन्निरवद्यं यदि निश्चयपूर्वं व्यवहरेदिति सेयमप्रवृत्तिफला प्रोक्ता ॥

प्रमाणमपि काचित् स्याल्लिङ्गातिशयभाविनी ॥२०३॥

अत्र न सर्वानुपलब्धिरप्रमाणम् । काचित् प्रमाणमपि लिङ्गविशेषभाविनी यथोदाहृता प्राक् ॥

यत् पुनरुक्तमप्रमाणमनुपलब्धिरिति

स्वभावज्ञापकाऽज्ञानस्यायं न्याय उदाहृतः ।

यस्य कस्यचित् स्वभावो नोपलभ्यते देशादिविप्रकर्षात् न स तदनुपलम्भमात्रेणासन्नाम यथोक्तं प्राक् । योऽपि ज्ञापकस्य लिङ्गस्य(स्या)भावादतीन्द्रियः प्रतिक्षिप्यतेऽर्थः, स्वभावविशेषो वा, यथा नास्ति विरक्तं चेतः देवता विशेषा वा, नास्ति दानहिंसाविरतिचेतना(सा)मभ्युदयहेतुतेति प्रत्यक्षेऽप्यर्थे फलस्यानन्तर्याभावादतत्फलसाधर्म्याद्विपर्यस्तोऽपवदेतापि । न तावता तदभाव एव, व्यवहितानामपि हेतोः फलानामुत्पत्तिदर्शनात्, मूषिकाऽलर्कविषविकारवत् तद्भावे विरोधाभावादत्रानुपलब्धिमात्रमप्रमाणम् ।

भावे किं प्रमाणमिति चेत् । अत एव संशयोऽस्तु, भवेद्वा प्रमाणमित्यप्रतिक्षेपः । तदत्र केषांचिदर्थानां स्वभावानां वा दर्शनपाटवाभावात् कारणानां कार्योत्पादननियमाभावाच्च भवेत् ज्ञापकासिद्धिः । नेयता तदभावः, पुनः पर्यायेण केषांचिदभिव्यक्तेः ॥

कार्यं तु कारका[ज्ञा]नमभावस्यैव साधकम् ॥२०४॥

स्वभावाऽभावे साध्ये तदनुपलम्भ एवाऽप्रमाणमुच्यते, कारकानुपलम्भस्तु प्रमाणमेव । न ह्यस्ति संभवो यदसति कारणे कार्यं स्यात् ।

ननु कदाचित् कारणविनाशेऽपि कार्यस्थितिर्दृष्टा । न ब्रूमः कारणस्थितिकालभावि कार्यमिति । हेतुरहिता तु भावोत्पत्तिर्नास्तीत्युच्यते । न च तथा स्थायी भावस्तदुपादानः । पारम्पर्यात् तु सन्तानोपकारात् तत्कार्यव्यपदेशः । यद्यस्य कथंचिदभावः सिध्येत् तत्फलं नास्तीति निश्चीयते ॥

स्वभावानुपलम्भश्च स्वभावेऽर्थस्य लिङ्गिनि ।

[24a]स्वभावाभाव एव लिङ्गिनि । स्वभावानुपलम्भोऽपि कश्चित् प्रमाणमेव यद्यनुपलभ्यमानो व्यापकः स्वभावोऽस्य सिद्धः स्यात् । यथा वृक्षत्वं शिंशपायाः ॥

तदभावः प्रतीयेत हेतुना यदि केनचित् ॥२०५॥

यद्यस्य स्वभावस्य व्यापकस्य वाभावः कुतश्चिद् गमकाद्धेतोः सिध्येत्, सोऽयमसन्नेव स्वं कार्यं व्याप्यं वा निवर्त्तयति । तदभावासिद्धौ निवर्त्त्येऽपि संशयात् ॥

कथमिदानीं भावस्य स्वयमनुपलब्धेरभावसिद्धिः ?

दृश्यस्य दर्शनाभावकारणाऽसंभवे सति ।
भावस्यानुपलब्धस्य भावाभावः प्रतीयते ॥२०६॥

भावो हि यदि भवेद् यथास्वं ग्राहकेण करणेनोपलभ्य एव भवेत् । स दर्शनप्रतिबन्धिषु व्यवधानादिष्वसत्सूपलभ्यत एवानुपलब्धस्त्वसन्निति निश्चीयते । तादृशः सत उपलम्भाऽव्यभिचाराद् । अयमेव हेतुर्हेतुव्यापकयोरभावेऽपि वेदितव्यः ॥

विरुद्धस्य च भावस्य भावे तद्भावबाधनात् ।
तद्विरुद्धोपलब्धौ स्यादसत्ताया विनिश्चयः ॥२०७॥

यो हि भावो येन सह नावतिष्ठते, तदुपादानयोरन्योन्यवैगुण्याश्रयत्वेनारम्भविरोधात्, तयोर्विरुद्धयोरेकस्य भावेऽप्यन्याऽभावगतिर्भवति यथोक्तं प्राक् ।

इदमनुपलब्धेर्न पृथग्व्यवस्थाप्यते, तत एव विरोधगतेः । विरोधाच्चाभावसाधनात् ।

भवतु नामैवंविधाया अनुपलब्धेरभावगतिः । सा पुनः कथमनुमानम् ? कथं च न स्यात् ? दृष्टान्तानपेक्षणात् । न ह्यस्यां कश्चिद् दृष्टान्तोऽस्ति । किं न निरुपाख्यं व्योमकुसुमादि दृष्टान्तः ? तदसत् कथमवगन्तव्यम्, येनैवं स्यात् ? अनुपलब्धेरेवेति चेत् । तत्र कथमदृष्टान्तिकाऽसत्तासिद्धिः ? सदृष्टान्तत्वे वाऽनवस्थाप्रसङ्गः । तथा चाप्रतिपत्तिः । तन्निरुपाख्याऽभावसिद्धिवदन्यत्रापि दृष्टान्ताऽनपेक्षणादननुमानम् ।

शृण्वन्नपि देवानांप्रियो नावधारणपटुः । निमित्तं ह्यसच्छब्दव्यवहाराणामुपलभ्यानुपलब्धिः । सा स्वसन्निधानात् स्वनिमित्तानेतान् साधयतीति स्वनिमित्तसामग्रीयोग्यसंनिधानः सर्वोऽत्र दृष्टान्तः । असत्ता पुनरत्रानुपलब्धिरेव । अत एवं (एवेयं) कारणात् कार्यानुमानलक्षणात्(णेति) स्वभावहेतावन्तर्भवतीति वक्ष्यामः ।

सच्छब्दव्यवहारप्रतिषेधेऽपि प्रमाणनिवृत्त्या निमित्तवैकल्याऽभाविनोऽङ्कुरादयो दृष्टान्तो न केवलं निरुपाख्यम् । निरुपाख्येऽपीयमेव प्रवृत्तिर्निषिध्यते । अनुपलब्धिलक्षणाऽसत्ता सिद्धैव । सोऽयं मूढो निमित्तं तदभावं वाभ्युपगम्य प्रवृत्तिनिवृत्ती विलोपयन् यथाभ्युपगमं प्रतिपाद्यते निरुपाख्यवदन्यद्वेति ।

स एव तावदुपलब्ध्यभावः कथं सिद्ध इति चेत् । एतदुत्तरत्र वक्ष्यामः ।

अन्यत्रापि ह्यनुमाने साध्यधर्मेण व्याप्तं साधनमिच्छन् किमिति दृष्टान्तेन प्रत्याय्यो व्याप्यनिर्देशादेव व्याप्नुवतः सिद्धेः ? निश्चितार्थस्यापि स्मृत्यर्थो दृष्टान्त इति चेत् । तदितरत्र समानम् । सोऽयमन्यत्रानुपलम्भमात्रादसद्व्यवहारं प्रतिपद्यमानोऽपीह व्यामूढ इति स्म(स्मा)र्यते ॥

अथ यदिदं 'न सन्ति प्रधानादयोऽनुपलब्धेरिति' तत्र कथमसद्व्यवहारविधिः, सद्व्यवहार-निषेधो वा ? कथं च न स्यात् ? तदर्थप्रतिषेधे धर्मिवाचिनोऽप्रयोगादभिधानस्य निर्विषयस्य च प्रतिषेधस्यायोगात् । नैष दोषो यस्माद्

अनादिवासनोद्भूतविकल्पपरिनिष्ठितः ।
शब्दार्थस्त्रिविधो[१] धर्मो भावाभावोभयाश्रितः ॥२०८॥

तस्मिन् भावानुपादाने साध्येऽस्यानुपलम्भनम् ।
तथा हेतुर्न तस्यैवाभावः शब्दप्रयोगतः ॥२०९॥

निवेदितमेतद्यथा नैते शब्दाः [24b] स्वलक्षणविषयाः, अनादिवासनाप्रभवप्रतिभासि-नमर्थं विषयत्वेनात्मसात् कुर्वन्ति । वक्तुः श्रोतुश्च तद्विकल्पभाजः, यथाप्रतिभासिवस्तु-प्रतिपादनसमीहाप्रयोगात्, तदाकारविकल्पजननाच्च । न चोपादानकार्यप्रत्ययाऽप्रतिभासि रूपं शक्यं तद्विषयत्वेनावसातुम् । स तु विकल्पः सदसदुभयप्रत्ययाहितवासनाप्रभव इति तत्प्रतिभास्याकाराध्यवसायवशेन च भावाभावोभयधर्म्म इत्युच्यते । तदत्र धर्मिणि व्यवस्थिताः सदसत्त्वं चिन्तयन्ति 'किमयं प्रधानशब्दप्रतिभास्यर्थो भावोपादानो न वेति' तस्य भावानु-पादानत्वे साध्ये स एव प्रत्यात्मवेद्यत्वादप्रतिक्षेपार्होऽर्थो धर्मी । न च स एवार्थः स्वलक्षणमिति शक्यं वक्तुम्, असंप्राप्तनिरुद्धयोरप्यर्थयोस्तस्यानपायात् । वस्तुविपरीताकार[ाभि]निवेशिष्वपि तीर्थान्तरीयप्रत्ययेषु भावात् ॥

परमार्थैकतानत्वे शब्दानामनिबन्धना ।
न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु ॥२१०॥

अतीताऽजातयोर्वापि न च स्यादनृतार्थता ।
वाचः कस्याश्चिदित्येषा बौद्धार्थविषया मता ॥२११॥

इति संग्रहश्लोकौ ॥

तस्य च यथासमीहितरूपानुपादानत्वे साध्ये तथानुपलम्भोऽस्य धर्मोऽस्तीति न साधन-धर्माऽसिद्धिः । न पुनरत्रायमेव शब्दविकल्पप्रतिभास्यर्थोऽपह्नूयते, तस्य बुद्धावुपस्थापनाय शब्दप्रयोगात्, तदभावे तदयोगात् ॥

अपि च—

शब्दार्थापह्नवे साध्ये धर्माधारनिराकृतेः ।
न साध्यः समुदायः स्यात् सिद्धो धर्मश्च केवलः ॥२१२॥

---

[१] ०विधो धर्मी भावाभावोभयाश्रयः—क० म०

यदि हि शब्दार्थ एवापोद्येत प्रधानशब्दवाच्यस्य धर्मिण एव निराकरणात् निराधारः साध्यधर्मः स्यात् । तदयमाधारव्यवच्छेदाऽनपेक्षो न विवादाश्रय इति नोपन्यसनीय एव स्यात् ॥

किं च—

सदसत्पक्षभेदेन शब्दार्थानपवादिभिः ।
वस्त्वेव चिन्त्यते ह्यत्र प्रतिबद्धः फलोदयः ॥२१३॥

अर्थक्रियाऽसमर्थस्य विचारैः किं तदर्थिनाम् ।
षण्ढस्य [1]रूपवैरूप्ये कामिन्याः किं परीक्षया ॥२१४॥

न हि शब्दार्थः सन्नसन् वा कंचित् पुरुषार्थं तु उपरुणद्धि समादधाति वा । यथाऽभिनिवेशमतत्त्वात् । यथातत्त्वं चासमीहितत्वात् । तस्मादयं प्रवर्त्तमानः सर्वदा सदसच्चिन्तायामवधीरितविकल्पप्रतिभासो वस्त्वेवाधिष्ठानीकरोति, यत्रायं पुरुषार्थः प्रतिबद्धः यथाग्नौ शीतप्रतीकारादिः । न ह्यत्र शब्दार्थः समर्थस्तदनुभवाप्तावपि तदभावात् । तदयमर्थक्रियार्थी तदसमर्थं प्रति न दत्तानुयोगो भवितुं युक्तः । न हि वृषस्यन्ती षण्ढस्य रूपवैरूप्यपरीक्षायामवधत्ते ॥

यत् पुनरेतदुक्तम्—"कल्पितस्यानुपलब्धिः धर्मः" इति तस्य कोऽर्थः ?

शब्दार्थः कल्पनाज्ञानविषयत्वेन कल्पितः ।
धर्मो वस्त्वाश्रयाऽसिद्धिरस्योक्तो[2] न्यायवादिना ॥२१५॥

कल्पनाविषयत्वाच्छब्दार्थ एव कल्पितस्तस्य वस्त्वाश्रयानुपलब्धिर्धर्म इत्यभिप्राय इति ।

यदुक्तम्—'न प्रमाणत्रयनिवृत्तावपि भावाभावसिद्धिः' इति तन्मा भूदन्यत्र प्रमाणनिवृत्तौ निवृत्तिः, तयोरसकलविषयत्वात् । आगमः पुनर्न किंचिन्न व्याप्नोति । तन्निवृत्तिः कथं न गमिकेति ? उक्तमत्र—'नागमेषु सर्वार्था उपनिबध्यन्ते, अप्रकरणापन्नत्वादिति' ॥

अपि च

नान्तरीयकताऽभावाच्छब्दानां वस्तुभिः सह ।
नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः ॥२१६॥

न हि शब्दा यथाभावं वर्त्तन्ते यतस्तेभ्योऽर्थप्रकृतिर्निश्चीयेत । ते हि वक्तुर्विवक्षावृत्तय इति तन्नान्तरीयकास्तामेव गमयेयुः । न च पुरु[25a]षेच्छाः सर्वा यथार्थभाविन्यः । न च तदप्रतिबद्धस्वभावो भावोऽन्यं गमयति ॥

यत्तर्हीदम्—

"आप्तवादाऽविसंवादसामान्यादनुमानता" [का० २१९]

---

[1] रूपे—म०

[2] स्योक्ता—क० म०

इत्यागमस्यानुमानत्वमुक्तम्, तत् कथम्? नायं पुरुषोऽनाश्रित्यागमप्रामाण्यमासितुं समर्थोऽत्यक्षफलानां केषांचित् प्रवृत्तिनिवृत्त्योर्महानुशंसाऽपायश्रवणात्, तद्भावे विरोधादर्शनाच्च। तत्सति प्रवर्त्तितव्ये वरमेवं प्रवृत्त इति परीक्षया प्रामाण्यमाह।

तच्च

संबद्धानुगुणोपायं पुरुषार्थाभिधायकम्।
परीक्षाधिकृतं वाक्यमतोऽनधिकृतं परम् ॥२१७॥

संबद्धो(न्धो) वाक्यानामेकार्थोपसंहारोपकारः। दशदाडिमादिवाक्यानामिवानुपसंहार एवान्यथा वक्तुर्वैगुण्यमुद्भावयेत्। अशक्योपायफलानि च शास्त्राणि फलार्थी नाद्रियेत विचारयितुम्, अपुरुषार्थफलानि च। विषशमनाय तक्षकफणारत्नालङ्कारोपदेशवत्, काकदन्तपरीक्षावच्च। तद्विपर्ययेणोपसंहारवच्छक्योपायं पुरुषार्थाभिधायि च शास्त्रं [1]परीक्षेतान्यत्रावधानस्यैवायुक्तरूपत्वात्। तद्यदि परीक्षायां न विसंवादभाक् प्रवर्त्तमानः शोभते॥

कः पुनरस्याविसंवादः?

प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनम्।
दृष्टादृष्टार्थयोरस्याऽविसंवादस्तदर्थयोः ॥२१८॥

प्रत्यक्षेणाऽबाधनं प्रत्यक्षाभिमतानामर्थानां तथाभावः। यथा नीलादिसुख[दुःख]निमित्तोपलक्षणरागादिबुद्धीनाम्। अतथाभिमतानां चाऽप्रत्यक्षता। यथा शब्दादिरूपसंनिवेशिनां सुखादीनाम्, द्रव्यकर्मसामान्यसंयोगादीनां च। तथाऽनागमापेक्षाऽनुमानविषयाभिमतानामननुमेयानां च तथाभावः। यथा चतुर्णामार्यसत्यानाम्, आत्मादीनां च। आगमापेक्षानुमानेऽपि—यथा रागादिरूपम्, तत्प्रभवं चाधर्ममभ्युपगम्य तत्प्रहाणाय स्नानाग्निहोत्रादेरनुपदेशः। सेयं शक्यपरिच्छेदाऽशेषविषयशुद्धिरविसंवादः॥

आप्तवादाविसंवादसामान्यादनुमानता।
बुद्धेरगत्याभिहिता परोक्षेऽप्यस्य गोचरे ॥२१९॥

तस्यास्यैवंभूतस्याप्तवादस्याविसंवादसामान्याददृष्टव्यभिचारस्य प्रत्यक्षानुमानाऽगम्येऽप्यर्थे प्रतिपत्तेस्तदाश्रितत्वात् तदन्यप्रतिपत्तिवदविसंवादोऽनुमीयते। ततः शब्दप्रभवाऽपि सती न शाब्दवदभिप्रायं निवेदयत्येवेत्यर्थाविसंवादादनुमानमपि॥

अथवाऽन्यथाऽऽप्तवचनस्याऽविसंवादादनुमानत्वमुच्यते।

हेयोपादेयतत्त्वस्य सोपायस्य प्रसिद्धितः।
प्रधानार्थाऽविसंवादादनुमानं परत्र वा ॥२२०॥

हेयोपादेयतदुपायानां तदुपदिष्टानामवैपरीत्यमविसंवादो यथा चतुर्णामार्यसत्यानां वक्ष्य-

---

[1] परीक्ष्यते—**क०**

माणनीत्या तस्यास्य पुरुषार्थोपयोगिनोऽभियोगार्हस्य ऽविसंवादात्, विषयान्तरेऽपि तथात्वोपगमो न विप्रलम्भाय, अनुपरोधात् निष्प्रयोजनवितथाभिधानवैफल्याच्च वक्तुः । तदेतदगत्योभयथाऽप्यनुमानत्वमागमस्योपवर्णितम्—वरमागमात् प्रवृत्तावेवं प्रवृत्तिरिति । न खल्वेवमनुमानमनु-(न)पायमनान्तरीयकत्वादर्थेषु शब्दानामिति निवेदितमेतत् ॥

पुरुषातिशयापेक्षं यथार्थमपरे विदुः ।

यथार्थदर्शनादिगुणयुक्तपुरुष आप्तः । तत्प्रणयनमविसंवाद इत्यन्ये ।

इष्टोऽयमर्थः शक्येत ज्ञातुं सोतिशयो यदि ॥२२१॥

सर्व एवायमागममनागमं वा प्रवृत्तिकामोन्वेषते प्रेक्षापूर्वकारी न व्यसनेन—अपि ना[25b]मातोऽनुष्ठेयं ज्ञात्वा प्रवृत्तोऽर्थवान् स्यामिति । स शक्यदर्शनाऽविसंवादप्रत्ययेनान्यत्रापि प्रवर्त्तत एवंप्रायत्वाल्लोकव्यवहारस्य ॥

पुरुषपरीक्षया तु प्रवृत्तावप्रवृत्तिरेव, तस्य तथाभूतस्य ज्ञातुमशक्यत्वात्, नानिष्टेः, तादृशामवितथाभिधानात् । तथाहि—

अयमेवं न वेत्यन्यदोषाऽनिर्दोषताऽपि वा ।
दुर्लभत्वात् प्रमाणानां दुर्बोधेत्यपरे विदुः ॥२२२॥

चैतसेभ्यो हि गुणदोषेभ्यः पुरुषाः सम्यग्मिथ्या[1] प्रवृत्तयः । ते चातीन्द्रियाः स्वप्रभवकायवाग्व्यवहारानुमेयाः स्युः । व्यवहाराश्च प्रायशो बुद्धिपूर्वमन्यथाऽपि कर्त्तुं शक्यन्ते, पुरुषेच्छावृत्तित्वात्, तेषां च चित्राभिसन्धित्वात् । तदयं लिङ्गसंकरात् कथमनिश्चिन्वन् प्रतिपद्येत ॥

अथ किं नैव स तादृशः पुरुषोऽस्ति यो निर्दोषः ?

सर्वेषां सविपक्षत्वात् निह्रासातिशयश्रिताम्[2] ।
सात्मीभावात् तदभ्यासाद्धीयेरन्नाश्र(स्र)वाः क्वचित् ॥२२३॥

स तु प्रहीणाश्र(स्र)वो दुर्ज्ञानः । दोषा हि निर्ह्रासातिशयधर्माणो विपक्षाभिभवोत्कर्षापकर्षं साधयन्ति ज्वालादिवत् । ते हि विकल्पप्रभवाः सत्यप्युपादाने कस्यचिन्मनोगुणस्याभासादपकर्षिण तत्पाटवे निरन्वयविनाशधर्माणः स्युर्ज्वालादिवदेव । तेन स्यादपि निर्दोषः ॥

कथं निर्दोषो नाम ? यावता दोषविपक्षसात्मत्वेऽपि दोषसात्मनो विपक्षोत्पत्तिवत् यथाप्रत्ययं दोषोत्पत्तिरपि । नायं दोषः । यस्मात्—

निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधा यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥२२४॥

---

[1] प्रथमपृष्ठतः एतत्पर्यन्तं श्रीसांकृत्यायनेन तिब्बतीभाषातः स्वसंपादितवृत्तौ अनूदितम्—द्रष्टव्या—क० टिप्पणी सं० १. पृ० ३९७

[2] ०शयाश्रिता--क० । नास्त्येत् पाठान्तरं वृत्त्यनुसारि । ०शयं श्रितः—म० अशुद्धमेतत् ।

न हि स्वभावो यत्नेन विना निवर्त्तयितुं शक्यः। श्रोत्रियकापालिकघृणावत्। यत्नश्च प्राप्यनिवर्त्त्ययोः स्वभावयोर्गुणदोषदर्शनेन क्रियेत। तच्च विपक्षसात्मानः पुरुषस्य दोषेषु न संभवति। तस्य निरुपद्रवत्वात्। सर्वदोषहानेः १, पर्यवस्थानजन्मप्रतिबद्धदुःखस्य विवेकात् २, प्रशमसुखरसस्यानुद्वेजनाच्च ३। अभूतार्थं खल्वप्युपादानबलभावि सन्तानस्य विपर्ययोपादानान्न स्यात्। न तु भूतार्थं वस्तुबलोत्पत्तेः। अभूतार्थाश्च दोषाः न प्रतिपक्षसात्म्यबाधिनः। तस्मान्न पुनर्दोषोत्पत्तिः। यत्नेऽपि बुद्धेर्गुणपक्षे पातेन प्रतिपक्ष एव यत्नाधानात् परीक्षावतो विशेषेणादुष्टात्मनः॥

कः पुनरेषां दोषाणां प्रभवो यत्प्रतिपक्षाभ्यासात् प्रहीयन्ते

सर्वासां दोषजातीनां जातिः सत्कायदर्शनात्।
साऽविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसंभवः॥२२५॥

न हि 'नाहं न ममेति' पश्यतः परिग्रहमन्तरेण क्वचित् स्नेहः। न चाऽननुरागिणः क्वचिद् द्वेषः। आत्मात्मीयानुपरोधिनि, उपरोधप्रतिघातिनि च तदभावात्। तस्मात् समानजातीयाभ्यासजमात्मदर्शनमात्मीयग्रहं प्रसूते। तौ च तत्स्नेहम्। स द्वेषादीनि[ति] सत्कायदर्शनजाः सर्वे दोषाः : तदेव चाऽज्ञानमित्युच्यते॥

मोहो निदानं दोषाणामत एवाभिधीयते।
सत्कायदृष्टिरन्यत्र तत्प्रहाणे प्रहाणतः॥२२६॥

मोहं दोषनिदानमाहुरमूढस्य दोषानुत्पत्तेः। पुनरन्यत्र सत्कायदृष्टिम्। तच्चैतत् प्रधाननिर्देशे सति स्यात्, अनेकजन्मनां दोषाणामेकोत्पत्तिविरोधात्। न च द्वयोः प्राधान्ये एकैकनिर्देशः परभागभाक्। उभयथाप्येकनिर्देशे न विरोधः। प्राधान्यं पुनस्तदुपादानत्वेन तत्प्रहाणे दोषाणां प्रहाणात्। तस्मात् संभवति सत्कायदर्शनजन्मनां दोषाणां तत्प्रतिपक्षनैरात्म्यदर्शनात् प्रहाणम्। स तु क्षीण[26a]दोषो दुरन्वयो यदुपदेशादयं प्रतिपद्येत॥

मा भूत् पुरुषाश्रयं वचनमागमः प्रणेतुर्दुरन्वयत्वात्।

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात्।
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते॥२२७॥

न खलु सर्व एवागमः संभाव्यविप्रलम्भः। विप्रलम्भहेतूनां दोषाणां पुरुषाश्रयादपौरुषेयं सत्यार्थमित्येके। कारणाभावो हि कार्याभावं साधयति॥

य एवंवादिनस्तानेव प्रति

गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयाद्।
अपौरुषेयं मिथ्यार्थं किं नेत्यन्ये प्रचक्षते॥२२८॥

यथा रागादिपरीतः पुरुषो मृषावादी दृष्टस्तथा दयाधर्मतादिगुणयुक्तः सत्यवाक्। तद्यथा वचनस्य पुरुषाश्रयात् मिथ्यार्थता, तथा सत्यार्थताऽपीति। स निवर्त्तमानस्तामपि

निवर्त्तयतीत्यानर्थक्यं स्यात् । विपर्ययो वा । न हि शब्दाः प्रकृत्याऽर्थवन्तः, समयात्ततोऽर्थख्यातेः कायसंज्ञादिवत् । अप्रातिकूल्यं तु योग्यता, समये तदिच्छाप्रणयनात्, निसर्गसिद्धेष्विच्छावशात् प्रतिपादनायोगात् । तेऽनर्थकाः पुरुषसंस्कारादर्थवन्तः स्युः । तत्संस्कार्यतैव चैषां पौरुषेयता युक्ता नोत्पत्तिः । तत एवार्थविप्रलम्भात् । उत्पन्नोऽप्यन्यथा समितो नोपरोधी, तदन्यपुरुषधर्मवत् । तदयं निवर्त्तमानः स्वकृतसमयसंभवामर्थप्रतिभां निवर्त्तयति । तत्कुतस्तन्निवृत्त्या सत्यार्थता ?

अथ पुनरुत्पत्तिरेव पौरुषेयता, न समयाख्यानम्—

अर्थज्ञापनहेतुर्हि संकेतः पुरुषाश्रयः ।
गिरामपौरुषेयत्वेऽप्यतो मिथ्यात्वसंभवः ॥२२९॥

किं ह्यस्यापौरुषेयतया यतो हि समयादर्थप्रतिपत्तिः, स पौरुषेयो वितथोऽपि स्यात् । शीलसाधनस्वर्गवचनं तदन्यथासमयेन विपर्यासयेत्तेनाऽयथार्थमपि प्रकाशनसंभवात् स एव दोषः ।

संबन्धाऽपौरुषेयत्वे स्यात् प्रतीतिरसंविदः ।

स्यादेतत्—अकार्यसंबन्धा एव शब्दाः । न तेऽर्थेषु पुरुषैरन्यथा विपर्यस्यन्ते तेनादोष इति । किमिदानीं संकेतेन ? स हि संबन्धो यतोऽर्थप्रतीतिः । स चेदपौरुषेयो नायं समयमपेक्षेत । अप्रतीत्याश्रयो वा कथं संबन्धः ?

संकेतात्तदभिव्यक्तावसमर्थाऽन्यकल्पना ॥२३०॥

न वै संबन्धो विद्यमानोप्यनभिव्यक्तः प्रतीतिहेतुः । संकेतस्त्वेनमभिव्यनक्ति । स तर्हि सिद्धोपस्थायी किमकारणं पोष्यते ?

नन्वियान् संबन्धस्य व्यापारो यदर्थप्रतीतिजननम् । तत् समयेनैव कृतमिति । नाऽयोग्ये समयः समर्थ इति योग्यता तत्संबन्धश्चेत् । तत् किं वै शब्दः संबन्धोऽस्तु । समर्थं हि रूपं शब्दस्य योग्यता, कार्यकरणयोग्यतावत् । सा चेदर्थान्तरं किं शब्दस्येति संबन्धो वाच्यः । योग्यतोपकार इति चेत् । न । नित्यायाः निरतिशयत्वात् । तत्राप्यतिप्रसङ्गादुपकारसिद्धेः । योग्यतायां च स्वतो योग्यत्वेऽर्थ एव किं नेष्यते ?

समयस्तर्हि कथं शब्दार्थसंबन्धः ? पुरुषेषु वृत्तेः । नामिश्राणां सिद्धानां कश्चित् संबन्धोऽभेदप्रसङ्गात्, अनपेक्षणाच्च । अर्थविशेषसमीहाप्रेरिता वाग् 'अत इदम्' इति विदुषः स्वनिदानाभासिनमर्थं सूचयतीति बुद्धिरूपवाग्विज्ञप्त्योर्जन्यजनकभावः संबन्धः । ततः शब्दात् प्रतिपत्तिरविनाभावात् । तदाख्यानं समयः, ततः प्रत्यायकसंबन्धसिद्धेः संबन्धाख्यानात् । न तु स एव संबन्धः ॥

अस्तु वान्य एव नित्यः संबन्धस्तेन

गिरामेकार्थनियमे न स्यादर्थान्तरे गतिः ।

न हि तेन संबन्धेनाऽसंबंधे(द्धे)ऽर्थे प्रतीतिर्युक्ता, तस्य वैफल्यप्रसङ्गात् । दृष्टश्चेच्छावशात् कृतसमयः सर्वः सर्वस्य दीपकः ।

अनेकार्थाभिसंबन्धे विरुद्धव्यक्तिसंभवः ॥२३१॥

अथ मा भूद् दृष्टविरोध इति सर्वे सर्वस्य वाचकाः । तथा न सर्वः सर्वसाधनः, असंकरात् कार्यकारणतायाः । तत्र प्रतिनियतसाधनेऽभिमतेऽर्थे [1]सर्वसाध्यसाधनसाधारणस्य[26b] शब्द येष्टव्यक्तिमेव समयकारः करोतीति कुत एतत् ?

सोऽनियतो नियमं पुरुषात् प्रतिपद्यते तदा

अपौरुषेयतायाश्च[2] व्यर्था स्यात् परिकल्पना ।

अपि नामाऽसंकीर्णम(मेवा)र्थं जानीयामिति संकरहेतुः पुरुषोऽपाकीर्णः । तत्र यादृशाः पुरुषैः क्वचित् प्रयुक्ताः संकीर्यन्ते, ते तादृशा एव सव[र्थि]साधारणाः सन्तः क्वचित्तैर्विनिनियम(मि)ताः, तत्त्वापरिज्ञानात् । प्रकृत्यैव वैदिका नियता इति चेत् । नोपदेशमपेक्षेरन् । अन्यथा च संकेतेन [न] प्रकाशयेयुः । व्याख्याविकल्पश्च न स्यात् । उपदेशस्य चेष्टसंवादः शक्यविकल्पे नास्तीति व्यर्थैवाऽपौरुषेयता ॥

वाच्यश्च हेतुभिन्नानां संबन्धस्य व्यवस्थितेः ॥२३२॥

अर्था हि बाह्या न रूपं शब्दस्य, [नापि] शब्दोर्थानाम्, येनाभिन्नात्मतया व्यवस्थाभेदेऽपि नान्तरीयकता स्यात् । कृतकत्वाऽनित्यत्ववत् । नाऽप्येते विवक्षाजन्मानो ध्वनयः, अजन्मानो वा विवक्षाव्यङ्ग्याः । नार्थायत्ताः । तत् कथमिदानीं तत्प्रतिनियमसंसाध्यं तदन्वयं साधयेयुः । न ह्यप्रतिबद्धस्तत्साधन इति ॥

असंस्कार्यतया पुंभिः सर्वथा स्यात् निरर्थता ।
संस्कारोपगमे मुख्यं गजस्नानमिदं[3] भवेत् ॥२३३॥

इति संग्रहश्लोकः ॥

अपि च । शब्दार्थयोः संबन्धो नित्यो वा स्यादनित्यो वा ? यद्यनित्यः पुरुषेच्छावृत्तिरवृत्तिर्वा ? अपुरुषाधीनत्वे पुरुषाणां यथाभिप्रायं देशादिपरावृत्त्या तेन प्रतिपादनं न स्यात् । इच्छायामप्यनायत्तस्य कदाचिदयोगात् पर्वतादिवत् । अयमेव नित्यत्वेऽपि दोषस्तस्य स्थिररूपस्य परावृत्त्ययोगादिति समं सर्वावस्थानेऽपीष्टप्रतिनियमाऽभावात् । ततो विशेषप्रतिपत्तिर्न स्यादिति पूर्ववत् प्रसङ्गः । इच्छावृत्तौ पौरुषेयत्वमिति विप्रलम्भशङ्का ॥

अपि च—

संबन्धिनामनित्यत्वान्न संबन्धेऽस्ति नित्यता ।

---

[1] इतः तिब्बतीभाषातः अनूदितं श्रीसांकृत्यायनेन स्वसंपादितवृत्तौ ।

[2] ०तायाञ्च—क० म० । अशुद्धमेतत् न वृत्त्यनुसारि । [3] स्नाननिभं—क० म०

पराश्रयो हि संबन्धोऽप्रतिबन्धे तयोः संबन्धिताऽयोगात् । स चाश्रयोऽनित्यः । अपायेऽस्य संबन्धस्याप्यपायोऽन्यथा नाश्रितः स्यात् । ततो न नित्यः ॥

तदाश्रयार्थश्च वक्तव्यः ।

नित्यस्यानुपकार्यत्वादकुर्वाणश्च नाश्रयः ॥२३४॥

जातेर्वाच्यत्वादि(द)दोष इति चेत् । न । तद्वचने प्रयोजनाभावादिति निर्लोठितमेतत् । सर्वत्र च जात्यसंभवादयोगो [यथा] यादृच्छिकेषु व्यक्तिवाचिषु । सर्वदा जातिचोदने विशेषान्तरव्युदासेन प्रवृत्त्ययोगाच्च । तस्मादन्वयव्यतिरेकिणो भावस्य भावाभावौ संबन्धः ॥

अर्थैरतः स शब्दानां संस्कार्यः पुरुषैर्धिया ।

तावेव भावाभावौ आश्रित्याऽसंसृष्टावपि संसृष्टौ पुरुषस्य व्यवहारभावनातः प्रतिभात इति पौरुषेयो भावानां संश्लेषः ।

किं च, आश्रयविनाशान्नष्टे संबन्धे स शब्दः पुनरसंबंध(बद्ध)त्वान्नापूर्वेण योज्येत । उत्पन्नोत्पन्नाश्च भावाः स्थितसंबन्धाभावादसंबन्धिनोऽवाच्याश्च स्युः ॥

तत्रापि

अर्थैरेव सहोत्पादे

कल्प्यमाने

न स्वभावविपर्ययः ॥२३५॥

शब्देषु युक्तः

अथ मा भून्नष्टसंबन्धस्य शब्दस्यार्थान्तरे वैगुण्यमर्थानां च अवाच्यतेत्युत्पन्नोर्थः संबन्धवान् यद्युत्पद्येत, संबन्ध उत्पन्नोऽपि न शब्दे स्यात् । तस्य तेनाऽसंबन्धिस्वभावस्य स्वभावपिपर्यय-मन्तरेण तद्भावायोगात् । अर्थेन सहोत्पन्नस्य चाऽन्यतः सिद्धस्यानुपकारिणि शब्देऽसमाश्र-याच्च ।[१] तस्यापि तदुत्पत्तिसहकारित्वे समर्थस्य नित्योत्पादनप्रसङ्गः, अन[27a]पेक्षत्वान्नि-त्यस्यानुपकारात् । असामर्थ्येऽपि पश्चादपि स्वभावाऽत्यागादशक्तिः । वस्तुभूते तु

संबन्धे नायं दोषो विकल्पिते ।

न हि भावश्लेषापेक्षी पुरुषभावनाप्रतिभासी तदपेक्षालक्षणः संबन्धः । सोऽयं नित्या-नामप्यपरावर्त्तयन् स्वभावं कुतश्चित् स्वयमुत्प्रेक्ष्य घटयेदिति तेऽपि तथा स्युर्न च च्यवनधर्माणः ॥

यदुक्तम्—आश्रयापायेनाश्रितसंबन्धविनाशादनित्यः स इति । तत्र

नित्यत्वादाश्रयापायेऽप्यनाशो यदि जातिवत्[२] ॥२३६॥

---

[१] श्रयत्वाच्च **क०** [२] यदि संमतः—**क० म०**

नित्येष्वाश्रयसामर्थ्यं किं येनेष्टः स आश्रयः ।

श्रूयत एतन्नित्या जातिराश्रयिता च, नाप्याश्रयेण सह नश्यतीति । केवलं नित्येष्वाश्रयसामर्थ्यं न पश्यामो येनासावाश्रयः, कृतस्य करणाभावात्, अकारकस्य चानपेक्षत्वात् ।।

व्यक्तिरुपकारो जातेः, संबन्धस्य चाश्रयात् । तेनाश्रय इति चेत् ।

ज्ञानोत्पादनहेतूनां संबन्धात् सहकारिणाम् ।।२३७।।
तदुत्पादनयोग्यत्वेनोत्पत्तिर्व्यक्तिरिष्यते ।
घटादिष्वपि युक्तिज्ञैरविशेषेऽविकारिणाम् ।।२३८।।
व्यञ्जकैः स्वैः कृतः कोऽर्थो व्यक्तास्तैस्ते यतो मताः ।

सहकारिणः सकाशादुपादानापेक्षात् ज्ञानजननयोग्यक्षणान्तरोत्पत्तिरेव घटादीनामभिव्यक्तिः । अन्यथाऽनपेक्ष्य तदुपकारं ज्ञानोत्पादनप्रसङ्गात् । सामर्थ्यकारिणश्च जनकत्वात् । तस्य च तदात्मकत्वात् । अर्थान्तरत्वे च भावानुपकारप्रसङ्गात् । सामर्थ्याच्च ज्ञानोत्पत्तेर्नित्यं घटादीनामग्रहणापत्तेरनालोकापेक्षग्रहणप्रसङ्गादनपेक्षात्मानुपकारात् । तदिमे स्वविषयज्ञानजनने परमपेक्षमाणास्ततः स्वभावातिशयं स्वीकुर्वन्ति । तेनास्य जन्याः । ज्ञेयरूपासादनात्तु ज्ञानवशेन कार्यातिशयवाचिना शब्देन विशेषख्यात्यर्थं व्यङ्ग्याः ख्याप्यन्ते । नैवं जातिसंबन्धादयः कथंचिदप्यनुपकार्यत्वादनुपकारिणा व्यक्ता युज्यन्ते ।।

संबन्धस्य च वस्तुत्वे स्याद्भेदाद् बुद्धिचित्रता ।।२३९।।

स चायं संबन्धो वस्तु भवन्नियमेन शब्दार्थाभ्यां भेदाभेदौ नातिवर्त्तते । रूपं हि वस्तु । तस्याऽतत्त्वमेवाऽन्यत्वमित्युक्तम् । स चायमैन्द्रियः सन् स्वबुद्धौ तदन्यविवेकिनाऽप्रतिभासमानो रूपेण कथं तथा स्यात् । दृश्याऽविवेकाऽदर्शनयोर्विवेकसत्ताविपर्ययाश्रयत्वात् । अन्यथा स्थितेरभावप्रसङ्गात् ।

अतीन्द्रियत्वादप्रतिभासेऽपीन्द्रियादिष्विवादोष इति चेत् । न । ततोऽप्रतिपत्तिप्रसङ्गात्, अप्रसिद्धस्याऽज्ञापकत्वात् । संनिधिमात्रेण ज्ञापनेऽव्युत्पन्नानामपि स्यात् । नाऽनुमानात् प्रतिपत्तिः, लिङ्गाभावात्, दृष्टान्तासिद्धेः, तत्राप्यतीन्द्रियत्वेन साधनापेक्षणात् । तुल्यमिन्द्रियादिष्वपीति चेत् । न । तेषामन्यथानुमानात् । ज्ञानं हि केषुचित् सत्स्वपि व्यतिरेकान्वयवत्तन्मात्राऽसंभवं तद्व्यतिरिक्तापेक्षां च साधयति । ततः कार्यद्वारेणेन्द्रियसिद्धिः । नैवं संबन्धस्य । तस्याऽसिद्धौ तत्कार्यस्यैव ज्ञानस्याऽभावात् । न हि तत्र शब्दरूपमर्थो वा लिङ्गम्, तयोः सर्वत्र योग्यत्वात् विशेषप्रतीतिसमाश्रयस्याऽप्रत्यायनाद् अप्रतीतिरस्य । न ह्यसति संबन्धविशेषे सा युक्ता । तस्यां वा अनिमित्तायां तद्विशेषप्रतिनियमवदर्थप्रतिपादनमपि शब्दानामनिमित्तं किं नेष्यते ? तस्मात् तत्सदृशं लिङ्गं सर्वसंबन्धि । ततोऽविशेषेण गमयेत्ततोऽविशेषेणैव प्रतीतिः स्यात् [सर्वस्य] । सर्वस्य च त[27b]स्मात् संबन्धसिद्ध्याऽर्थप्रतीतेर्न कश्चित् संप्रदायमपेक्षेत ।

संप्रदायसहितस्य लिङ्गत्वमिति चेत् । तत् किमिदानीमनया परम्परया ? स एव संप्र-

दायापेक्षोऽर्थज्ञापनं [किं] न करोति ? स च शब्दो यदभिप्रायैः प्रयुज्यमानो दृष्टोऽन्यथा न दृष्टो दर्शनादर्शनाभ्यां धूमादिवत् तत्प्रतीतिं जनयतीति । स एव संबन्धोऽविनाभावाख्यः । न चात्रान्यस्य सामर्थ्यं पश्यामो नापि सिद्ध्युपायम् ।।

अथ पुनर्न शब्दार्थयोरन्य एव संबन्धः ।

ताभ्यामभेदे तावेव नाऽतोऽन्या वस्तुनो गतिः ।

रूपभेदनिबन्धनत्वाद्व्यवस्थान्तरस्य तद्रूपं तदेव स्यात् । धर्मभेदस्तु परिकल्पितः स्यात् पूर्वोक्तक्रमेण । स चाविरुद्ध एव न वस्तुभेदः । न च भेदाभेदौ मुक्त्वा वस्तुनोऽन्या गतिः, तस्य रूपलक्षणत्वाद्रूपस्य चैतद्विकल्पानतिवृत्तेः ।।

अपि च—

भिन्नत्वाद्वस्तुरूपस्य संबन्धः कल्पनाकृतः ।।२४०।।

इत्युक्तं प्राक् । न हि श्लेषलक्षणः संबन्धोऽश्लिष्टषु पदार्थेषु संभवति ।।

न चार्थान्तरमेषां संबन्धो यस्मात्

सद् द्रव्यं स्यात् पराधीनं संबन्धोऽन्यस्य वा कथम् ?

न हि सिद्धं सत् परमपेक्षते । नानपेक्षः स्वतन्त्रः संबन्धः । द्रव्यमिति च स्वभाव उच्यते । स कथं परभावस्य श्लेषः स्यात् ? न हि स्वभावान्तरसत्तयाऽन्यः श्लिष्टो नाम । मा भूदश्लिष्टेन, श्लिष्टेन तु स्यादिति चेत् । न, तस्यैव ताभ्यां श्लेषाऽसिद्धेः । स एवासिद्धो यस्तौ श्लेषयेत् । तदयमतिप्रसङ्गो यद्यर्थावर्थान्तरेण श्लिष्य(ये)ते[१] विशेषाभावात् ।

किंच—

वर्णा निरर्थकाः सन्तः पदादि परिकल्पितम् ।।२४१।।
अवस्तुनि कथं वृत्तिः संबन्धस्यास्य वस्तुनः ।

वाचको हि वचनाङ्गेन तद्वान् स्यात् । सन्तोऽप्यवाचका वर्णाः । तन्न तेषु वाच्यवाचकसंबन्धः । तद्वृत्तौ स्वरूपहानिप्रसङ्गात् ।

क्रमविशेषेण वाचका वर्णा इति चेत् । न । क्रमस्यानर्थान्तरत्वेनाभेदकत्वात् । तद्रूपस्य क्रमान्तरेऽप्यविशेषात् तुल्या स्यात् प्रतिपत्तिः । अर्थान्तरत्वमपि क्रमस्य निषेत्स्यामः । तदसति वर्णानां वाचकत्वे पदादि वाचकं स्यात् । तच्च न किंचित्, व्यतिरेकाऽव्यतिरेकविरोधात् ।

तस्मादिन्द्रियविज्ञानविशेषानुबन्धी सभागवासनोपादानविकल्पप्रतिभासविभ्रमः पदम्, वाक्यं चैकावभासि मिथ्यैव, एकानेकत्वायोगात् ।

---

[१] श्लिष्यतः—क०

न ह्येकम्, अनेकया बुद्ध्या क्रमेण ग्रहणायोगात् । न च तदेकया ग्राह्यम्, वर्णानुक्रमग्रहणात् । एकवर्णग्रहणकाले चानेकबुद्धिव्यतिक्रमात् क्षणिकत्वाद्बुद्धीनाम् क्षणस्यैकपरमाणुव्यतिक्रमकालत्वात् । आधिक्ये विभागवतः पर्यवसानाऽयोगात् । अनेकाणुव्यत्ययनिमेषतुल्यकालत्वादन्त्यवर्णपरिसमाप्तेः । यथानुभवं स्मरणात् स्मृतिरपि तत्कालैव । अनुभवस्मरणानुक्रमयोर्विशेषानुपलक्षणत्वाच्च ।

नाप्यनेकं पदादि, अभेदप्रतिभासनाद्बुद्धेः, तदनेकत्वस्य निषेत्स्यमानत्वाच्च ।

तन्न वस्तु, तस्यैतद्विकल्पानतिक्रमात् । वस्तु च संबन्धः । स कथं तदाश्रयः स्यात्, आश्रयणीयाऽयोगात् । अनाश्रितो ह्येवं स्यात् । तथा चासंबंध(बद्ध): ।

तस्मान्न स्वाभाविकः शब्दार्थयो संबन्धः । तदभिप्रायप्रयोगादुत्पन्नोऽभिव्यक्तो वा शब्दो तदव्यभिचारीति तत्त्वमस्य संबन्धः । सा चोत्पत्तिरभिव्यक्तिर्वाऽव्यभिचाराश्रयः पौरुषेयीति पौरुषेय एव संबन्धः । तद्द्वारेण चार्थप्रत्यायने [न] नियमः शब्दानामित्यपौरुषेयत्वेऽपि स एव विप्रलम्भः ॥

अपौरुषेयताऽपीष्टा कर्तॄणामस्मृतेः किल ॥२४२॥

याऽपीयमपौरुषेयता वेदवाक्यानां कर्त्तुरस्मरणाद्वर्ण्यते

सन्त्यस्याप्यनुवक्तार इति धिग्व्यापकं तमः ।

तस्यैव तावदीदृशं प्रज्ञास्खलितं कथं वृत्तमिति सविस्मयानुकम्पं नश्चेतः । तदपरेऽप्यनुवदन्तीति निर्दयाक्रान्तभुवनं धिग् व्यापकं तमः । कः प्राणिनो हितेप्साविप्रलब्धस्यापराधः ? तथा हि : स्मरन्ति सौगताः मन्त्राणां कर्तॄनष्टकादीन् । हिरण्यगर्भं च काणादाः । तेषां स मिथ्या[28a]वाद इति चेत् । क इदानिमेवं पौरुषेयोऽन्योऽपि ? कुमारसंभवादिष्वात्मानमन्यं वा प्रणेतारमुपदिशन्तो यदेवं प्रतिव्युह्येरन् । तत्र प्रतिवहनेऽभ्युपेतबाधेति चेत् । नन्विदमेवाभ्युपगमाङ्गमिति कस्य [केन] बाधा । तत् परस्यापि तुल्यमेव । तस्येष्टत्वाददोष इति चेत् । कुतोऽस्येयमिष्टिरप्रामाणिका प्रागासीत् ? अकस्माद्ग्राही चायं किं पुनः क्वचित् साधनमपेक्षते, यत् पौरुषेयाऽपौरुषेयचिन्तयाऽऽत्मानमायासयति ? तत एवेष्टेरनभ्युपेतबाधायां तदन्यस्यापि तुल्यमित्यनुपालम्भः । अनतिशयदर्शी चायं वाक्येष्वेवंप्रकाराणामपौरुषेयत्वसाधनानां कार्यधर्माणां वा क्वचिदतिशयमभ्युपैतीत्यप्रत्ययैवास्य वृत्तिः । दृश्यन्ते च विच्छिन्नक्रियासंप्रदायाः कृतकाश्च । तान् यत्नवन्त उपलभन्त इति चेत् । न । नियमाभावात् । अन्यत्राऽनुपलम्भस्योपलम्भस्य वा परोपदेशादप्रत्ययादनिश्चयार्हत्वात् । स्वयं कृतानामप्यपह्नोतृदर्शनात् निष्ठागमनस्याशक्यत्वात् ॥

यथाऽयमन्यतोऽश्रुत्वा नेमं वर्णपदक्रमम् ॥२४३॥

वक्तुं समर्थः पुरुषस्तथाऽन्योपीति कश्चन ।

तस्यापि तदेवोत्तरम् । एवमपौरुषेयत्वेऽपि किमिदानीं पौरुषेयमित्यादि ॥

तथाहि

अन्यो वा रचितो ग्रन्थः संप्रदायादृते परैः ॥२४४॥

दृष्टः कोभिहितो येन सोप्येवं नानुमीयते ।

न खलु किंचिदन्यदपौरुषेयत्वाश्रयोऽन्यत्रेदानीन्तनानामनुपदेशपाठाऽशक्तेः । सान्यत्राप्येकेन रचिते ग्रन्थेऽन्यस्य तुल्या । तदनुसारिणा सर्वस्तथानुमेयः, न वा कश्चित् । तस्य तथाऽनिष्टत्वादित्यादावप्युक्तम्—इष्टेस्तदाश्रयत्वादित्यादि ॥

अपि च—

यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत् ॥२४५॥

अदृष्टहेतुरन्योप्यविशिष्टः संप्रतीयते ।

नाऽदर्शनाद्धेतोरहेतुको नाम । अदृष्टहेतवोऽपि हि भावास्तदन्यैः स्वभावाऽभेदमननुभवन्तस्तथाविधाः समुन्नीयन्ते । [1]हेतुभूतनिवृत्तावपि तद्रूपमनिवृत्तम् । कार्यधर्मव्यतिक्रमान्न ततः स्यादिति न कश्चित्तथा वचनीयः, रूपविशेषो वा तथा दर्शनीयो य एनं हेतुमनुविदध्यात् येनेष्टाऽनिष्टयोरिष्टविपर्ययो न स्यात् । स्वभावनिवृत्तेश्च हेतोरभेदने भावानां भेदः स्यादाकस्मिक इति न क्वचिद्विनिवर्त्तेत । तस्माद् यः स्वभावो यज्जन्मा दृष्टः सोन्यत्राप्यविभज्यमानः स्वात्मना तत्कार्यधर्मतां नातिवर्त्ततेऽग्नीन्धनवत् ॥

तत्राप्रदर्श्य ये भेदं कार्यसामान्यदर्शनात् ॥२४६॥

हेतवः प्रवितन्यन्ते सर्वे ते व्यभिचारिणः ।

यथाऽऽद्योपि पथिककृतोऽग्निर्ज्वालान्तरपूर्वको नारणिनिर्मथनपूर्वकः, पथिकाग्नित्वादनन्तराग्निवदिति । कथं पुनः पथिकाग्नेर्व्यभिचारः ? ज्वालोद्भवसामर्थ्यं ह्याश्रित्य दहनस्य हेत्वन्तरं प्रतिक्षिप्यते । यदि हि विना ज्वालया स्यादन्यत्रापि स्यादिति । तत्र ज्वालेतरजन्मनोरबाध्यबाधकत्वे ज्वालाप्रभवत्वमन्यथाऽपि स्यादिति धर्मयोरेकत्रार्थे संभवात् स पथिकाग्निरन्यो वाऽर्थ एकप्रतिनियतो न स्यादित्याशङ्क्यते व्यभिचारः । सोप्यन्योन्यव्यतिरेकी धर्मद्वयावतारो वस्तुसामान्येऽविरुद्ध इत्युच्यते, नावस्थाभेदिनि विशेषे । निष्कलस्यात्मनस्तदतत्त्वविरोधात् । न च ज्वालेतरजन्मनोर्बाध्यबाधकता पथिकाग्नौ, तस्य ज्वालाव्यतिरेकेणाऽसंभवाऽभावात् । एवंभूतः पथिकाग्निर्ज्वालाप्रभव इति स्यात्, न सर्वः, तत्र विशेषप्रतिक्षेपस्य कर्तुमशक्यत्वात्, संभवद्विशेषस्य च तादवस्थ्याऽनियमात् । यदपि विना ज्वालया स्यादन्यत्रापि स्यादिति । भवत्येव, यया सामग्र्या संभवति, सा यदि स्यात्, अस्याः संभवं प्रदर्श्य तदभावं दर्शयेत् तत्र वा ज्वालाम्, [2]स्यादेतत् ।

तस्मान्नैकस्य परपूर्वमध्ययनं सर्वस्य तथाभावं साधयति । तस्यान्यथाऽसंभवाभावात् । तथाविधस्य तु तत्क्रियाप्रतिभारहितस्य तथा स्यादिति तथाभूतमेवं वाच्यं स्यात् । तदवि-

[1] हेतुरूप—क०   [2] स्यादेव—क०

शेषेण संभवद्विशेषमुच्यमानं छायां न पुष्णाति । कथं विशेषसंभवो यावता तेषामपि पुरुषाणामशक्तिरेव, इदानीन्तनपुरुषवत् ? अत्रापि न शक्तिपुरुषत्वयोः किंचिद्विरोधदर्शनमिति न[१] विरुद्धविधिरनुपलब्धिप्रयोगो ग[28b]मकः । न ह्यतीन्द्रियेषु विरोधगतिरस्तीत्युक्तम् । न चायं पूर्वप्रयोगाद्भिद्यते ।

यदि पुरुषाः शक्ताः स्युरिदानीन्तनाऽपीति विशेषाऽसंभवे एतत् स्यात् । स च दुःसाधः । यत्रैकस्याशक्तिस्तत्र [सर्व]पुरुषाणामित्यपि पूर्ववत् व्यभिचारि । भारतादिषु इदानीन्तनानामशक्तावपि कस्यचिच्छक्तिसिद्धेः ।

तस्मात् कारणानि विवेचयताऽर्थेष्वपि तदतत्प्रतिभवेषु स्वभावभेदो दर्शनीयः । तदभावे सर्वस्तदात्मा न वा कश्चित् । न चात्र लौकिकवैदिकयोः स्वभावभेदमुत्पश्यामः । असति तस्मिंस्तयोः सामान्यस्यैव दृष्टेरेकस्य कंचिद्धर्मं विवेचयंस्तत्स्वभावसंभविना तेनाऽऽशङ्क्य व्यभिचारवादः क्रियते ।

ननु वेदेतरयोस्तत्त्व[न्यत्व]लक्षणोऽस्त्येव विशेषः । सत्यमस्ति । न केवलं तयोरेव किं तर्हि डिण्डिकपुराणेतरयोरपि । न स्वप्रक्रियाभेददीपनो नामभेदः पुरुषकृतिं बाधते, अन्यत्रापि प्रसङ्गात् । यदि तादृशीं रचनां पुरुषाः कर्तुं न शक्नुयुः, कृतां वाऽकृतसंकेतो विवेचयेद्वचक्तमपौरुषेयो वेदः । ननु न शक्नुवन्त्येव पुरुषा मन्त्र[ान् कर्तु]म् । एतदुत्तरत्र विचारयिष्यामः ।

अपि च न मन्त्रो नामान्यदेव किंचित् । किं तर्हि ? सत्यतपःप्रभाववतां समीहितार्थसाधनं वचनम् । तदद्यत्वेऽपि पुरुषेषु दृश्यत एव, यथास्वं सत्याधिष्ठानबलाद्विषदहनादिसंस्तम्भनदर्शनात्, शबराणां च केषांचिदद्यापि मन्त्रकरणात्, अवैदिकानां च बौद्धादीनां मन्त्रकल्पानां दर्शनात् । तेषां च पुरुषकृतेः । तत्राप्य[पौरुषेयत्वे कथम]पौरुषेयमवितथम् ? तथा हि बौद्धेतरयोर्मन्त्रकल्पयोर्हिंसामैथुनात्मदर्शनादयोऽनभ्युदयहेतवोऽन्यथा च वर्ण्यन्ते । तत्कथमेकत्र विरुद्धाभिधायि द्वयं सत्यं स्यात् ? तत्रार्थान्तरकल्पने तदन्यत्रापि तुल्यमित्यर्थाऽनिर्णयात् क्वचिदप्रतिपत्तिः । तथा च सदप्यनुपयोगमपौरुषेयम् । बौद्धादीनाममन्त्रत्वे तदन्यत्रापि कोशपानं स्यात् करणीयम् । विषकर्मादिकृतो बौद्धा अपि दृश्यन्ते । तत्रामन्त्रत्वमपि विप्रतिषिद्धम् । मुद्रामण्डलध्यानैरप्यनक्षरैः कर्माणि क्रियन्ते । न च तान्यपौरुषेयाणि नित्यानि युज्यन्ते । तेषां क्रियासंभवेऽक्षररचनायां कः प्रतिघातः पुरुषाणाम् ? तस्मान्न किंचिदशक्यक्रियमेषाम् ।

कथमिदानीं सत्यप्रभवौ मन्त्रकल्पौ परस्परविरोधिनौ ? न वै सर्वत्र तौ सत्यप्रभवौ । प्रभावयुक्तपुरुषप्रतिज्ञालक्षणावपि तौ स्तः । स प्रभावो गतिसिद्धिविशेषाभ्यामपि स्यात् ।

यदि पौरुषेया मन्त्राः सर्वे पुरुषाः किं न मन्त्रकारिणः ? तत्क्रियासाधनवैकल्यात् । यदि तादृशैः सत्यतपःप्रभृतिभिर्युक्ता स्युः कुर्वन्त्येव ।

---

[१] नाविरु०—क०

अपि च । काव्यानि पुरुषः करोतीति सर्वः पुरुषः काव्यकृत् स्यात् । अकरणे नैव कश्चित्तद्वदित्यपूर्वैषा वाचो युक्तिः ।

सत्यं मन्त्रक्रियासाधनविकला मन्त्रान्न कुर्वन्ति । तत्तु कस्यचित् साकल्यं न पश्यामः, पुरुषाणां समानधर्मत्वात् । उक्तमत्र—न मन्त्रो नामान्यदेव किंचित् सत्यादिमतां वचनसमयादिति । तानि च क्वचित् पुरुषेषु दृश्यन्ते । सर्वपुरुषास्तद्रहिता इत्यपि तत्संभवविरोधाभावादनिर्णयः । न चात्यक्षस्वभावेषु अनुपलब्धिर्निश्चयहेतुः । न च स्मृतिमतिप्रतिबोध[1]सत्यशक्तयः सर्वपुरुषभाविन्यः । तत्साधनसंप्रदायभेदवद् गुणान्तरसाधनान्यपि स्युः । नापि सन्नपि सर्वो द्रष्टुं शक्तः । अत एवादृष्टस्यानपह्नवः । नापि पुरुषेषूत्पित्सोः कस्यचिद् गुणस्य प्रतिरोद्धा, बाध्यादृष्टेर्बाध्यबाधकभावासिद्धेः ।

एतेन सर्वज्ञानप्रतिषेधादयोऽपि [2]निर्णीतोत्तराः । तत्राप्येवंभूतो [29a] 'यादृशोऽयमसंभवन् तत्साधनसंप्रदायो न' इति न्यायो नादृष्टज्ञापकः, अतत्स्वभाव इत्यपि, सतामपि कार्यानारम्भसंभवात् । स्वभावविप्रकर्षेण द्रष्टुमशक्यत्वाच्च ।

तस्मादध्ययनमध्ययनान्तरपूर्वकमध्ययनादिति भारताध्ययनेऽपि भावाद्व्यभिचारि ।

ननु वेदेन विशेषणाददोषः । कः पुनरतिशयो वेदाध्ययनस्य यदन्यथाऽध्येतुं न शक्यते ? न हि विशेषणमविरुद्धं विपक्षेणास्माद्धेतुं व्यावर्त्तयति, अविरुद्धयोरेकत्र संभवात् । इदानीन्तनानामनध्ययनादिति चेत् । उक्तोत्तरमेतत् । अदर्शनादिति चेत् । इदमपि प्रतिव्यूढम् । नाप्यदर्शनमात्रमभावं गमयतीति व्यभिचार एव । तस्मान्न विशेषणमतिशयभागित्यनुपात्तसमम् ।

यत्किंचिद्वेदाध्ययनं सर्वं तदध्ययनान्तरपूर्वकमित्यपि व्याप्तिर्न सिध्यति । सर्वस्य तथाभावाऽसिद्धेः । यादृशं तु यन्निमित्तं दृष्टं तत्तथेति स्यात् । दृष्टे विशेषे तन्निमित्ततया तत्त्यागेन सामान्यग्रहणं व्यभिचार्येव हुताशनसिद्धौ पाण्डुद्रव्यत्ववत् ।

एतेन वचनादयो रागादिसाधने प्रत्युक्ताः ॥

अस्तु वेदमध्ययनपूर्वकतासाधनम् ।

सर्वथाऽनादिता सिध्येदेवं नाऽपुरुषाश्रयः ॥२४७॥
तस्मादपौरुषेयत्वे स्यादन्योऽप्यनराश्रयः ।

पुरुषा एव हि स्वयमभ्यूह्य परतो वाऽधीयते । नैषामव्यापृतकरणानां स्वयं शब्दा ध्वनन्ति,[3] येनाऽपौरुषेयाः स्युः । अपि स्युरपौरुषेया यदि पुरुषाणामादिः स्यात् । तदाप्यन्यपूर्वकत्वं न सिध्यति, अध्यापयितुरभावात्[4] । तत् प्रथमोध्येता कर्त्तैव स्यात् । तदयमनादिः पूर्वपूर्वदर्शनप्रवृत्तो डिम्भकपांशुक्रीडादिवत् पुरुषव्यवहार इति स्यात् नाऽपौरुषेय एव ॥

---

[1] प्रतिवेध क० [2] निर्वर्णितो० क०

[3] ध्वनयन्ति—क०

[4] एतत्पर्यन्तं तिब्बतीभाषातोनूदितम् श्रीसांकृत्यायनेन स्वसम्पादितवृत्तौ ।

अनादित्वादपौरुषेयत्वे बहुतरमिदानीमपौरुषेयम् । तथा च--

म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि ॥२४८॥
अनादित्वात्तथाभावः पूर्वसंस्कारसन्ततेः ।

म्लेच्छव्यवहारा अपि केचिन्मातृविवाहादयो मदनोत्सवादयश्चानादयो नास्तिक्यवचांसि चाऽपूर्वपरलोकाद्यपवादीनि । न हि तान्यनाहितसंस्काराः परैः प्रवर्त्तयन्ति । स्वप्रतिभारचितसमयानामपि यथाश्रुतार्थविकल्पसंहारेणैव प्रवृत्तेस्तत् किंचित् कुतश्चिदागतमित्येकस्योपदेष्टुः प्रबन्धेनाभावाद् अपरपूर्वकमित्युच्यते प्रागेव यथादर्शनप्रवृत्तयः सम्यग्मिथ्याप्रवृत्तयो लोकव्यवहाराः ।

नन्वादिकल्पिकेष्वदृष्टा एव व्यवहाराः पश्चात् प्रवृत्ता इष्यन्ते । न । तेषामप्यन्यसंस्काराहितानां यथाप्रत्ययं प्रबोधात् ॥

भवतु सर्वेषामपौरुषेयत्वमिति चेत् ।

तादृशेऽपौरुषेयत्वे कः सिद्धेऽपि गुणो भवेत् ॥२४९॥

काममविसंवादकमित्यपौरुषेयत्वमिष्टम् । तद्विसंवादकानामपि केषांचिदनादित्वादस्तीति किमपौरुषेयत्वेन ?

सति वा वेदवाक्यानामपौरुषेयत्वे

अर्थसंस्कारभेदानां दर्शनात् संशयः पुनः ।

यद्यपौरुषेयत्वेऽपि प्रतिनियतामेव तदर्थप्रतिभां जनयेदाश्वासनं स्यात् । यथेष्टं तु समारोपापवादाभ्यां नैरुक्तमीमांसकादयो वेदवाक्यानि विशसन्तो दृश्यन्ते । न च तेऽर्थास्तेषां न संघटन्ते । समयप्राधान्यादर्थनिवेशस्यैकस्यापि वाक्यस्यानेकविकल्पसंभवात् । प्रकृतिप्रत्ययानामनेकार्थपाठात् । रूढेरप्येकान्तेनाननुमतेः, अरूढशब्दबाहुल्यात्, तदर्थस्य पुरुषोपदेशापेक्षणात्, तदुपदेशस्य तदिच्छावृत्तेरनिर्णय एव वेदवाक्यार्थेषु ॥

अपि चायमपौरुषेयत्वं साधयन् वर्णानां वा साधयेद्वाक्यानां वा ? तत्र—

अन्याऽविशेषाद्वर्णानां साधने किं फलं भवेत् ॥२५०॥

न हि लोकवेदयोर्नाना वर्णाः । भेदेऽपि च प्रत्यभिज्ञाना[29b]विशेषात् तत एकत्वासिद्धिप्रसङ्गात् । भेदानुपलक्षणाच्च वैदिकवर्णासिद्धिः । प्रत्यभिज्ञानादप्रतिपत्तिप्रसङ्गात्, अनभ्युपगमाच्च । तेषां चापौरुषेयत्वप्रसाधने ते तुल्याः सर्वत्रेति किमनेन परिशेषितम् । तथा च सर्वो व्यवहारोऽपौरुषेयो न च सर्वोऽवितथ इति व्यर्थः परिश्रमः ॥

अथ वाक्यमपौरुषेयमिष्टम् ।

वाक्यं न भिन्नं वर्णेभ्यो विद्यतेऽनुपलम्भनात् ।

न हि वयं देवदत्तादिपदवाक्येषु दकारादिप्रतिभासं [मुक्त्वाऽन्यं प्रतिभासं] बुद्धेः पश्यामो द्वितीयवर्णप्रतिभासवत् । न चाप्रतिभासमानं ग्रहणे ग्राह्यतयेष्टमस्त्यन्यद्वेति शक्यमवसातुम्, आकारान्तरवत् । अन्याऽसंभवि कार्यं गमकमिति चेत् । स्यादेतद्यदि तेषु वर्णेषु सत्स्वपि तत्कार्यं न स्यात् । न भवति, तेषामविशेषेऽपि पदवाक्यान्तरेष्वभावादिति चेत् । न । तेषामविशेषासिद्धेः । अविशेषः प्रत्यभिज्ञानात् सिद्ध इति चेत् । न । तस्य व्यभिचारात्, अनिदर्शनत्वाच्च । वर्णाऽविशेषेऽपि वाक्यभेदात् प्रतिपत्तिभेदः कार्यभेदः स्यात् । सा च वाक्यात् । तच्चातीन्द्रियमिति कुतः स्यात् ? सन्निधानमात्रेण जननेऽव्युत्पन्नस्याऽपि स्यात् ।

तस्माद्वाक्यं न नाम किंचिदर्थान्तिरं वर्णेभ्यो यस्याऽपौरुषेयत्वं साध्येत । तदभावाद्वेदाऽविशिष्टवर्णाऽपौरुषेयत्वमपि प्रथमपक्षे प्रत्युक्तम् ॥

अपि च—अस्तु नामार्थान्तरं वाक्यम् । तदनेकावयवात्मकं वा स्यादनवयवं वा ?

अनेकावयवात्मत्वे पृथक्तेषां निरर्थता ॥२५१॥

तेऽपि तस्य बहवोऽवयवाः पृथक् प्रकृत्या यद्यनर्थकाः ।

अतद्रूपे च ताद्रूप्यं कल्पितं सिंहतादिवत् ।

अर्थवानेवात्मा वाक्यम् । ते चावयवाः स्वयमनर्थकाः । तेषु स आत्मा कल्पनासमारोपितः स्यात् सिंहतादिवत् माणवकादिष्विति पौरुषेय एव ॥

अथ मा भूदेष दोष इति प्रत्येकं तेऽवयवाः सार्थका इष्यन्ते ।

प्रत्येकं सार्थकत्वेऽपि मिथ्याऽनेकत्वकल्पना ॥२५२॥
एकावयवगत्या च वाक्यार्थप्रतिपद्भवेत् ।

परिसमाप्तार्थं हि शब्दरूपं वाक्यम् । ते चावयवाः तथाविधाः पृथक् पृथगिति प्रत्येकं ते वाक्यम् । तथा च नानेकावयवं वाक्यम् । एकावयवप्रतिपत्त्या च वाक्यार्थप्रतिपत्तेरवयवान्तरापेक्षा कालक्षेपश्च न स्यात् । तस्य निष्कलात्मनः क्षणेन प्रतिपत्तेरेकज्ञानोत्पत्तौ निःशेषावगमात् । अन्यथा चैकत्वविरोधात् ॥

सकृच्छ्रुतौ च सर्वेषां कालभेदो न युज्यते ॥२५३॥

मा भूदवयवान्तराऽप्रतीक्षणेनैकस्मादेवावयवाद्वाक्यार्थसिद्धेरनेकावयवत्वहानिर्वाक्यस्येति सकृत् सर्वावयवानां श्रवणमिष्यते । तदापि कालक्षेपो न युक्त एव, एकावयवप्रतिपत्तिकाल एव सर्वेषां श्रवणात् । क्रमश्रवणे च पृथगर्थवतामेकस्मादेव तदर्थसिद्धेरन्यस्य वैयर्थ्यात् । सकृच्छ्रुतौ च पृथगर्थेष्वदृष्टसामर्थ्यानामर्थवत्ता च न सिध्यति । सहितेष्वर्थदर्शनाददोष इति चेत् । न । पृथगसतो रूपस्य संघातेप्यसंभवात्, अर्थान्तरानुत्पत्तेश्च । शब्दोत्पत्तिवादिनस्तावदयमदोष एव, पृथगसमर्थानामप्यवयवानामुपकारविशेषादतिशयवतां कार्यविशेषोपयोगात् । प्रत्येकं त्ववयवेषु समर्थेषु व्यर्था स्यादन्यकल्पना ॥

अथ पुनरेकमेवानवयवं वाक्यम् । तत्र

एकत्वेऽपि ह्यभिन्नस्य क्रमशो गत्यसंभवात् ।

कालभेद एव न युज्यते । न ह्येकस्य क्रमेण प्रतिपत्तिर्युक्ता गृहीताऽगृहीतयोरभेदात्, गृहीतागृहीताभावात् । क्रमेण च वाक्यप्रतिपत्तिर्दृष्टा, सर्ववाक्यव्याहारश्रवणस्मरणकालस्यानेकक्षणनिमेषानुक्रमपरिसमाप्तेः । वर्णरूपाऽसंस्पर्शिनश्च शब्दात्मनोऽप्रतिभासनात, वर्णानुक्रमप्रतीतेः । तदविशेषेऽप्यनुक्रमकृतत्वाद्वाक्यभेदस्यानुक्रमवती वाक्यप्रतीतिः । वर्णानु-[30a]क्रमोपकारानपेक्षणे तैर्यथा कथंचित् प्रयुक्तैरपि यत् किंचिद्वाक्यं प्रतीयेत, विना वा वर्णैस्तैरनुक्रमवद्भिरक्रमस्योपकारायोगाद्, अक्रमेण च व्याहर्त्तुमशक्यत्वात्, गत्यन्तराभावाच्च नैव वाक्ये वर्णाः सन्ति ।

तदेकमेव शब्दरूपं व्यञ्जकानुक्रमवशादनुक्रमवद्वर्णविभागवच्च प्रतिभातीति चेत् । अनुक्रमवता व्यञ्जकेनाक्रमस्य व्यक्तिः प्रत्युक्ता, व्यक्ताव्यक्तविरोधात् । अवर्णभागे च वाक्येऽसकलश्राविणोऽसकलवाक्यगतिर्न स्यादेकस्य स(श)कलाभावात् । सकलश्रुतिर्न वा कस्यचित् ।

समस्तवर्णसंस्कारवत्यान्त्यया बुद्धचा वाक्यावधारणमित्यपि मिथ्या, तस्यावर्णरूपसंस्पर्शिनः कस्यचित् कदाचिदप्रतिपत्तेः, वर्णानां चाक्रमेणाप्रतिपत्तेः कुतोऽक्रममेकबुद्धिग्राह्यं वाक्यं नाम ? न चान्त्यवर्णप्रतिपत्तेरूर्ध्वमन्य[म]स(श)कलं शब्दात्मानमुपलक्षयामः ।

[1]नापि स्वयमप्ययं वक्ता विभावयति । केवलम् 'एवं यदि स्यात् साधु मे स्यादिति' कल्याणकामतो मूढमतिरन्त्यायां बुद्धौ समाप्तकलः शब्दो भातीति स्वप्नायते । न हि स्मर्यमाणयोरपि पदवाक्ययोर्वर्णाः क्रमविशेषमन्तरेण विभाव्यन्ते । अक्रमायां बुद्धौ पौर्वापर्याऽभावात् तेषां तत्कृतः पदवाक्यभेदानां भेदो न स्यात् ।।

नाप्यवर्णक्रममन्यत् शब्दरूपं पश्याम इत्युक्तम् । सति वा तदनित्यं वा स्यान्नित्यं वा ? यदि—

अनित्यं यत्नसंभूतं पौरुषेयं कथं न तत् ।।२५४।।

अवश्यं ह्यनित्यमुत्पत्तिमत् कुतश्चिद् भवति । तथा ह्याकस्मिकत्वे सत्यस्य देशादिनियमो न स्यादित्युक्तम् । तच्च यत्नप्रेरिताऽविगुणकरणानां दृष्टमन्यथा नेति कारणधर्मदर्शनात् पुरुषव्यापार एव कारणम् । अतः पौरुषेयं स्यात् ।।

नित्योपलब्धिर्नित्यत्वेऽप्यनावरणसंभवात् ।

अथ तच्छब्दरूपं नित्यं स्यादुपलभ्यस्वभावं च । स तस्य स्वभावः कदाचिन्नापैतीति

---

[1] इतः तिब्बतीभाषातोऽनूदितं श्रीसांकृत्यायनेन स्वसंपादितवृत्तौ ।

नित्यमुपलभ्येत । एवं हि स नित्यः स्यात् यदि न कुतश्चिदपि सामर्थ्यात् प्रच्यवेत् । ज्ञान-जननसामर्थ्यस्य तदात्मकत्वात् । अर्थान्तरस्य च प्रागेव निषिद्धत्वात् ।

नापि तस्योपलभ्यात्मनः किंचिदुपलम्भावरणं संभवति । तस्य सतोऽपि तदात्मानमखण्ड-यतः सामर्थ्या(र्थ्य)तिरस्कारायोगात् । न हि तत्रातिशयमनुत्पादयन् किंचित्करो नाम । अकिंचित्करश्च कः कस्यावरणमन्यद्वेति निर्लोठितप्रायमेतत् ।

कुड्यादयो घटादीनां कमतिशयमुत्पादयन्ति, खण्डयन्ति वा येनावरणमिष्यन्ते ? न ब्रूमस्ते किंचिदतिशाययन्ति । अपि तु न सर्वे घटक्षणाः सर्वस्येन्द्रियविज्ञानहेतवः । परस्परसहिता-स्तु विषयेन्द्रियाऽऽलोकाः परस्परतो विशिष्टक्षणान्तरोत्पादात् विज्ञानहेतवः, अनुपकार्यस्याऽपेक्षाऽ-योगात् । शक्तस्वभावस्य नित्यं जननमजननं वाऽन्यस्य सर्वदा स्यादित्युक्तम् । ते चाव्य-वहिताः प्रतिघातिनाऽन्येनान्योन्यस्योपकारिणः, अव्यवधानदेशयोग्यतासहकारित्वात् तेषामन्यो-न्यातिशयोत्पत्तेः । व्यवधाने हेत्वभावात् समर्थक्षणान्तरानुत्पत्तेर्ज्ञानानुत्पत्तिः । तस्मात् पूर्वोत्पन्नसमर्थनिरोधात्, सति [च] कुड्येऽन्यस्योत्पित्सोः कारणाभावेनाऽनुत्पत्तेः कारणवैकल्यात ज्ञानानुत्पत्तिरिति कुड्यादय आवरणमुच्यन्ते । न [पुनः] प्राग्योग्यस्य प्रतिबन्धात्, तस्य स्वभावादप्रच्युतेः ।

अथवा संभवत्यपि भावानां क्षणिकानामन्योन्योपकारः, अचिन्त्यत्वाद्धेतुप्रत्ययसामर्थ्य-स्याऽसर्वविदा । तेन यदिन्द्रियविषयमध्यस्थितमावरणं [तत्] तौ विज्ञानोपत्तिवैगुण्यतारतम्य-भेदेनातिशाययेदपि, आवरणभेदेन शब्दादौ श्रुतिमान्द्यपाटवदर्शनात् । अन्यथा क्वचिदप्य-किंचित्करस्य सन्निधानस्याप्यसन्निधानतुल्यत्वात्तस्येदमित्युपसंहारो विकल्पनिर्मित एव स्यात्, [30b]न वस्त्वाश्रयः । न च समारोपाऽनुविधायिन्योऽर्थक्रियाः । न हि माणवको दहनोप-चारादाधीयते पाके । तस्मात् सत्यामपि [१]विकल्पनायामतत्परावृत्तयो भावाः यथा-स्वभाववृत्तय एव स्युः । तत् सत्यप्यावरणे ज्ञापयेयुरेवेन्द्रियादयः । न च[२] तथा । तस्मात् तेनाऽऽधेयविशेषा इति गम्यन्ते । न खल्वेवं नित्यानां शब्दानां कस्मिंश्चित् सत्यतिशयहानि-रुत्पत्तिर्वा । तद्यदि तेषां ज्ञानजननः स्वभावः; सर्वस्य सर्वदा सर्वविषयाणि ज्ञानानि सकृज्ज-नयेयुः । नो चेन्न कदाचित् कस्यचित् किंचिदित्येकान्त एषः ॥

अश्रुतिर्विकलत्वाच्चेत् कस्यचित् सहकारिणः ॥२५५॥

स्यादेतत्—नावरणान्नित्यं सर्वे शब्दा न श्रूयन्तेऽपि तु किंचित्तेषां प्रतिपत्तौ सहकारि प्रतिनियतमस्ति । तत् कदाचिद्भवतीति तत्कृतमेषां कदाचित् क्वचिच्छ्रवणमिति ॥

काममन्यप्रतीक्षास्तु नियमस्तु विरुध्यते ।

न वै वयं कारणानां सहकारीणि प्रतिक्षिपामः । किं त्वपेक्षन्त एव कारणानि तदवस्थो-पकारिणम्, ततो लभ्यस्यातिशयस्य कार्योपयोगात् । तथा शब्दोऽपि यदि किंचिदपेक्ष्य कार्यं

---

१ मपि कल्प० क०   २ न चैवं—क०

कुर्यात्, करोतु । पूर्वस्वभावनियत इत्येतन्न स्यात्, तस्य प्रच्युतेः, अपेक्षाच्च स्वभावान्तरप्रतिलम्भात् । न ह्यनुपकार्यपेक्ष्यते इत्युक्तमेतत् । तदुपकारस्य चार्थान्तरत्वे तस्येति सम्बन्धाऽभावादयोऽप्युक्ताः । तस्य चाज्ञेयत्वं उपकारादेव ज्ञानोत्पत्तेः ।

तस्मादेष शब्दो नेन्द्रियं न सन्निकर्षं नात्मानमन्यद्वा किंचित् ज्ञानोत्पत्तिसमाश्रयं स्वज्ञानजननेऽपेक्षते, सर्वस्य तत्राऽकिंचित्करत्वात् ॥

अपि चैते शब्दा व्यापिनो वा स्युरव्यापिनो वा ?

सर्वत्रानुपलम्भः स्यात्तेषामव्यापिता यदि ॥२५६॥

कथमेकदेशवर्त्तिनं तच्छून्यदेशस्थित उपलभेत ? अप्राप्तग्रहणपक्षेऽदोष इति चेत् । न । तत्रापि योग्यदेशस्थितितारतम्यापेक्षणादयस्कान्तादिवत् । अन्यथा स्पष्टाऽस्पष्टश्रुतिभेदो न स्यात् । सति चोपलम्भप्रत्यये सर्वत्र देशे तुल्यमुपलभ्येरन् । तस्मान्नाऽव्यापिनः ॥

सर्वेषामुपलम्भः स्याद्युगपद्व्यापिता यदि ।

न हि कश्चिच्छब्दः क्वचिन्नास्तीति सर्वे युगपदुपलभे(भ्ये)रन् । सर्वदेशस्थितैश्च योग्येन्द्रियत्वाद्विषयसन्निधानादप्रतिबन्धाच्च ॥

संस्कृतस्योपलम्भे च कः [1]संस्कर्त्ताऽविकारिणः ॥२५७॥

स्यादेतत्—सन्नपि न सर्वः शब्द उपलभ्यते सर्वेण, संस्कृतस्य संस्कृतेनैवोपलम्भादिति । तत्र न संस्कृतस्योपलम्भोऽनाधेयविकारस्य संस्कारायोगात् ।

इन्द्रिये[2] स्याद्धि संस्कारः श्रृणुयान्निखिलं च तत् ।

तत्र यदि संस्कृतेनोपलम्भ इत्यसंस्कृतेन्द्रियो नोपलभेत । यस्य संस्कार इन्द्रियस्य कृतः स सर्वशब्दान् युगपत् श्रृणुयादिति प्रसङ्गोऽनिवृत्त एव ।

संस्कारभेदा[3]द्भिन्नत्वादेकार्थनियमो यदि ॥२५८॥
अनेकशब्दसंघाते श्रुतिः कलकले कथम् ।

अथापि स्यात्—प्रतिनियताः संस्काराः शब्दानाम् । तत्र केनचित् संस्कृतमिन्द्रियं कस्यचिदेव ग्राहकमिति न युगपत् सर्वशब्दश्रुतिरिति । संस्कारविशेषात् श्रुतिनियमे इन्द्रियाणामनेकशब्दसंघातस्य कलकलस्य श्रुतिर्न स्यात् । न ह्येकः शब्दः कलकलो नाम भिन्नस्वभावानां युगपच्छ्रवणात् । स्वभावभेदाश्रयत्वाच्च भेदव्यवस्थितेः । लघुवृत्तेः सकृच्छ्रुतिभ्रान्तिरिति चेत् । वंशादिस्वरधारायां गमकावयवोपसंहारात् संकुला प्रतिपत्तिः स्यात् । वक्ष्यते चात्र प्रतिषेधः । तस्मादेकगति[4]शक्तिप्रतिनियमादिन्द्रियस्याऽनेकात्मा कलकलो न श्रूयेत् (त) ।

---

[1] संस्कर्त्ता विका० क०
[2] इन्द्रियस्य तु संस्कारः—क०
[3] भेदभिन्न—क०
[4] गतौ—क०

ध्वनयः केवलं तत्र श्रूयन्ते चेन्न वाचकाः ॥२५९॥

न वै कलकले वर्णपदवाक्यानि श्रूयन्ते । ध्वनीनामेव केवलानां श्रवणात् । वाचके च प्रतिनियतशक्तीन्द्रियं न ध्वनिषु । तत्र

ध्व[31a]निभ्यो भिन्नमस्तीति श्रद्धेयमि(म)तिबह्विदम् ।

न हि वयं ध्वनिं शब्दं [च] वाचकं पृथग्रूपमुपलक्षयामः । एकमेवैकदा वर्णानुक्रमश्रवणे शब्दात्मानं व्यवस्यामः । तत् कथं व्यवसायपूर्वकं व्यवहारमध्यवस्यन्तः प्रवर्त्तयामः । तस्माद् ध्वनिविशेष एवायं वर्णाद्याख्यः ॥

अपि च

स्थितेष्वन्येषु शब्देषु श्रूयते वाचकः कथम् ॥२६०॥

[न] ध्वनिरतो भिन्नरूपस्तेन सह पृथग्वा । न हि प्रत्यक्षेऽर्थे परोपदेशो गरीयान् । तदयं स्थितेष्वन्येषु व्याहृत्तृषु केवलमेव शब्दं शृण्वंस्तदुपलम्भप्रत्ययानां तदन्यनिष्पादने सामर्थ्याभावं प्रत्येति यदि समर्थाः स्युस्तत्साधितं तदुपलभ्येत ।

तत्स्वभावा एव प्रत्ययाः कथं कलकलेऽर्थान्तरमारभेरन् । न हि कारणाभेदे कार्यभेदो युक्तः, भेदस्याऽहेतुकत्वप्रसङ्गादित्युक्तम् । न च कलकले वाचका न श्रूयन्ते, पदवाक्यविच्छेदानामुपलक्षणात् ॥

कथं वा शक्तिनियमाद्भिन्नध्वनिगतिर्भवेत् ?

तानि प्रतिनियतशक्तीन्यपीन्द्रियाणि नानारूपान् प्रतिशब्दनियतान् ध्वनीन् शृण्वन्ति, न त्वेवं शब्दानिति कः शब्देष्वेषां निर्वेदः ?

यदुक्तम्—न ध्वनयो भेदेन वाचकेभ्यः सिद्धा इति । कथं न सिद्धाः ? वचनादर्थप्रतिपत्तेः । न हि ध्वनिभागादल्पीयसी(सः) प्रतीतिः । न च सोऽन्यं समेति । तदियं समस्तपदवाक्यरूपसाध्याऽर्थप्रतीतिरसमस्तभागेषु ध्वनिषु न संभवतीति सिद्धमक्रमसत्त्वं शब्दरूपं क्रमवद्भागश्च ध्वनिरिति ।

तन्न । अक्रमस्य क्रमवद्वर्णव्यतिरेकिणः प्रागेव निषिद्धत्वात् । अतिप्रसङ्गश्चैवम्—कर्मभागानां पूर्वेणाऽपरस्याप्रतिसंधानात्, एकांशाच्चाप्रतिपत्तेस्तद्व्यतिरेकी हस्तसंज्ञादिषु प्रतिपत्तिहेतुः समस्तरूपः कर्मात्माऽप्यभ्युपगम्यः स्यात् शब्दवदेव । क्रमभाविन एव तु यथास्वं करणप्रयोगात् भिन्ना वर्णभागाः, कर्मभागा वा क्रमेण विकल्पविषया यथासंकेतमर्थप्रतीतिं जनयन्तीति न्याय्यम् ॥

किं च—

ध्वनयः सम्मता यैस्ते दोषैः कैरप्यवाचकाः ॥२६१॥

ध्वनिभिर्व्यज्यमानेऽस्मिन् वाचकेऽपि कथं न ते ।

क्रमोत्पादिभिर्ध्वनिभागैर्व्यक्तः किल वाचको वक्ति । तमपि ते नैव सकृत् प्रकाशयन्ति, क्रमभावात् । नाप्येक एव भागः, तदन्यवैयर्थ्यप्रसङ्गात्, एकवर्णभागकाले च समस्तरूपानुपलक्षणात् । तदयमप्रतिसंहितसकलोपलम्भो ध्वनिवदुपलम्भसाकल्यसंनिधान-साध्यमर्थं कथं साधयेत् ? को हि विशेषोऽत्यन्तानुपलम्भे सदसदतोरुपलम्भसाध्येष्वर्थेषु ? न च संनिधानमात्रेण साधनः, व्यक्त्यपेक्षणात् । सा चेयं क्रमभाविनी सदसतोस्तुल्योपयोगेति ध्वनिभिरशक्यसाधनं कार्यं तत्रापि तथेत्यलमन्येन । तस्मान्न वर्णेषु [नापि] वाक्येऽपौरुषेयता ॥

वर्णानुपूर्वी वाक्यं चेत् न वर्णानामभेदतः ॥२६२॥

नार्थान्तरमेव शब्दरूपं वाक्यमपौरुषेयम् । किं तर्हि ? वर्णानुक्रमलक्षणं हि नो वाक्यम् । तदपौरुषेयं साध्यमिति चेत् । न । वर्णानामानुपूर्व्या अभेदात् । नेयमर्थान्तरं वर्णेभ्यः, दृश्यायां विभागोपलम्भप्रसङ्गात् । अदृश्यायां ततोऽप्रतिपत्तेः,[१] लिङ्गाभावात् । भेदवत्याश्चानुपूर्व्या अभावे वर्णमात्रमविशिष्टं सर्वत्रेति पूर्ववत् प्रसङ्गः ।

तेषां च न व्यवस्थानं क्रमान्तरविरोधतः ।

यद्यऽकृतकानुपूर्वी वर्णानाम्, ते च न बहवः समानजातीयाः येन केचिद्व्यवस्थितक्रमाः स्युः, अन्ये यथेष्टपरावृत्तयः । किं तर्हि ? एक एव त्रैलोक्येऽकारस्तथा गकारः । तदाग्नि-रित्येव स्यान्न गगनमिति, अकारगकारयोः पूर्वापरभावस्य व्यवस्थितत्वात् । कृतकानामपि हेतुपरिणामनियमवतामशक्यः क्रमविपर्ययः कर्त्तुं यथा बीजाङ्कुरपत्रादीनाम्, ऋतुसंवत्सरादीनां च । किं पुनरचलिताऽवस्थास्वभावानामकृतकानां कथंचित् स्थितानाम्, पूर्वावस्थात्यागम-न्तरेणान्यथाभावाऽयोगात् । त्यागे वा विनाशप्रसङ्गात् । विशेषेण नित्यायामानुपूर्व्याम् । [31b]तदेतत् प्रतिपदं वर्णान्यत्वेऽपूर्वोत्पादात्, वर्णबाहुल्याद्वा स्यात् । तच्चाऽनभिमतम् ॥

अपि च—

देशकालक्रमाभावो व्याप्तिनित्यत्ववर्णनात् ॥२६३॥

सा चेयमानुपूर्वी वर्णानां देशकृता वा स्याद्यथा पिपीलिकानां पङ्क्तौ, कालकृता वा यथा बीजाङ्कुरादीनाम् । सा द्विविधाऽपि वर्णेषु न संभवति, व्याप्तेर्नित्यत्वाच्च । अन्योन्यदेशपरिहारेण वृत्तिर्हि देशपौर्वापर्यम् । तत्सर्वस्य सर्वेण तुल्यदेशत्वाद्वर्णेषु न संभवति, वातातपवदात्मादिवच्च । तथा कालपरिहारेण वृत्तिः कालपौर्वापर्यम् । यदैको नास्ति तदान्यस्य भावात् । तदपि नित्येषु न संभवति । सर्वदा सर्वस्य भावात् । न चान्या गति-रस्ति । तत्कथं वर्णपौर्वापर्यं वाक्यं यदपौरुषेयं साध्येत ॥

अनित्याऽव्यापितायां च दोषः प्रागेव कीर्त्तितः ।

---

[१] ततोऽर्थाप्रतिपत्तिप्रसंगात्—क०

अथ मा भूदयं दोष इत्यनित्यान्, अव्यापिनश्च वर्णानिच्छेत्। तावपि पक्षौ प्रागेव निराकृतावित्यपरिहारः ।।

व्यक्तिक्रमोऽपि वाक्यं न नित्यव्यक्तिनिराकृतेः ।।२६४।।

न वर्णानां रूपानुपूर्वी वाक्यम् । किं तर्हि ? तद्व्यक्तेः । सा यथास्वं वर्णाभिव्यक्तिप्रत्ययक्रमाद्भवन्ती क्रमयोगिनीति तदानुपूर्वी वाक्यमित्यपि मिथ्या, तस्या नित्येषु प्रागेव निषिद्धत्वात् । कार्यताविशेष एव साक्षाच्छक्त्युपधानेना(न) ज्ञानजन[1][नासमर्था]नां व्यक्तिरित्याख्यातमेतत् ।

व्यापारादेव तत्सिद्धेः करणानां च कार्यता ।

[2][यत् खलु रूपं यत एवोपलभ्यते, तस्य तदुपलब्धिनान्तरीयकामुपलब्धिमेवाश्रित्य लोकः कार्यतां प्रज्ञापयति । सा वर्णेऽप्यस्ति । सैव चान्यत्रापि । तदाश्रयो न विशेषः । तत् कथं तुल्येऽभ्युपगमनिबन्धने न वर्णाः कार्याः ?

न चैतदुपलब्ध्याश्रया कार्यतास्थितिः । किन्तर्हि ? यत्सत्येव भवतीति सत्ताश्रया । सा सत्ता कुतः सिद्धा, येन कार्यतां साधयेत् ? न ह्यसिद्धायामस्यामेवं भवतीति । तस्मात् सत्तासिद्धिस्तत्साधनी । सा चोपलब्धिरेव ।

सत्यमेवं यदि तस्य प्राङ न सत्ता सिद्धा स्यात्। सा हि सत्तासिद्धिः कार्याऽसिद्धिपूर्विका । ननु तद्रूपमसिद्धमेव यत् तथाभूतविज्ञानाव्यवधानोपयोगि । सिद्धमेव तदन्यवैकल्यान्नोपयुक्तमिति चेत् । कथमिदानीमुपयुक्तानुपयुक्तयोरभेदः ? नापि भेदः शब्दस्वभावाऽसंस्पर्शी, तस्यैवातिशयस्योपयोगसिद्धेस्तस्याकारणत्वप्रसङ्गात् । यस्यैव भावे साध्यसिद्धिः तदेव हि तत्रोपयोगि युक्तम् । तदतिशयोपयोगेऽप्यस्य तद्वत्प्रसङ्गः ।

तस्मादतिशेत एवाऽव्यवहितसामर्थ्योपयोगोऽवस्थाभेदस्तदन्यम् । [3][अनतिशयस्यापेक्षा] प्रागेव निरस्ता ।

स च करणव्यापारादेव सिद्ध इति सर्वकार्यतुल्यधर्मा । तस्य तादृशस्य व्यक्तौ सर्वं व्यङ्ग्यम्, न वा किञ्चिदपि, अविशेषात् ।।

तथाहि—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः ।।२६५।।

---

[1] एतत् पर्यन्तं तिब्बतीभाषातोऽनूदितं श्रीसांकृत्यायनेन स्वसंपादितवृत्तौ

[2] प्रतौ [ ] कोष्ठकान्तर्गतं पृ० ९३. पं० ८ पर्यन्तं नास्ति । श्रीसांकृत्यायनसम्पादितवृत्तितो मुद्रितमत्र ।

[3] अत्र मुद्रिते 'विकल्पान्नोपयुक्तमिति चेत् प्रागेव निषिद्धा' इत्येवं पाठोस्ति । किन्त्वत्र क० वृत्त्यनुसारी स्वीकृतः ।

यथा दीपोऽन्यथा वापि को विशेषोऽस्य कारकात् ।

स्वप्रतिपत्तिद्वारेणान्यप्रतिपत्तिहेतुर्लोके व्यञ्जकः सिद्धो दीपादिवत् स चेत् प्राक् सिद्धः स्यात् । समानजातीयोपादानलक्षणसिद्धेर्न तस्यैवातिशयस्य ज्ञानहेतोः, तस्य तत्सामग्री-प्रत्ययत्वात् ।

ये पुनरसिद्धोपलम्भकाः कारका एव, कुलालादिवत् घटादौ ।

प्रत्यभिज्ञानादयोपि सिद्धिहेतवो न हेतुलक्षणम् पुष्णन्ति ।

यदपि किञ्चिदुत्तरा अकारप्रतीतिः 'अ'प्रतीतेः पुर्वाऽभिन्नविषया तद्वदित्यादि, तदपि न स्वलक्षणयोरभेदसाधने समर्थम्, तत्स्वभावाऽसिद्धेः ।

सामान्येन वचने भिन्नविषयत्वस्याप्यविरोधः । एकविषययोश्च प्रतीत्योः पूर्वापरभा-वाऽयोगात् । सन्निहितासन्निहितकारणत्वेनोत्पादानुत्पादात् । सन्निधानेऽप्यनुत्पन्नस्यातत्का-रणत्वात् तयोर्भिन्नाखिलकारणत्वम् । तत्रैकाभेदेऽपि शक्तस्याप्रतीक्षणात् युक्तिविरुद्धं पूर्वा-परयोः प्रतीत्योरेकविषयत्वम् । प्रतीतिप्रतिभासस्वभावभेदेपि नामसाम्यादेकविषयत्वमप्य-युक्तम्, घटादिष्वपि प्रसङ्गात् । तत्र दृष्टविरोधादसाधनत्वमिति चेत् । इहापि विरोधा-भावः केन सिद्धः ? यावत् तथाभिधेयतार्थभेदेन व्याप्तो न साध्यते तावत् सन्दिग्धो व्यतिरेकः । प्रतिकरणभेदं च भिन्नस्वभावः शब्दः श्रुतौ निविशमानो यदैकः साध्यते किन्न घटादयः ? तत्रापि शक्यमेवं व्यञ्जकभेदात् प्रतिभासभेद इति प्रत्यवस्थातुम् ।।

करणानां समग्राणां व्यापारादुपलब्धितः ॥२६६॥

नियमेन च कार्यत्वं व्यञ्जके तदसम्भवात् ।

न हि कदाचिदव्यापृतेषु करणेषु शब्दानुपलब्धिः । न चावश्यं व्यञ्जकव्यापारोऽर्थ-मुपलम्भयति, क्वचित् प्रकाशेऽपि घटाद्यनुपलब्धेः ।

सेयं नियमेनोपलब्धिस्तद्व्यापाराच्छब्दस्य तदुद्भवे स्याद् । अकर्तुर्व्यापारेपि तत्सिद्धययोगात् व्यापिनित्यत्वादुपलम्भ इति चेत् । क इदानीं घटादिषु समाश्वासः ? तेषां तथाऽनिष्टेरिति चेत् । शब्दः किमिष्टः तत्समानधर्मा । न चास्य कश्चिदतिशय इत्युक्तम् । प्रतिषिद्धे च व्यापिनित्यते ।

घटादीनां व्यञ्जकान्तरसंभवाददोषः । प्रकाशो ह्येषां व्यञ्जकः सिद्धः । कुलालादीनां व्यञ्जकत्वे तादृशा एव स्फुरन्ति अतिशेरते च ततो व्यञ्जकातिशयात् कारका एव उपकारकस्य गत्यन्तराभावात् ।

तदेतत् शब्देष्वपि तुल्यम् । तत्रातीन्द्रिययोग्यदेशतादिभ्यः करणानामतिशयात् घटादि-कारकधर्मस्य च करणेषु दृष्टेः । तस्यैव प्रदीपादेर्विषयान्तरस्य च कस्यचित् व्यञ्जकान्त-राभावात् । तत्कारणानि तेषां व्यञ्जकानि स्युः । तस्मान्न व्यक्तिः शब्दस्य । भवन्ती वा

करणेभ्योतिशयवत्ता वा शब्दस्य व्यक्तिः, आवरणविगमः, विज्ञानं वा, गत्यन्तराभावात् । तत्र नातिशयोत्पत्तिरनित्यताप्रसङ्गात् । तस्याः पूर्वापररूपहान्युपजननलक्षणत्वात् ॥

अथ

तद्रूपावरणानां च व्यक्तिस्ते विगमो यदि ॥२६७॥

अभावे करणग्रामसामर्थ्यं किं न तद्भवेत् ।

न ह्यावरणस्याकिञ्चित्कराणि समर्थानि नाम । विगमश्चाभावः । न चाभावः कार्य इति निवेदितमेतत् । नापि शब्दस्य नित्यस्य किञ्चिदावरणम्, असामर्थ्यादिति उक्तम् । तस्मान्नावरणे करणोपक्षेपः । नाप्येषामसामर्थ्यं तद्व्यापाराभावे] शब्दानुपलब्धेः । अतो युक्तमेते यच्छब्दान् कुर्युः ॥

अन्यथा—

शब्दाऽविशेषादन्येषामपि व्यक्तिः प्रसज्यते ॥२६८॥

तथाभ्युपगमे सर्वकारणानां निरर्थता ।

यदि सर्वकारणसमानधर्माण्यपि कारणनि व्यञ्जकानि न किंचिदिदानीं कार्यं स्यात् । न चैतद्युक्तं सर्वकारणानामानर्थक्यप्रसङ्गात् । वस्तुनोऽनाधेयविशेषत्वात् । आवरणाभावस्याऽकार्यत्वात् । वस्तुवदेव ज्ञानस्यापि सिद्धत्वात् । ज्ञानं प्रति कारकत्वे कस्यचित्तथाभूतानामन्येषामपि तथाभावप्रसङ्गेन सर्वस्य कार्यताप्रसङ्गात् ।

तस्मादयं कारकाभिमतोऽर्थकलापो न व्यक्तौ, न क्रियायामिति व्यर्थ एव स्यात् । तथा चेदमनुपकार्योपकारकम(कं) निरीहं[१] जगत् स्यात् ॥

शब्दनित्यत्वे च—

साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतम् ॥२६९॥

अनुदाहरणं सर्वभावानां क्षणभङ्गतः ।

क्षणभङ्गिनो हि सर्वभावा विनाशस्याऽकारणत्वादित्युक्तम्, वक्ष्यते च । उत्पत्तिमन्तश्च परतः, सत्तायाः आकस्मिकत्वायोगात् । तन्नेदं प्रत्यभिज्ञानं सत्प्रयोगादिकं क्वचिदन्वेति स्थिरैकरूपे । अपरापरस्वभावपरावृत्तिष्वेव दीपादिषु दृष्टमिति विरुद्धमेव । न । अभिन्नजन्मनः साधर्म्यविप्रलम्भात् भ्रान्त्या दीपादिषु भावात् । अभिन्नजन्मेति केनावष्टम्भेनोच्यते ? तस्यैवाभेदस्य सर्वत्र पौर्वापर्येण चिन्त्यत्वात् । तथा भेदस्यापीति चेत् । तेनैव संशयोस्तु । न च संशयितात् सिद्धिः । विवेकादर्शनादेकत्वमिति चेत् । न । ज्ञानपौर्वापर्येण सदसत्वसिद्धेः स्वभावविवेकसंभवात् । यद्यपराणि ज्ञानानि प्राक् संनिहितकारणानि पूर्वज्ञानवज्जा-

---

[१] मनीहं—क०; निरीहं—क० वृत्तौ ।

तान्येव स्युः । अजातानि तु कारणवैकल्यं सूचयन्ति । समर्थस्य जननाद् । असमर्थस्यापि पुनः सामर्थ्याऽप्रतिलम्भात् । प्रतिलम्भे वा स्थैर्याऽयोगात् ।

तदयं सत्प्रयोग इत्यपि जननमेव, प्रयोक्तुः सामर्थ्यात्, स्वयं समर्थे तस्यानुपयोगात् । प्रयोग इत्यपीष्टसाधनसमर्थोत्पादनमेव । समानजातीयोपादानापेक्षमनपेक्षं [वा] वास्यादिप्रयोगवत् कर्मादिप्रयोगवच्च कथ्यते ॥

योऽपि मन्यते समक्षे प्रत्यभिज्ञानं प्रत्यक्षमेव । ततः प्रत्यक्षादेव स्थैर्यसिद्धिरिति । तदप्युत्तरत्र निषे[32a]त्स्यामः ।

दूष्यः कुहेतुरन्योऽपि

नैव कश्चिद्धर्मो यः समानजातीयमन्वेति, सर्वधर्माणामेतदवस्थत्वात् । सर्वस्थैर्यप्रतिज्ञायाश्च यथाभिधानं युक्तिविरोधादन्येऽपि नित्यहेतवो वाच्यदोषाः ॥

बुद्धेरपुरुषाश्रये ॥२७०॥

बाधाभ्युपेतप्रत्यक्षप्रतीतानुमितैः समम् ।

यदि व्यक्तिर्बुद्धिस्तदानुपूर्वी वाक्यम् । तस्या अपौरुषेयत्वप्रसाधने बुद्धीनां पुरुषगुणत्वाभ्युपगमात् समयोऽस्य बाध्यते ।

प्रत्यक्षं खल्वप्येतद् यद् इमा बुद्धयः पुरुषसंख्यानेभ्यः[1] पुरुषगुणेभ्यो वा मनस्कारादिभ्यो भवन्तीति । न च कार्यता नामान्या भावाभावविशेषाभ्याम् । स च भावः प्रत्यक्षः । अभावोप्यनुपलब्धिलक्षणः प्रत्यक्षसामर्थ्यसिद्ध इति वक्ष्यामः । तत एव पुरुषकार्यता बुद्धीनामनुमेयाऽन्वयव्यतिरेकलिङ्गत्वादस्याः ।

किं च—

आनुपूर्व्याश्च वर्णेभ्यो भेदः स्फोटेन चिन्तितः ॥२७१॥

कल्पनारोपिता सा स्यात् कथं वाऽपुरुषाश्रया ।

वर्णव्यतिरेका[2]नुपूर्वी स्फोटविचारानुक्रमेणैव प्रतिविहिता । नापि सा वर्णस्वभावा वस्तुस्वभावस्य चैतद्विकल्पानतिक्रमात् । अतद्रूपेषु तद्रूपसमारोपप्रतिभासिन्याः बुद्धेरयं विभ्रमः स्यादानुपूर्वीति । सा च कथमपौरुषेयी बुद्धिविट[3]पनप्रत्युपस्थानात् । अपि चात्यन्तिकस्य कस्यचित् स्वभावस्याभावात् भवता ध्वनिनाऽनात्यन्तिकेन भवितव्यम् । स चाहेतुकोऽन्यहेतुको वा नित्यं भवेत् न च पुरुषव्यापारात् । तस्मात् पौरुषेयः ॥

कथमिदं गम्यते अनात्यन्तिको ध्वनिरन्यो वा भाव इति ?

सत्तामात्रानुबन्धित्वान्नाशस्याऽनित्यता ध्वनेः ॥२७२॥

---

[1] ०संख्यातेभ्यः क० [2] किण्यानु० क० [3] विठपन—क०

न हि नाशो भावानां कुतश्चिद्भवति । तद्भावस्वभावो भवेत्, भावस्यैव स्वहेतुभ्यः तद्धर्मणो भावात् । न च भावविशेषस्वभावः, तस्य निषेत्स्यमानत्वात् । तस्माद्भावमात्रः स्वभावः स्यात् । तेन शब्दोऽन्यो वा सत्ताभाजनः सर्व एव भावोऽनात्यन्तिक इति सिद्धं भवति ।

न सिद्धम्, तस्यैव नाशस्यापरजन्मासिद्धेः । तथा ह्यग्निना काष्ठं दण्डेन घट इति विनाशहेतवो भावानां दृश्यन्ते । अन्वयव्यतिरेकानुविधानं हेतुहेतुमतोर्लक्षणमाहुः । न । पूर्वस्य स्वरसनिरोधेऽन्यस्य विशिष्टप्रत्ययाश्रयेण विकृतस्योत्पत्तेः ।

अस्तु वाग्निः काष्ठविनाशहेतुः । स विनाशोऽग्निजन्मा किं काष्ठमेवाहोस्विदर्थान्तरम् ?

अग्नेरर्थान्तरोत्पत्तौ भवेत् काष्ठस्य दर्शनम् ।
अविनाशात्

किमित्यर्थान्तरादर्थान्तरजन्मनि काष्ठमभूतं नाम, न दृश्यते वा ? अतिप्रसङ्गो ह्येवं स्यात् ।

स एवास्य विनाश इति चेत्

यदि स एवार्थोऽग्निजन्माऽभावस्तदिदमभूतत्वान्न दृश्यत इति । भवतु तस्येदं नामाऽभाव इति ।

तथापि

कथम् ॥२७३॥

अन्योऽन्यस्य विनाशः

न हि कस्यचिदर्थस्य नामकरणमात्रेण काष्ठं न दृश्यत इत्युक्तम् । न चान्योऽन्यस्य विनाशोऽतिप्रसङ्गात्, विशेषाभावात्तस्यार्थान्तरत्वेन वस्तुभूतस्य तदन्येभ्यः । काष्ठेऽग्निकृतः स्वभावो विनाशो न सर्व इति चेत् । काष्ठ इति कः संबन्धः ? आश्रयाश्रयिसंबन्धश्चेत् । न । तस्य निषेत्स्यमानत्वात् । जन्यजनकभावश्चेत् । अग्नेरिति किम् ? काष्ठादेव भावात् । तदपेक्षादुत्पत्तेरदोष इति चेत् । अनतिशयलाभिनः कापेक्षा ? लाभे वा अपरकाष्ठजन्म स्यात् । पूर्वं त्वप्रच्युतिकारणं तथैव दृश्येत । तत एवाग्नेः पूर्वविनाश इति चेत् । कः पूर्वेणास्य संबन्ध इति स एव प्रसङ्गोऽपर्यवसानश्च ।

तदवश्यं विनाशसंबन्धयोग्यमुत्तरमतिशयं प्रत्युपकुर्वाणोऽग्निरपूर्वमेव जनयतीति पूर्वं तदवस्थं दृश्येत । काष्ठविनाश इति च काष्ठाभाव उच्यते । न चाभावः कार्यस्तत्कारी वा कारक एवेत्यनपेक्षणीय इत्युक्तम् । स्वभावाभावस्य ततो भेदे निवर्त्तमा[32b]नस्य भावस्य स्वभाव एव समर्थितः स्यादिति कथमभूतो नाम ।

तस्मान्नान्योन्यस्य विनाशः ॥

अस्तु काष्ठं कस्मान्न दृश्यते ।

कोऽयमर्थान्तरभावकाष्ठदर्शनयोर्विरोधः ?

तत्परिग्रहतश्चेन्न तेनाऽनावरणं यतः ॥२७४॥

यदि तेनार्थान्तरेण परिगृहीतमिति काष्ठं न दृश्येत, तत्काष्ठस्यावरणमित्यापन्नम् । न चैतद्युक्तम्, आवरणं हि दर्शनं [१]बध्नीयान्नाभिघातादीनि द्रव्यसामर्थ्यानि । सर्वप्रतिबन्धे च नन्वनेनैव द्रव्यं विनाशितं स्यात्, सर्वशक्तिप्रच्यावना[त्], पुनस्तत्राप्यग्नाविव प्रसङ्गाद् अनवस्था । अप्रच्युतेषु चास्याभिघातसामर्थ्यादिषु सता वा तेनान्येन किं विनाशितम् ?

यदि चाग्निसमुद्भवस्य विनाशाख्यस्यार्थस्य परिग्रहात् काष्ठं न दृष्टम् ।

विनाशस्य विनाशित्वं स्यादुत्पत्तेस्ततः पुनः ।
काष्ठस्य दर्शनं

अवश्यं ह्युत्पत्तिमता विनाशेन विनष्टव्यम् । तस्मिन् विनष्टे पुनः काष्ठादीनामुन्मज्जनं स्यात् ।

हन्तृघाते चैत्रापुनर्भवः ॥२७५॥
यथाऽत्राप्येवमिति चेत् हन्तुर्नाऽमरणत्वतः ।

विनाशस्य विनाशेऽपि न वस्तुनः प्रत्यापत्तिः । न हि हन्तरि हते तद्धतः प्रत्युज्जीवतीति चेत् । न । हन्तुस्तद्घातहेतुत्वात् । न ब्रूमो विनाशहेतोरग्निदण्डादेर्निवृत्तौ भावेन भवितव्यमिति । किं तर्हि ? भावाभावस्यात्यन्तानुपलब्धिलक्षणस्य । तन्निवृत्तौ काऽन्या गतिः स्वभावस्थितेः ? हन्ता हि चैत्रस्य न नाशकल्पः । किं तर्हि ? दण्डादिकल्पः । नाशकल्पं ह्यस्य मरणं तन्निवृत्तौ स्यादेवास्य पुनर्भावः ॥

अनन्यत्वेऽपि नाशस्य स्यान्नाशः काष्ठमेव तु ॥२७६॥
तस्य सत्त्वादहेतुत्वं नातोऽन्या विद्यते गतिः ।

अनर्थान्तरभूतो विनाशः काष्ठात् । तदेव तद्भवति । तच्च प्रागेवास्तीति किमत्र सामर्थ्यं वह्न्यादीनाम् ? तस्मात्तदु(त्तदनु)पकारात्तेन नापेक्ष्यन्ते कथंचित्, नाप्यस्येदमिति संबन्धमर्हति, तस्योपकारनिबन्धनत्वात् । अन्यथातिप्रसङ्गः स्यात् ।

पारम्पर्येणोपकारेऽप्यवश्यमयं विकल्पोऽन्वेति । स किमुपकारोऽर्थान्तरमाहोस्वित्तदेवेति ? तदर्थान्तरत्वेऽपि तस्येति पुनरुपकारकत्वादिपर्यनुयोगस्तदवस्थः । तथाऽनन्यत्वेऽपि । तस्मात् सतो रूपस्य तत्त्वान्यत्वाऽव्यतिक्रमात् । उपकारोत्पादनस्य च रूपनिष्पादनलक्षणत्वात् । तदतत्क्रियाविकलो न कर्त्तैवेति न कस्यचिद्धेतुरहेतुश्च नापेक्षते । तस्मात् स्वयमयं भावस्तत्स्वभाव इति सिद्धम् ॥

अहेतुत्वेऽपि नाशस्य नित्यत्वाद्भावनाशयोः ॥२७७॥

---

[१] विबध्नी—क०

सहभावप्रसङ्गश्चेदसतो नित्यता कुतः ।

स्यादेतद्—[1]यस्यापि विनाशोऽहेतुकः सोऽवश्यं नित्य इति भावस्तदभावलक्षणो विनाशश्च सह स्यातामिति । न । तस्य नित्यानित्यधर्मायोगात् । न ह्यसत्ययं विकल्पः संभवति । तयोर्वस्तुधर्मत्वात् । विनाशस्य चाकिंचित्त्वात् । भवतो हि केनचित् सहभावः स्यात् । न च विनाशो भवति । तस्माददोष ॥

असत्त्वेऽभावनाशित्वप्रसङ्गोऽपि न युज्यते ॥२७८॥
यस्माद्भावस्य नाशेन न विनाशनमिष्यते ।

कथमसन् विनाशो भावं नाशयेदतोऽविनाशी भावः स्यादित्यप्रसङ्ग एव । विनाशाद्भाव-नाशाऽनभ्युपगमात् । यो हि विनाश इति किञ्चिन्नेत्याह स कथं ततो भावनाशमिच्छेत् ।

कथमिदानीमसति [2]नाशे भावो नष्टो नाम ? नाऽसद्विनाशा नष्टा गण्यन्ते प्रत्युत्पन्ना-वस्थायाम् । न हि यो येनाऽतद्वान् स तेन तथा व्यपदिश्यते, प्रतीयते वा । यथाऽश्वो विषाणेन । न वै विनाशो नास्त्येव । स तु नास्ति यो भावस्य भवेत् ।[3] भाव एव क्षणस्थितिधर्मा विनाशः । तमस्य स्वभावमुत्तरकालं विभावयन्तो नाशोऽस्य भूत इति यथाप्रतीति व्यपदिश्य-न्तीत्युक्तम् । न हि भावस्य किञ्चित् कदाचिद्भवति । स एव केवलं स्वहेतुभ्यस्तथाभूतो भवति । तन्न केनचिद्भवता स नष्टः । किं तर्हि ? स्वभाव एवास्य येन स नष्टो नाम ॥

कथं तर्हीदानीमहेतुको विनाशो भवतीत्युच्यते ?

नश्यन् भावोऽपरापेक्ष इति तज्ज्ञापनाय सा ॥२७९॥
अवस्थाऽहेतुरुक्तास्या भेदमारोप्य चेतसा ।

न जातो भावोऽपरस्मान्नाशं प्रतिलभते, तथाभूतस्यैव स्वयं जातेरित्यपरापेक्षधर्म-[33a]प्रतिषेधार्थं तत्स्वभावज्ञापनेनार्थान्तरमिव धर्मिणो धर्मं चेतसा विभज्य तन्मात्रजिज्ञासायां स्वभाव एव तथोच्यते । तदेतन्मन्दबुद्धयः क्वचित्तथादर्शनाद् घोषमात्रविप्रलब्धा नाशं गुणम्, तस्य च भावमारोप्य सहेतुकमहेतुकं वाऽप्रतिष्ठिततत्त्वया भावचिन्तयाऽऽत्मानमाकुलयन्ति ॥

स्वतोऽपि भावेऽभावस्य विकल्पश्चेदयं समः ॥२८०॥

नन्वपरभावित्वेऽपि विनाशस्य स्वत एव भावस्य भवताऽयं तत्त्वान्यत्वविकल्पस्तुल्यः । तदा किमर्थान्तरभावे भावो न दृश्यते । अनर्थान्तरत्वेऽपि तदेव तद्भवति । तन्न किंचिदस्य जातमिति कथं विनष्टो नाम ?

नन्वत्र

न तस्य किंचिद्भवति न भवत्येव केवलम् ।

---

[1] यद्यपि—क० [2] विनाशे—क०
[3] भवति—क०

इत्युक्तम् ।

न ह्ययं विनाशोऽन्यो वा कश्चिद्भावस्य भवतीत्याह । किं तर्हि ? स एव भावो न भवति । यदि हि कस्यचिद्भावं ब्रूयान्न भावोऽनेन निर्वर्त्तितः स्यात् । तथा च भावनिवृत्तौ प्रस्तुतायामप्रस्तुतमेवोक्तं स्यात् । न हि कस्यचिद्भावेन भावो न भूतो नाम । तदा न भूतो यदि स्वयं न भवेत् । न भवतीति च प्रसज्यप्रतिषेध एष न पर्युदासः । अन्यथेहापि कस्यचिद्भावे न प्रतिषेधपर्युदासयो रूपभेदः स्यात् । उभयत्रापि विधेः प्राधान्यात् । एवं चाप्रतिषेधात् कस्यचित् पर्युदासोऽपि क्वचिन्न स्यात् । यदि हि किंचिन्निवर्त्तेत तदा तद्व्यतिरेकि संस्पृश्येत तत्पर्युदासेन । तच्च नास्ति, सर्वत्र निवृत्तिर्भवतीत्युक्ते कस्यचिद्भावस्यैव प्रतीतेः । तथाऽनेनार्थान्तरभाव एवोक्तः स्यात् । न तयोः परस्परं विवेकः । अविवेके च पर्युदासः । तदेवं व्यतिरेकाऽभावादन्वयोऽपि न स्यात्, तस्यैकस्वभावस्थितिलक्षणत्वात् । तत् स्थितिश्च तदन्यव्यतिरेके सति स्यात् । स च नास्तीत्यप्रवृत्तिनिवृत्तिकं जगत् स्यात् । तस्माद्यस्य नाशो भवतीत्युच्यते स स्वयमेव न भवतीत्युक्तं स्यात् । न वै घोषसाम्याद्विषयान्तरदृष्टो विधिः सर्वत्र योजनामर्हति । न हि गर्दभ इति नामकरणाद्वालेयधर्मा मनुष्येऽपि योज्याः । तथा न चैत्रस्य पुत्रो भवतीत्यत्र दृष्टो विधिर्विनाशेऽपि, विरोधात् । एवं चाभिधानेऽपि प्रयोजनमावेदितमेव ॥

अतो

भावे ह्येष विकल्पः स्याद्विधेर्वस्त्वनुरोधतः ॥२८१॥

भावोऽवश्यं भवन्तमपेक्षते । स च स्वभाव एव, निःस्वभावस्य क्वचिद्व्यापारे समावेशाभावात् । व्यापार इति हि तथाभूतस्वभावोत्पत्तिः । सा निःस्वभावस्य कथं स्यात् ? कथमिदानीं भवत्यभावः शशविषाणमित्यादिव्यवहारः । न वै शशविषाणं किञ्चिद्भवतीत्युच्यतेऽपि त्वेवमस्य न भवतीति भावप्रतिषेध एव क्रियते ।

अपि च व्यवहर्त्तारः एतदेवं व्यापारवदिव समारोप्यादर्शयन्ति प्रकरणेन केनचित् । न तु तथा । सर्वार्थविवेचनं हि तत्र तत्त्वम् । न कस्यचित् समावेशः । न खल्वेवं विनाशः, वस्तुनि तद्भावात् । असावपि यदि वक्तृभिरेवं ख्याप्यते न तु स्वयं तथा, तदा न भवतीतीष्टमेतत् । तस्मात् स्वयं भवन् स्वभावो विकल्पं[1] नातिवर्त्तते तत्त्वमन्यत्वमिति ॥

अतत्त्वमेव स्वभावस्यान्यत्वमिति । न हि रूपरसयोरप्यन्यदेव परस्परमन्यत्वम् । स्वभावाप्रतिबन्धोऽन्यत्वमिति चेत् । कोऽयं प्रतिबन्धो नाम येन स च न स्यात्, नान्यस्वभावश्च । जन्मेति चेत् । सर्वकारणानां परस्परमवाच्यता स्यात् । तथा च सर्वः सर्वस्य कथञ्चिदुपयोगीति न कश्चित् कुतश्चिदन्यः स्यात् । एवं चाऽवाच्यतेत्यपि कार्यकारणभाव एव शब्दान्तरेणोक्तः स्यान्नार्थभेदः । स्वभावाऽननुगमं त्वन्यत्वं ब्रूमः । स स्वभाववतां परस्परमस्त्येवेत्यन्यत्वमेव । न च तज्जन्मलक्षणात् स्वभावप्रतिबन्धादन्यः प्रतिबन्धो नाम, अनायत्तस्य व्यभिचाराविरोधात् । ततो धर्मभेदाच्चान्यत्वम् ।

---

[1] विकल्पद्वयं—क०

ज्ञानकृतः प्रतिबन्ध इति चेत् । स्यादेतत्—यत्प्रतिपत्तिनान्तरीयकं यज्ज्ञानं तद्गतौ [33b]नियमेन तत्प्रतिभासनात् तदतद्रूपमप्यवाच्यमिति । न । तस्य निःस्वभावत्वात् स्वयम् । स एव हि तस्य स्वभावो यः प्रतिभाति । स्वभावत्वे तद्वत् प्रतिभासनप्रसङ्गात् । अप्रतिभासमानस्य च दृश्यस्याभावात् । अदृश्यत्वेऽपि न तद्रूपं ज्ञानमिति कस्य किमायत्ता प्रतीतिः । न च यद्यदायत्तप्रतीतिकं तस्य स्वभावप्रतिभास एव नश्यति । प्रकाशायत्तप्रतीतीनामिव नीलादीनाम् । का वा तस्यार्थस्य प्रत्यासत्तिस्तत्र यत्तस्मिन्ननात्मरूपे प्रतीयमाने स स्वयं प्रत्युपतिष्ठते ।

अतिप्रसङ्गो ह्येवं स्यात् । प्रतीयमानस्य तदुपादानतेति चेत् । कोऽयमुपादानार्थः ? न कार्यकारणभावोऽनभ्युपगमात् । अभ्युपगमे वा न कार्यकारणे नियमेनाऽन्योन्यप्रतीतिप्रत्युपस्थापने । प्रतीतेरेव तन्नान्तरीयकता प्रत्यासत्तिरिति चेत् । ननु सैवाऽसति प्रतिबन्धे न युक्तेत्युच्यते । न चाकार्यकारणयोः कश्चित् प्रतिबन्ध इति चोक्तम् । यत्प्रतिपत्तिनान्तरीयकं यज्ज्ञानमित्यपि तज्ज्ञाने सति स्यात् । न हि यो विज्ञाने स्वरूपेणास्वरूपासंसर्गेण न भासते तस्य किंचिज्ज्ञानम् । तदभावान्न सिध्यत्यवाच्यतालक्षणमर्थरूपस्य । तद्भवता वस्तुतस्तत्त्वान्यत्वभाजा भवितव्यम् ॥

यस्य तु विनश्यतो भावस्य न किंचिद्भवति तेन

न भावो भवतीत्युक्तमभावो भवतीत्यपि ।

यदप्ययं भावस्याऽभावो भवतीत्याह तदपि भावो न भवतीत्येवोक्तं भवति । एवं हि स निर्वर्त्तितो भवति, प्रतिषेधे विधेरसंभवात् । तत एवास्य विनाशे न कश्चिद्धेतुः ॥

तथा हि—

[१]अपेक्ष्येत परः कार्यं यदि विद्येत किञ्चन ॥२८२॥

यदि(द)किंचित्करं वस्तु किं केनचिदपेक्ष्यते ।

सति हि कार्ये कारकं भवति । न च नश्यतो भावस्य किंचित् कार्यमित्युक्तम् । तस्माद्यो नाम नाशहेतुः स भावे न किंचित् करोतीत्यकिंचित्करो नापेक्षणीयः । तत्कथमिदानीमनुत्पन्नातिशयस्तदवस्थ एव भावो नष्टो नाम ?

नन्वतिशयोत्पत्तावपि स एव तस्यातिशय उत्पन्न इति कथं स नष्टो नाम ? तेन नायं तदवस्थो नष्टो नाम । येन स्वयं न भवति तेन नष्टो नार्थान्तरोत्पादादित्युक्तम् । न ह्यतिशयोत्पत्त्या स्वयं न भूतो नाम । अभावस्य सर्वातिशयोपाख्यानिवृत्त्या सर्वभावधर्मविवेकलक्षणत्वात् । भावस्य चोत्पत्तिसमावेशलक्षणत्वात् । तस्मान्नाऽभावे कस्यचिद्भावोपक्षेपोऽन्यस्य ॥

एतेनाऽहेतुकत्वेऽपि ह्यभूत्वा नाशभावतः ॥२८३॥

सत्तानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्जनम् ॥

---

[१] अपेक्षेत—क०

योऽपि मन्यते—अहेतुकेऽपि विनाशेऽभूत्वाऽस्य भावात् सत्ता, अनित्यत्वं च दुर्निवारम् । अभूत्वा भवन्नहेतुको भवतीत्यपि विरुद्धमिति—सोप्यनेनैव प्रत्याख्यातः । कस्यचिद्भावानभ्युपगमात् ॥

यथा केषांचिदेवेष्टः प्रतिघो जन्मिनां तथा ॥२८४॥

नाशः[1] स्वभावो भावानां नानुत्पत्तिमतां यदि ।

अथापि स्याद्भवतु नाम स्वभाव एष भावानां य इमे क्षणस्थितिधर्माणः । स तूत्पतिमतामेव भविष्यति ।

न हि स्वभाव इति सर्वः सर्वस्य स्वभावो भवति । प्रतिघात्मतावत् ॥

सत्यमेतत् । तथाऽपि

स्वभावनियमाद्धेतोः स्वभावनियमः फले ॥२८५॥

नानित्ये रूपभेदोऽस्ति भेदकानामभावतः ।

न वै प्रतिघोऽन्यो वा स्वभावोऽकस्मात् प्रतिनियमवान् । यादृशी तु स्वहेतोः शक्तिस्थितिस्तादृशं फलं भवतीति हेतुस्वभावनियमात् फलस्वभावनियमः । आकस्मिकत्वेऽप्यस्योक्तो दोषः । प्रतिघात्मताहेतुस्वभावप्रतिनियमवन्न नश्वरजनने[2] प्रतिनियमस्वभावं भावं पश्यामो येन तज्जन्मा तथा स्यान्नान्यः, सर्वाकारजन्मनां विनाशदर्शनात् ।

नन्विदमप्यनिश्चेयमेव—सर्वाकारजन्मानो नश्यन्तीति तासामनिःशेषदर्शनात् । विचित्रशक्तयो हि सामग्र्यो दृश्यन्ते । तत्र काचित् स्यादपि याऽनश्वरात्मानं जनयेत् । न । ज्ञेयाधिकारात् । ये कदाचित् क्वचित् केनचिज्ज्ञाताः सन्तो न ज्ञायन्ते, तेषां [3]सत्त्वानुबन्धी नाश इति ब्रूमः । त एव कृतका अनित्याः साध्यन्ते । न ह्ययं संभवोऽस्ति यत्ते ज्ञानजननस्वभावाः पुनरनष्टा न जनयेयुः, अपेक्षेर[34a]न्[4] वा परं तज्जननस्वभावस्य निष्पत्तेः । न च तेष्वनपेक्षेषु कस्यचित् कदाचित् किंचिज्ज्ञानं निवर्त्तेत । न चैवंभूतं किंचिदस्ति, सर्वस्य केनचित् कदाचित् क्वचिज्ज्ञानात् । ज्ञानमात्रक्रियायामप्यसामर्थ्ये वस्त्वेव न स्यात् । तथा हि तल्लक्षणं वस्त्विति वक्ष्यामः । तस्य च विनाशाव्यभिचारात् स सत्तानुबन्धी ॥

प्रत्याख्येयाऽत एवैषां संबन्धस्यापि नित्यता ॥२८६॥

अत एव यथोक्ताद्वस्तुमात्रानुबन्धित्वाद्विनाशस्य शब्दवत् संबन्धनित्यतापि प्रत्याख्येया ।

या च शब्दशक्तिर्योग्यताख्याऽर्थप्रतिपत्त्याश्रयो **जैमिनीयैर्वर्ण्यते**, साऽर्थान्तरमेव न भवति । तथा हि योग्यतेति रूपातिशय एव भावानामित्यावेदितं प्राक् ॥

---

[1] नाशस्व० – क०

[2] नश्वरजननप्रतिनियतस्वभावं—क०

[3] सन्तानानुबन्धी—क०

[4] अपेक्षेरन्नापरं—क०

अस्तु वार्थान्तरं तथापि

संबन्धदोषैः प्रागुक्तैः शब्दशक्तिश्च दूषिता ।

उक्तो हि संबन्धार्थान्तरवादेऽनेकप्रकारो दोषः । तेनैव सा शब्दशक्तिर्दूषितेति न पुनरुच्यते ।।

अपि च—

नाऽपौरुषेयमित्येव यथार्थज्ञानसाधनम् ।।२८७।।
दृष्टोऽन्यथाऽपि वह्न्यादिरदुष्टः पुरुषागसा ।

भवन्तु नामाऽपौरुषेयाः वैदिकाः शब्दास्तथापि संभाव्यमेवैषामयथार्थज्ञानहेतुत्वम् । न हि पुरुषदोषोपधानादेवार्थेषु ज्ञानविभ्रमः, तद्रहितानामपि प्रदीपादीनां नीलोत्पलादिषु वितथज्ञानजननात् । तदिमे शब्दाः संस्कारनिरपेक्षाः प्रकृत्या चार्थेषु प्रतिभास[1]हेतवः स्युः स्वभावविशेषाद्वह्न्यादिवत्, वितथव्यक्तयश्च नियमेनैव । नियमकारणाभावादयुक्तमिति चेत् । अवितथव्यक्तिनियमे किं कारणम् ? तस्माद्यथार्थव्यक्तिनियमवत् प्रकृत्याऽयथार्थव्यक्तिनियमः किं न कल्प्यते ? अथवा वह्न्यादिवदेवार्थेषूभयज्ञानहेतुत्वं स्यात् । न ह्यपौरुषेया अपि वह्न्यादय एकत्र यथार्थज्ञानहेतवोऽपि सर्वत्र तथा भवन्तीति । तथा शब्दानामप्यपौरुषेयत्वेऽप्युभयं स्यादिति ।

भवतु वह्न्यादीनां कृतकत्वाद्यथाप्रत्ययमन्यत्राऽन्यथात्वम्, न पुनर्नित्येषु शब्देष्वेतदस्ति । नन्वेवंविधोऽन्यत्राप्यस्त्येव धर्मस्तेषामपि संकेतबलादन्यथावृत्तेः कार्यजननस्वभावस्थितौ चैषां समयादेरपेक्षणीयस्याभावात् ततः प्रतीतिरर्थेषु सर्वस्य सर्वदा स्यात् । न चास्ति । तस्मान्न शब्दः[2] स्थितस्वभाव[3] इति ।।

अपि च—

न ज्ञानहेतुतैव स्यात् तस्मिन्नकृतके मते ।।२८८।।
नित्येभ्यो वस्तुसामर्थ्यान्न हि जन्मास्ति कस्यचित् ।

यद्यकृतकः शब्दः न तस्मादर्थेषु प्रतीतिरेव स्यात् । प्रतीतिजन्मेतरकालयोस्तुल्यरूपस्य प्रतीतिजन्मनि सामर्थ्यसंभावनाऽयोगात् । 'एवमयं जनको नैवम्' इति विवेचनीयस्य रूपभेदस्याऽभावात् । न यादृशोऽस्याऽजनकस्तादृश एव जनको युक्तः । अन्यापेक्षापि निषिद्धैव । तस्मान्न नित्यानां क्वचित् विज्ञानजननसामर्थ्यम्, कदाचिदजनने नित्यमजननप्रसङ्गात्, कार्यसातत्याऽदर्शनाच्च न ते कथंचित् कर्त्तार इत्युक्तप्रायम् ।।[4]

या अप्येताः नित्याभिमतेष्वाकाशादिषु प्रतिपत्तयस्ता अपि न तत्स्वभावभाविन्यः । तथा हि—

---

[1] प्रतीतिहे—क०
[2] शब्दाः—क०
[3] ०भावाः—क०
[4] इत्युक्तं प्राक्—क०

विकल्पवासनोद्भूताः समारोपितगोचराः ॥२८९॥
जायन्ते बुद्धयस्तत्र केवलं नार्थगोचराः ।

स्वलक्षणविषया हि बुद्धिर्नियमेन तद्योग्यतोपस्थापना[1]नुविधायिनीति तस्मिन् सत्यस्याः कारणे योग्यता भवत्येव । तद्यदि नित्यानां पदार्थानां स्वलक्षणे कस्यचित् ज्ञानं स्यात्, सर्वस्य सर्वदा स्यात् । कार्यविशेषा हि व्यक्तयः कथंचित् कस्यचिदुपयुज्यमानास्तदुपजनन-योग्याऽतिशयप्रतिलम्भहेतुं वस्तुविशेषमपेक्षन्त इति युक्तम् । तथाऽकार्यविशेषो नित्यो भावः केनचिद् गृह्यमाणः तत्कारणापेक्षो यदि ग्रहणमस्य जनयेत् युक्तं यत्तेनैव गृह्येत । तच्च [34b] स्थितस्वभावत्वान्न संभवतीति सर्वेण समं गृह्येत न वा केनचिदिति सन् केनचिद् दृष्टो न नित्यः कश्चिदतीन्द्रियः स्यात् । न चैतदस्ति । तस्मादर्थसामर्थ्यानपेक्षाः समारोपितगोचराः आन्तरमेवोपादानं विकल्पवासनाप्रबोधमाश्रित्य बाह्यार्थशून्या भ्रान्तय एवाऽऽकाशादिषु सर्वस्य भवन्तीति । तस्मान्नापरावृत्तिधर्माणः शब्दाः । तत्त्वे वा कुत एतदवितथार्थप्रतीतय एवेति । न हि "अग्निर्हिमस्य भेषजम्" [तैत्ति० सं० ७.४.१८.२.] इत्यादिषु शीतप्रतिघातसामर्थ्यं लोकप्रसि-द्धमग्नेः ख्याप्यत इति सर्वं तथा भवति । लोकस्य स्वेच्छाकृतसङ्केतानुव्यवहारात् 'किमयं लोकः स्वसङ्केतमनुविदधदेवं प्रत्येत्याहोस्विच्छब्दस्वभावस्थितेः' इति संदेहः । लोकेच्छयाऽपि परावर्त्यमानाः शब्दाः पुनरन्यत्रान्यथा दृश्यन्त इति लोकप्रसिद्ध्यनुविधानेऽपि [2]संभवत्येषाम-न्यथाभावः । तस्मात् कस्यचिदवैपरीत्यदर्शनेऽपि सर्वेषां तथाभावो न सिध्यति ।

अकृतकस्वभावत्वेऽपि ह्येषां कश्चिन्मिथ्यार्थनियतोऽपि स्यादिति स्वभावापरिज्ञानात् सर्वत्र संशयः स्यात् ॥

मिथ्यात्वं कृतकेष्वेव दृष्टमित्यकृतं वचः ॥२९०॥
सत्यार्थं व्यतिरेकस्य विरोधि व्यापनाद्यदि ।

अथ यन्मिथ्यार्थं वचनं तदखिलं कृतकमिति हेतुव्यतिरेकेण साध्यव्यतिरेकस्य व्याप्तेरन्य-त्राऽसंभवादकृतकं सत्यार्थमिति स्याद्विनाऽप्यन्वयेन । यो हि येनाऽव्याप्तस्तत्र तद्व्यतिरेक आश-ङ्क्येत । न च विरुद्धयोरेकत्र संभवोऽस्ति । असंभवे च विजातीयस्य गत्यन्तराभावादिष्टार्थसिद्धेः, तत्साधकत्वाच्च[3] लिङ्गस्य व्यर्थमन्वयदर्शनम्, व्यतिरेकमात्रेणैव सिद्धेरिति । सत्यमेतद्यदि विपक्षयोर्व्याप्यव्यापकभावः सिध्येत् ॥ स तु न सिद्धो यस्मात्—

हेतावसंभवेऽनुक्ते भावस्तस्यापि शङ्क्यते ॥२९१॥
विरुद्धानां पदार्थानामपि व्यापकदर्शनात् ।

यदि हेतोः साध्यविपक्षेऽभावः सिध्येत्तदा साध्यव्यतिरेकं हेतुव्यतिरेको व्याप्नुयात् । न च तत्र तस्याऽसंभवे प्रमाणं पश्यामः । न चाविरुद्धविधिः प्रतिषेधसाधनो युक्तोऽतिप्रसङ्गात् । न चैकत्र दृष्टस्यान्यत्रासंभव एव, पृथग्विरुद्धसहभाविनामपि दर्शनात्, अनित्यत्ववत् प्रयत्ना-नन्तरीयकेतरयोः । न च तथाविधस्याऽदर्शनादसत्त्वमेव ॥

---

[1] ०स्थानानु०—क० [2] संभवत्येवैषा० क० [3] साधनत्वाच्च—क०

यस्मात्—

नाऽसत्तासिद्धिरित्युक्तं सर्वतोऽनुपलम्भनात् ॥२९२॥
असिद्धायामसत्तायां सन्दिग्धा व्यतिरेकिता ।

न ह्ययं पुरुषमात्रकः सर्वं द्रष्टुं समर्थो येनास्य दर्शननिवृत्त्या न तथा स्यात् । यस्य हि ज्ञानं ज्ञेयसत्तां न व्यभिचरति स एवं ब्रुवाणः शोभेत—अदर्शनान्नास्तीति । तदिमे स्वभावदेशकालविप्रकर्षेण सन्तोऽप्यनुपलक्ष्याः स्युः । तथा हि कोऽत्यन्तपरोक्षेऽर्थे संवादनमितरद्वाऽसर्वदर्शी वचनस्याकृतकस्येतरस्य वा विभावयितुं समर्थः । प्रतिपादितं चैतत् । क्वचित्तथादृष्टानामप्यर्थानां पुनः कथंचिदन्यथाभावः । यथा क्वचिद्देशे मधुराणि निम्बफलानि संस्कारविशेषादामलकीफलानि च। न चेदानीमतद्दर्शिना तानि प्रतिक्षिप्तव्यान्येवेति । तस्मादकृतकं च स्यान्मिथ्यार्थं चेति न विरोधं पश्यामः ॥

न हीयमनुपलब्धिरदृश्यात्मस्वभावसाधिकेत्युक्तम् । तेन यत् किंचिन्मिथ्यार्थं तत्सर्वं पौरुषेयमित्यनिश्चयादव्याप्तिः । तथा हि—

अन्वयो व्यतिरेको वा सत्त्वं वा साध्यधर्मिणि ॥२९३॥
तन्निश्चयफलैर्ज्ञानैः सिध्यन्ति यदि साधनम् ।

तथा चोक्तम्—"य एव तूभयनिश्चितवाची स साधनं दूषणं वा । नान्यतरप्रसिद्धः संदिग्धवाची, पुनः साधनापेक्षत्वात्" इति । को ह्यदृष्टविरोधस्य संभवं प्रत्याचक्षीत । तदयं व्यतिरेकः संशयादसाधनम् ॥

अ[35a]पि च

यत्र साध्यविपक्षस्य वर्ण्यते व्यतिरेकिता ॥२९४॥
स एवास्य सपक्षः स्यात् सर्वो हेतुरतोऽन्वयी ।

यत् किंचिन्मिथ्यार्थं तत् सर्वं पौरुषेयमिति हेतुविपक्षेण साध्यविपक्षस्य व्याप्तिस्तदभावेऽभावसिद्धौ स्यात् । तदभावे भवतस्तेन व्याप्त्ययोगात् । यैव च विजातीययोर्व्यावृत्तिसिद्धिः सैवान्वयस्थितिः, विपक्षव्यवच्छेदलक्षणत्वात् साध्यस्य । प्रतिषेधद्वयाच्च विधिसिद्धेरिति काऽनन्वयाऽव्यतिरेकव्याप्तिसिद्धिः । तन्न कश्चिद्धेतुरनन्वयो नाम । एकव्यवच्छेदस्य विजातीयसिद्धिनान्तरीयकत्वात् । अनित्यनिरात्मतादिव्यवच्छेदेऽपि तथा स्यात् । न । व्यतिरेकव्यवच्छेदस्य भावरूपत्वात् । न भावरूपव्यवच्छेदे भावानुषङ्गः । अभावव्यवच्छेदस्तु नियमेन भावोपस्थापनः । भावाभावयोरन्योन्यविवेकरूपत्वात् । अभावरूपस्तु व्यतिरेकः । स व्यतिरिच्यमानो भावमुपस्थापयति ।

नैवं नैरात्म्यादयः, स्वभावविशेषात् । क्रियाभोगाधिष्ठानाऽस्वतन्त्रो ह्यात्मा निरात्मा । तत्स्वातन्त्र्यलक्षणत्वादात्मनः । तद्रूपं नैरात्म्यं नात्मनिवृत्तिमात्रम्, अन्यथा निरुपाख्ये कृतकत्वाद्ययोगात् न ततो नैरात्म्यसिद्धिः स्यात् । आत्मव्यवच्छेदेन निरात्मनो भावस्य परामर्शाददोष इति चेत् । पर्युदासे वस्तुसंस्पर्शात्तदेव वस्तुरूपं नैरात्म्यमायातम् ।

यस्यापि नाऽभावरूपो व्यतिरेकस्तस्य भावरूपव्यवच्छेदे न भावसिद्धिः स्यादिति नान्वयानुषङ्गस्तथाऽनैरात्म्येऽपि न भावसिद्धिः स्यात् । यथा 'नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति' विपक्षयोर्व्याप्यव्यापकभावचिन्तायामप्राणादिमत्त्व एव नैरात्म्यं दृष्टम्, तदभावे च नास्तीति स्वयं न भवदपि प्राणादीनां नात्मनि सिद्धिमुपस्थापयति । तथा साध्येऽपि प्राणादिभिर्व्युदस्यमानं स्यात् केवलम् । नैरात्म्येऽभावात् प्राणादयस्तन्निरसनाः नात्मोपस्थापनास्तत्र भावाऽसिद्धेः । न च नैरात्म्यनिवृत्त्यात्मसिद्धिर्विपक्षव्यतिरेकदर्शनेऽपि प्रसङ्गात् । तत्र विपर्ययव्याप्तिर्व्यतिरेकासिद्धौ । तत्सिद्धिरेव चान्वयसिद्धिः । असिद्धौ वा तद्व्यतिरेकनिवृत्तिसिद्धावपि तदसिद्धिरिति साध्येऽपि प्रसङ्गः । तन्नाऽनन्वया व्यतिरेकव्याप्तिः ।

मिथ्यार्थतायास्तु पौरुषेयत्वेन व्याप्त्याऽपौरुषेयान्निवृत्तावपि न सत्यार्थत्वं प्रकारान्तरसंभवात् । द्वैराश्येन शब्दानामेतत् स्यादेकनिवृत्तौ गत्यन्तराभावात् । ते त्वनर्थका अपि स्युरिति नेष्टसिद्धिः ।

अर्थप्रतीतेर्नानर्थका इति चेत् । न । एष पुरुषव्यापारः स्यात् । अर्थान्तरविकल्पवत् । यथाऽतदर्थत्वेऽपि भरतोर्वश्यादिचरितादिकमर्थमन्येऽन्यथा व्याचक्षते । तदनुसारेण केषांचित् प्रतीतिः । तथाऽयमनर्थकेष्वप्यर्थविकल्पः पुरुषकृतः स्यात्, न शब्दस्वभावकृतः, पुरुषोपदेशापेक्षणादर्थान्तरवदेव । न हि प्रकृत्या प्रकाशनास्तमपेक्षन्ते वह्न्यादयः । पुरुषस्तु स्वसमयव्यापारमाचक्षाणः उपदिशतीति न्याय्यम् । पुरुषसमितनिसर्गसिद्धयोरुपदेशापेक्षणाविशेषात्, अन्यविशेषाभावाच्चैको नैसर्गिकोऽन्यस्तु पौरुषेय इति दुरवसानम् ।

अस्ति विशेषः प्रमाणसंवाद इति चेत् । एतदुत्तरत्र निषेत्स्यामः—'नास्त्यत्यन्तपरोक्षेऽर्थे प्रमाणान्तरवृत्तिः' इति । समानधर्मणोरर्थयोः प्रमाणसंवादमात्रविशेषादेकत्राऽपौरुषेयत्वे बहुतरमिदानीमपौरुषेयम् । सन्ति पुरुषकृतान्यपि वाक्यानि कानिचिदेवंविधानीति तेष्वपि प्रसङ्गः । तद्वदेषामप्यभिमतार्थवत्ता पौरुषेयी च स्यात् प्रमाणानुरोधिनी च ॥

अपि चेदं 'मन्त्रा अपौरुषेयाश्चेति' व्याहतं पश्यामः । [35b] तथा हि

समयत्वे हि मन्त्राणां कस्यचित् कार्यसाधनम् ॥२९५॥

युक्तम् । यद्येते मन्त्राः कस्यचित् समयः—यथा मत्प्रणीतमेतदभिमतार्थोपनिबन्धनं वाक्यमेवं नियुञ्जानमनेनाऽर्थेन योजयामीति—परार्थपरतानुरोधेनाऽन्यतो वा कुतश्चिद्धेतोः कृतः स्यात् । तदा मन्त्रप्रयोगात् कदाचिदर्थनिष्पत्तिर्युक्ता, कविसमयादिव तत्पाठकानाम् ॥

अथापि भावशक्तिः स्यादन्यत्राप्यविशेषतः ।

न वै पुरुषसमयात् मन्त्रेभ्योऽर्थसिद्धिः । किं तर्हि ? भावस्वभाव एष यदिमे कथंचिन्नियुक्ताः फलदास्तर्हि रूपं वर्णानां सर्वत्राविशिष्टमिति यथाकथंचित् प्रयुक्तादपि फलं स्यात् । वर्णा एव हि मन्त्रो नान्यत् किंचित् ॥

क्रमो मन्त्र इति चेत् ।

क्रमस्यार्थान्तरत्वं च पूर्वमेव निराकृतम् ॥२९६॥

न वर्णव्यतिरिक्तोऽन्यः क्रम इति निवेदितमेतत् । अव्यतिरेके च वर्णा एव मन्त्रस्ते चाऽविशिष्टाः सर्वत्रेति सर्वथा फलदाः स्युः । उपप्लवस्त्वल्पीयसोऽपि क्रमस्य भ्रंशाद् दृष्टः । कस्यचिदनुष्ठानाद्देवतासंनिधेः, असाकल्येन विराधनाच्च । सर्वभ्रंशे तु कस्यचिदेव समयस्याननुष्ठानादसन्निधेर्नार्थानर्थौ ॥

किं च—क्रमस्यानर्थान्तरत्वेऽर्थान्तरत्वे वा वर्णात्मनस्तत्क्रमात्मनो वा मन्त्रस्यार्थहेतोरकृतकत्वान्नित्यस्य नित्यं सन्निधानमिति

नित्यं तदर्थसिद्धिः स्यात्

यतो हि भावशक्तेः फलोत्पत्तिः सा अविकलेति न फलवैकल्यं स्यात् । न हि कारणसाकल्ये कार्यवैकल्यं युक्तम् । तस्याकारणत्वप्रसङ्गात् ॥

न केवलान्मन्त्रप्रयोगादिष्टसिद्धिस्तस्य विधानापेक्षत्वादिति चेत् ।

असामर्थ्यमपेक्षणे ।

यदि हि मन्त्राः विधानादन्यतो वा कंचित् स्वभावातिशयमासादयेयुः, स तत्र समर्थोऽपेक्ष्यः स्यात् । न च नित्येष्वेतदस्तीत्युक्तम् । तत् किमयमसमर्थोऽपेक्ष्यत इत्यनपेक्ष्यत इत्यनपेक्षाः सदा कुर्युः । न वा कदाचिदनतिशयात् ॥

सर्वस्य साधनं ते स्युर्भावशक्तिर्यदीदृशी ॥२९७॥
प्रयोक्तृभेदापेक्षा च नाऽसंस्कार्यस्य युज्यते ।

यदि भावशक्त्यैव मन्त्राः सिद्धिप्रदाः, न ते कंचित् परिहरेयुर्यजमानमन्यं वा । न ह्यन्यं प्रति स्वभावोऽतद्भावो भवति, तस्य तेनाऽनपकर्षणात् अन्येन चानुत्कर्षणात् । केनचित् सह कार्यकारणभावाऽयोगात् प्रत्यासत्तिविप्रकर्षाभावात् । अत एवास्याऽसंस्कार्यत्वात् प्रयोक्तापि नास्ति । यतः प्रयोक्ता फलमश्नुवीत ॥

संस्कार्यस्यापि भावस्य वस्तुभेदो हि भेदकः ॥२९८॥
प्रयोक्तृभेदान्नियमः शक्तौ न समये भवेत् ।

आधेयविशेषा ह्यनित्या भावास्तद्धेतोः स्वभावभेदे ततः समासादिताऽतिशयत्वादन्यत्राऽन्यथा स्युः, नाऽभेदे कारणाविशेषे कार्याविशेषात । विशेषे तस्याहेतुकत्वप्रसङ्गादित्युक्तप्रायम् । तदिमे मन्त्राः स्वभावातिशयात् फलदायिनः कार्या अपि न शूद्रादिप्रयोगेऽप्यन्यथा स्युः, शूद्रविप्राभिधानयोः पुरुषयोः स्वभावाभेदात् । न हि पुरुषेच्छानुविधायिनो नामव्यवहारभेदात् स्वभावभेदानुबन्धिनामर्थानामन्यथात्वमस्ति ।

तयोर्जातिभेद इति चेत् । स खल्वाकृतिगुणशक्तिभेदे[1] दृष्टो गवाश्ववत् । अनुपदेशं

---

[1] इष्टः—क०

चैनं लोकः प्रतिपद्यते । न तद्वदनयोः कंचिदपि गुणं विनियतं पश्यामः । अपश्यन्तश्च कथं भेदं प्रतिपद्येमहि ।

योऽप्ययं नामभेदान्वयो लोके प्रतीतिभेदः, सोऽसत्यपि जातिभेदे व्यापारविशेषानुष्ठानात्, अन्वयाच्च स्यात् । वैद्यवणिग्व्यपदेशादिवत् ।

तदिमेऽविशिष्टेन प्रयुज्यमाना मन्त्रास्ततोऽविशिष्टमेव स्वभावमासादयन्ति । तेनाविशेषेण फलदाः स्युः । यदा तु समयादेभ्यः फलं तदाऽयमदोषः, समयकारस्य रुचेः[36a] फलोत्पत्तिनियमात् । स्वभाववृत्तयो हि भावास्तन्मुखेन प्रसङ्गमर्हन्ति । न पुरुषेच्छावृत्तयस्तेषां यथाकथंचिद्वृत्तेः ॥

यदपि प्रयोक्ता फलमश्नुत इति प्रयोगं हि समीहितार्थयोग्यस्योत्पादनम्, सन्तानपरिणमनं वा पश्यामः । तदुभयं विशेषजन्मनि स्याद् । अन्यथा—

अनाधेयविशेषाणां किं कुर्वाणः प्रयोजक ः॥२९९॥

येन ततः कश्चित् फलमश्नुतेऽन्यो न ॥

प्रयोगो यद्यभिव्यक्तिः सा प्रागेव निराकृता ।

न हि नित्यानां काचिदभिव्यक्तिरित्युक्तं यतोऽभिव्यञ्जकः प्रयोक्ता स्यात् ॥

व्यक्तिश्च बुद्धिः सा यस्मात् स फलैर्यदि युज्यते ॥३००॥
स्याच्छ्रोतुः फलसंबन्धो वक्ता हि व्यक्तिकारणम् ।

न हि शब्दस्यान्यतः स्वरूपपरिणामो व्यक्तिः । नाप्यावरणविगमनम् । किन्तु तद्विषया प्रतीतिः । अश्रूयमाणेऽव्यक्तव्यपदेशात् । तत्र यदि बुद्धिहेतुर्वक्ता स्यात्तत् तुल्यं श्रोतर्यपीति सोऽपि फलं वक्तृवदश्नुवीत । न हि वक्तुः कश्चिदन्यस्तद्भावोऽन्यत्र तद्बुद्धिहेतुत्वात् । परोपाधिबुद्धिः श्रोतुर्न वक्तुरिति विशेष इति इति चेत् । कः पुनरुपयोगो वक्तुः श्रोतरि येनोपाधिरिष्यते । ततः शब्दश्रुतिरिति चेत् । ननु तदेवेदं पर्युनुयुज्यते कथं तत इत्यसंबन्धात् ? विषयोपनयनादयमस्य श्रावकः स्यात् । तच्च न शक्यम्, तस्य कथंचिदप्यपरिणामात् । [1]इन्द्रिसंस्कारादयोप्युक्ताः । मां श्रावयति, अहं श्रावयामीति तयोः प्रत्ययाद् वक्तृश्रोतृभेद इति चेत् । अनुपकार्योपकारकाद् भ्रान्तिमात्रात्तद्भावेऽतिप्रसङ्गोऽन्यत्रापि भ्रान्त्या प्रत्ययदर्शनात् । सर्वथोपकाराभावे च तथा प्रत्ययो न युक्तः । सर्वेषां परस्परमेवं प्रसङ्गात् । भ्रान्तिरपि कुतश्चिदुपकारे सति कयाचित् प्रत्यासत्त्याऽन्यत्र भवति । साऽप्यत्यन्ताऽनुपकारे न स्यात् ।

तस्माद्वक्तृश्रोत्रोर्व्यक्तिहेतुत्वेऽपि विशेषाभावात्तुल्यः फलसंबन्धः स्यात् ॥

अपि च—

अनभिव्यक्तशब्दानां करणानां प्रयोजनम् ॥३०१॥
मनोजपो वा ध्यर्थः स्यात् शब्दो हि श्रोत्रगोचरः ॥

---

[1] इतः तिब्बतीभाषातोऽनूदितं श्रीसांकृत्यायनेन स्वसंपादितवृत्तौ ।

श्रोत्रग्रहणलक्षणः शब्दः । तदतिक्रमेऽतिप्रसङ्गात् ।

नन्वेवं सामान्येऽपि प्रसङ्गः । न ब्रूमः शब्द एवेति । शब्दस्त्ववश्यं तल्लक्षणः, लक्षणान्तराभावात् । तत्र यदि शब्दात्मनां मन्त्राणामभिव्यक्तिहेतुः प्रयोक्ता, अनभिव्यक्तश्रुतिविषयाणां करणानां प्रयोक्ता जापी न मन्त्रफलेन युज्यते । नापि मनसा जपन् । नहि तदा श्रोत्रेण कंचिदर्थं विभावयामः । न चाऽशब्दात्मा मन्त्रः ॥

पारम्पर्येण तज्जत्वात् तद्व्यक्तिः साऽपि चेन्मतिः ॥३०२॥

न हि मनसा ध्यायतोऽपि मन्त्राभासा बुद्धिः शब्दश्रवणादृते । ततः शब्दप्रभवात् सापि शब्दव्यक्तिरेव । अनवस्थैवं स्यात्—शब्दार्थविकल्पानामपि परम्परया प्रसूतिरस्तीति ॥

तेऽपि[1] तथास्युस्तदर्था चेदसिद्धं कल्पनान्वयात् ।

न ब्रूमः—सर्वा शब्दप्रभवा बुद्धिस्तद्व्यक्तिरिति । या तु तद्विषया सा तस्य व्यक्तिरिति । मनोविकल्पस्य तद्विषयत्वमसिद्धम् । न हि स्वलक्षणे विकल्पानां वृत्तिरिति निवेदयिष्यामः ।

ते हि यथास्वमान्तरात् विकल्पवासनाप्रबोधादनपेक्षितबाह्यार्थोपनिधयो भवन्ति, बाह्याऽपायाऽनागमेऽपि भावात् । न हि यो यस्य सत्तोपधानं नापेक्षते स तस्य हेतुः । अहेतुश्च कथं विषयः । तस्मान्न मनोविकल्पः शब्दव्यक्तिर्यतस्तद्वान् प्रयोक्ता स्यात् ।

तत्प्रसूता तद्विषया बुद्धिस्तद्व्यक्तिः, तदाश्रयः प्रयोक्तेत्यत्राप्युक्तम्—श्रोतर्यपि प्रसङ्ग इति । तज्ज्ञाने च प्रयोगे शब्दः पुरुषे व्याप्रियते, तस्य ज्ञानजननात् । न पुरुषः शब्दे, तदात्मन्यनुपकारात् । अथ च पुरुषः शब्दानां प्रयोक्तेत्यलौकिकोऽयं व्यवहारः ।

सर्वथा शब्दस्वभावानां मन्त्राणां प्रयोगात् फलावाप्तौ व्यर्थो मनोजपः, विकल्पस्य शब्दरूपाऽसंस्पर्शात् ॥

स्वसामान्यस्वभावानामेकभावविवक्षया ॥३०३॥
उक्तेः समयकाराणामविरोधो न वस्तुनि ।

समयकारस्तु स्वलक्षणमिन्द्रियविषयं सामान्यलक्षणं च विकल्पप्रति[36b]भासं यथाव्यवहारं संवृत्या संकलय्य समयमारोपयेत् । यथासमयं चार्थं निष्पादयेदिति न मनोजपादौ दोषः । वस्तुस्वभावात्तु [2]फलावाप्तावतत्स्वभावसंस्पर्शे न स्यात् ॥

यदुक्तं न वर्णेभ्योऽन्या काचिदानुपूर्वीति । तत्र

आनुपूर्व्यामसत्यां स्यात् सरो रस इति श्रुतौ ॥३०४॥

न कार्यभेद इति चेत्

---

[1] अत्र 'अपि'ग्रहणे एकाक्षराधिक्यं किन्तु कर्णगोमिसंमतत्वात् स पाठः गृहीतः ।

[2] फलोत्पत्तौ—क०

न हि सरो रस इत्यादिपदेषु कश्चिद्वर्णभेदः । न च वर्णव्यतिरिक्तमन्यद्यतः कार्यभेदः स्यात् । भिन्नाञ्च तयोः प्रतिभां पश्यामः । आनुपूर्वीमेव चातुल्याम् । न च कारणाभेदे कार्यभेदो युक्तः । तस्मादस्ति सा भेदवती यतोऽयं प्रतीतिभेदः ॥

सत्यम् ।

अस्ति सा पुरुषाश्रया ।

तथा हि—

यो यद्वर्णसमुत्थानज्ञानजात् ज्ञानतो ध्वनिः ॥३०५॥
जायते तदुपाधिः स श्रुत्या समवसीयते ।
तज्ज्ञानजनितज्ञानः स श्रुतावपटुश्रुतिः ॥३०६॥
अपेक्ष्य तत्स्मृतिं पश्चादाधत्ते स्मृतिमात्मनि ।
इत्येषा पौरुषेय्येव तद्धेतुग्राहिचेतसाम् ॥३०७॥
कार्यकारणता वर्णेष्वानुपूर्वीति कथ्यते ।

चित्तसमुत्थाना हि वाग्विज्ञप्तिर्वर्णपदवाक्याभिधाना । तत्र सकारसमुत्थापनचेतसा समनन्तरप्रत्ययेन अकारोत्थापनचित्तमुत्पाद्यते । तथा रेफाऽकारविसर्जनीयोत्थापनानि पूर्वपूर्वप्रत्ययानि। तदिमेऽन्यान्यहेतवो वर्णाः स्वकारणानुपूर्विजन्मानः । श्रुतिकालेऽपि यदा मन्दचारिणः पूर्ववर्णज्ञानसहकारिप्रत्ययापेक्षाः स्वज्ञानं जनयन्ति, तदा पूर्ववर्णस्मरणापेक्षा एव स्मृतिमुपलीयन्ते । स एव वर्णानां भिन्नकार्यकारणभावप्रत्ययनिवृत्तिधर्मा भिन्ननिवर्त्तनधर्मा च स्वभावः पुरुषसंस्कारभेदभिन्नः क्रम इत्युच्यते ॥

अन्यदेव ततो रूपं तद्वर्णानां पदं पदम् ॥३०८॥
कर्तृसंस्कारतो भिन्नं सहितं कार्यभेदकृत् ॥

तस्मान्न खल्वेक एव पदेषु वर्णानां स्वभावः, कर्तृचित्तसंस्कारभेदेन भेदात् । स च परस्परसहितः कार्यभेदहेतुः ॥

सा चानुपूर्वी वर्णानां प्रवृत्ता रचनाकृतः ॥३०९॥
इच्छाऽविरुद्धसिद्धीनां स्थितक्रमविरोधतः ।

कार्यकारणभूतप्रत्ययोत्पन्नस्वभावविशेषो वर्णानामानुपूर्वीत्युक्तम् । सा च पुरुषवितर्कविचारकृतेति न स्थितक्रमा वर्णाः, इच्छाऽविरुद्धसिद्धक्रमत्वात् । कर्मविशेषानुक्रमवत् । न हि स्थितक्रमाणां देशकालयोर्हिमवद्विन्ध्यमलयादीनां बीजाङ्कुरादीनां च स्वेच्छया क्रमरचना शक्यते कर्तुम् ॥

तत एव पुरुषधर्मसंख्याते विकल्पानुक्रमे सति भावात्, असति चाऽभावात्

कार्यकारणतासिद्धेः पुंसां वर्णक्रमस्य च ॥३१०॥
सर्वो वर्णक्रमः पुंभ्यो दहनेन्धनयुक्तित् ।

सतीन्धने दाहवृत्तेरसत्यभावाददृष्टेन्धनोऽपि दहनो नाऽनिन्धनस्तस्य देशकालनियमाऽयोगात् । नियमे च तस्यैवेन्धनत्वाद्दहनोपादानलक्षणत्वादिन्धनस्य । तथाऽयमपि वर्णानुक्रमः पुरुषविकल्पं यदि नापेक्षेत निरालम्बनः स्वयं प्रकाशेत । यत्नेऽपि न शक्येत । तत्प्रभवात् क्वचिच्छक्तौ सर्वस्तथा स्यात्, विशेषाभावात् । तद्भावभाविनस्तद्विशिष्टस्य वाऽतत्कृतौ सर्वत्र कार्यकारणभावश्च निराकृतः स्यात्, अन्वयव्यतिरेकलक्षणत्वात्तस्य । लक्षणान्तरं वा वक्तव्यम् । सर्वेऽपि घटादयो भावाः कृत्रिमाः अकृत्रिमाः प्रसजन्ति । तत्राप्येवं विकल्पनायाः संभवात्, विशेषाभावाच्च । तानपि हि परक्रियादर्शनरूपकानथान्यः करोत्यविदितकर्त्तारश्च केचिदिति सर्वेषां केषांचिद्वाऽक्रियाभिनिवेशोऽस्तु । तस्मात् सर्वैवेयं वर्णानुपूर्वी प्रसिद्धकार्यकारणभाववस्तुधर्माऽनतिक्रमात् पुरुषकृता ॥

अत एव

असाधारणता सिद्धा मन्त्राख्यक्रमकारिणाम् ॥३११॥
पुंसां ज्ञानप्रभावाभ्यामन्येषां तदभावतः ।

अयं क्रमो वर्णानां विषनिर्घातादिसमर्थो नान्य इति यद्यन्योऽपि जानीयात् तं तथैव प्र[37a]तिपद्येत । न चैवम् । तस्मादयमनुक्रमः स्वभावतोऽपि कार्यकृत् कैश्चिदेव विज्ञात इत्यस्ति परोक्षार्थदर्शी पुरुषः । न हि—'अयमर्थः नायमिति' शक्यमुन्नेतुम्, असंकीर्णस्य लिङ्गविशेषस्यासिद्धेः ।

प्रत्यक्षयोरप्यनुपदिष्टयोर्मन्त्रामन्त्रयोरपरिज्ञानात् । उपदेशेऽपि कथंचित् स्वभावविवेकाप्रतीतेरन्यत्र कार्यसंवादात् । तस्य च करणात् प्राग्द्रष्टुमशक्यत्वात् ।

न चायमनुक्रमः स्वभावतः कारकः, कस्यचिदाशु सिद्धेः । अन्यस्य चिरादपरस्य व्रतचरणाद्यपेक्षणात् । एकस्मादपि कर्मणः कयोश्चिदर्थानर्थसंदर्शनात् । वहतामपि मन्त्राणां पुनः क्वचिद्विसंवादात् । न ह्ययं प्रकारः स्वभावे युक्तः, स्वभावस्य सर्वत्राऽविशेषात् । पुरुषस्तु स्वेच्छावृत्तिः सत्त्वसभागतादिवशात्, सेवाविशेषाद्वा कंचिदनुगृह्णाति, नापरमिति युक्तम् ।

व्रतचर्याभ्रंशादिना धर्माऽधर्मोपचये धर्माऽधर्मात्मनोर्वा प्रकृत्या सिद्ध्यसिद्धी इति चेत् । न । धर्मविरुद्धानामपि क्रौर्यस्तेयमैथुनहीनकर्मादिबहुलानां व्रतानां **डाकिनीभगिनीतन्त्रादिषु** दर्शनात् । तैश्च सिद्धिविशेषात् । न चैवंविधो धर्मस्वभाव इति च यथावसरं निवेदयिष्यामः । मैत्रीशौचधर्मपरायणा[नां] च तन्निमित्तमेव कस्याश्चित् सिद्धेरसिद्धेः, विपर्यये च पुनः सिद्धेः । न चैकरूपात् कर्मणः स तद्विरोधी धर्मो युक्तो अधर्मश्च ।

कथमिदानीं धर्मफलमिष्टमधर्मात्मनो व्रतादेरश्नुते ? न वै तस्यैव तदिष्टं फलं व्रतादेर्विपाकोऽपि तु पूर्वस्य कर्मणः । ब्रह्महत्यादेशानुष्ठानात् ग्रामप्रतिलम्भवत् । तस्य त्वधर्मात्मनो व्रतस्यागामि फलमनिष्टम् । स तु मन्त्रादिप्रयोगस्तस्येष्टफलस्य कर्मणः कथंचिदुपकारात् पाचकः, चित्रत्वादुपकारकशक्तेः । पुरुषविशेषाश्रयविपाकधर्मा स धर्मस्तेन कृतः स तथा तदाराधनेन फलतीति । तत्प्रयोगोपकारविपाकधर्मणः कृतत्वात्तत्फलस्य कर्मणः । विनापि पुरुषेण तदुपकारात् फलमिति चेत् । न । पुरुषाकारस्वभावचर्याधिमुक्तिवैयर्थ्यप्रसङ्गात् ।

तस्याप्युपकारत्वे सिद्धः पुरुषविशेषो साधारणगुणः, तदधिमुक्तेरेव हि विषयक(विषक)-र्मादिकरणात् ।

तस्मान्न मन्त्राः पुरुषप्रणीता अपि तदुपयोगनिरपेक्षाः स्वभावेन फलदाः ॥

येऽपि तन्त्रविदः केचिन्मन्त्रान् कांश्चन कुर्वते ॥३१२॥

प्रभुप्रभावस्तेषां स तदुक्तन्यायवृत्तितः ।

रथ्यापुरुषा अपि केचन तन्त्रज्ञाः स्वयंकृतैर्मन्त्रैः किंचित् कर्म कुर्वन्ति । तथान्योऽप्यन-तिशयश्च स्यात् कर्ता च मन्त्राणामिति । न । तेषां प्रभाववतैवाधिष्ठानात् । तत्कृतं हि ते समयमनुपालयन्तस्तदुपदेशेन च वर्त्तमानाः समर्थाः, तत्समयोपदेशनिरपेक्षाणामसा-मर्थ्यात् । तत्रापि तदाकारध्यानादेरेव प्रयोगात् । तस्मात्तदधिष्ठानमेव तत्तादृशमित्युन्नेयम् ।

अपि च—सोऽपि तादृशः प्रभाववानेवाऽनन्यसाधारणशक्तित्वादिति पुरुषविशेष एव समर्थितः ॥

कृतकाः पौरुषेयाश्च वाच्याः मन्त्राः फलेप्सुना ॥३१३॥

न ह्यकृतकानां प्रयोगः संभवति । न चाप्रयुक्तेभ्यः फलमिति प्रयोगात् फलमिच्छता कृतका मन्त्रा वाच्याः, पौरुषेयाश्च, पुरुषाधिष्ठानमन्तरेणान्यतोऽसंभवत्फलानां फलदर्शनात् । कृतसमयकाव्यादिवत् ॥

अशक्तिसाधनं पुंसामनेनैव निराकृतम् ।

प्रतिपादिता हि पुरुषकृतास्तदधिष्ठानाच्च फलदा मन्त्राः । तदस्ति कश्चिदतिशयवान् स इति । तत्प्रतिक्षेपसाधनान्यपि प्रतिव्यूढानि ॥

बुद्धीन्द्रियोक्तिपुंस्त्वादिसाधनं यत्तु वर्ण्यते ॥३१४॥

प्रमाणाभं यथार्थास्ति न हि शेष[37b]वतो गतिः ।

यत्तु बुद्धीन्द्रियवचनयोगात् पुंस्त्वादिति पुरुषातिशयप्रतिक्षेपसाधनं तत्त्वगमकमेव, प्रतिक्षेपसामान्यसाधनयोरसंभवात् । न ह्यतीन्द्रियेष्वतद्दर्शिनः प्रतिक्षेपः संभवति । सता-मप्येषामज्ञानात् । अत एव विरोधासिद्धेः । अविरोधिना च सह संभवाऽविरोधादित्य-प्युक्तम् । नापीतरसामान्यसिद्धिर्विशेषाऽसंभवस्य ज्ञातुमशक्यत्वात् । ईदृशेषु चानुपलब्धेर्हे-तुत्वप्रतिक्षेपात् । पुंस्त्वादिसाम्येऽपि कस्यचिद्विशेषस्य दर्शनात् । संभवद्विशेषे च साम्याऽसिद्धि-रित्युक्तम् । तस्माच्छेषवदनुमानमेतत् व्यतिरेकस्य संदेहादसमर्थमदर्शनेऽपि विपक्षवृत्तेः ॥

अपि चैवंवादिनो **जैमिनीयाः** स्वमेव वादं स्ववाचा विधुरयन्ति । तथा हि—

अयमर्थो नायमर्थ इति स्वयं शब्दा वदन्ति न ॥३१५॥

कल्प्योऽयमर्थः पुरुषैस्ते च रागादिसंयुताः ।

तत्रैकस्तत्त्वविन्नान्य इति भेदश्च किं कृतः ॥३१६॥

तद्वत् पुंस्त्वे कथमपि ज्ञानी कश्चित् कथं न वः।

न खल्वेते वैदिकाः शब्दा एवं विक्रोशन्ति—एते भवन्तो ब्राह्मणा अयमस्माकमर्थो ग्राह्यो नान्य इति। केवलमभिव्यक्तार्थविशेषसंसर्गाः श्रुतिमभिपतन्ति। तत्रैकः पुरुषः कंचिदर्थं कल्पयत्यन्योऽपरम्। न च शब्दानां कश्चित् स्वभावप्रतिनियमो येनैकमर्थमनुरुन्धते नाऽपरम्। केवलं समयवशात्तं तमाविशन्तो दृश्यन्ते। तेषामविदितार्थनियमानामत्यक्षावेशादविद्वानेव दोषोपप्लुतः कश्चित्तत्त्वं व्याचष्टे नापर इति न न्याय्यम्।

अथ कुतश्चिदतिशयाद् बुद्धीन्द्रियादीनां स एव वेत्ति नापरः। तस्य कुतोऽयमतीन्द्रियज्ञानातिशयः? तथान्योऽपि द्रष्टा देशकालस्वभावविप्रकृष्टानामर्थानां किमसंभवी दृष्टः। न हि तत्प्रतिक्षेपसाधनानि कानिचिद्यानि नैनं उपलीयन्ते। यथायं तत्साधनसंभवेऽप्यस्य विशेषस्तथान्यस्यापि स्यादित्यनभिनिवेशो युक्तः॥

यस्य प्रमाणसंवादि वचनं सोऽर्थविद्यदि ॥३१७॥

न ह्यत्यन्तपरोक्षेषु प्रमाणस्यास्ति संभवः।

स्यादेतत्—न वयं पुरुषप्रामाण्यात्[१] कस्यचिद्व्याख्यानमभिनिविष्टाः। किं तर्हि? प्रमाणसंवादात्। बहुष्वपि व्याख्यातृषु यः प्रमाणं प्रत्यक्षादिकं संस्यन्दयति सोऽनुमन्यते। तन्न। अतीन्द्रियेष्वदृष्टादिषु प्रमाणान्तराऽवृत्तेः। तदसंभवादेव ह्यागमस्तत्प्रतीत्यर्थमुपयाच्यते। अन्यथा सत्यपि तस्मिन् प्रमाणान्तरावृत्तावप्रतिपत्तेः। ततश्च केवलादर्थप्रतिपत्तेरसाधनमेवागमः स्यात्। केवलादन्यतोऽप्यतीन्द्रियेष्वप्रतिपत्तिरिति चेत्। कथमतीन्द्रियश्च नाम प्रत्यक्षादिविषयश्च? ते पुनः स्वविषयेऽप्यागममपेक्ष्यैव साधकाश्चेत्, अनागमो धूमादेरग्न्यादिप्रत्ययो न स्यात्। न वै प्रवृत्ते आगमे प्रमाणान्तरमन्विष्यते। किं तर्हि? सैवागमप्रवृत्तिर्न जायत इति चेत्। स्वयं समर्थस्य प्रसाधनेऽस्य तदागमोपधानं कमतिशयं पुष्णाति? असमर्थं त्वागमप्रवृत्तिमपि नैव साधयिष्यति। सा चातीन्द्रियार्थसंबद्धाऽऽगमप्रवृत्तिरतीन्द्रिया कथमन्येन सिद्धा?

अन्यच्चैवमागमलक्षणं स्यात्। तथा हि—

यस्य प्रमाणसंवादिवचनं तत्कृतं वचः ॥३१८॥

स आगम इति प्राप्तं निरर्थाऽपौरुषेयता।

तुल्येऽप्यागमवादे प्रमाणबलादस्यागमस्य क्वचिदागमत्वे प्रमणसंवादो वचनानामागमलक्षणं स्यात्। नापुरुषक्रिया, तस्याः सर्वार्थेषु तुल्यत्वेऽपि प्रमाणाबाधनात् प्रतिपत्तेस्तद्भावेऽप्यन्यत्र प्रमाणाऽसंवादादित्यनिष्टत्वात्॥

किं च—

यद्यत्यन्तपरोक्षेऽर्थेऽनागमज्ञानसंभवः ॥३१९॥

---

[१] ण्याः—क०

अतीन्द्रियार्थवित् कश्चिदस्तीत्यभिमतं भवेत् ।

यद्यागमानपेक्षं ज्ञानयथातथ्यं पुरुषस्येष्यते परोक्षेऽर्थे—सन्ति पुरुषा अतीन्द्रियार्थदृश इतीष्टं स्यात् । प्रत्यक्षपूर्वकाणां प्रमाणानामतद्दर्शनेऽसंभवात् । प्रत्यक्षावृत्तेर्हि तेषु प्रमाणान्तरस्याऽसंभवात् । अतदालम्बनप्रतीतये प्रमाणमागमः । प्रमाणान्तरवृत्तिस्तु प्रत्यक्षमन्वाकर्षयतीति न पुरुषातिशयो निवार्यः स्यात् । तस्मान्नास्त्यतीन्द्रियेषु प्रमाणान्तरवृत्तिः ॥

अत एवागमस्यार्थविशेषवृत्तेरपरिज्ञानादयं **जैमिनिरन्यो वा**

स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः ॥३२०॥
न वे[38a]दयति वेदोऽपि वेदार्थस्य कुतो गतिः ।

सर्व एव हि पुरुषोऽनतिक्रान्तदोषविप्लवस्तमतीन्द्रियमर्थविशेषप्रतिनियमं व्याख्यां वा स्वयं न वेत्ति नाप्येनमन्यो वेदयति, तस्यापि तुल्यप्रसङ्गात् । न ह्यन्धेनाकृष्यमाणोन्धः पन्थानं प्रतिपद्यते । नापि वेदः स्वार्थं विवृणोति, उपदेशवैयर्थ्यप्रसङ्गात् । तदयमपरिज्ञातार्थः शब्दगडुरेवं शल्यभूतोऽसद्दर्शनस्नायूपनिबद्धो दुरुद्धरो दुःखमासादयति ॥

तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ ॥३२१॥
खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ।

क्वचिदप्यर्थे प्रत्यासत्तिविप्रकर्षरहितस्य "अग्निहोत्रं जुहुयात स्वर्गकामः"[मैत्री० ६.३६] इत्यादिवाक्यस्य 'भूतविशेषे यथाभिमतं घृतादि प्रक्षिपेत्' इत्ययमर्थो न पुनः 'श्वमासं खादेत्' इति नातिशयं पश्यामः ।

नन्वयं सर्वत्र समानः प्रसङ्गः परोक्षदैशिकानां वचनानामर्थं यथाभिप्रायमिदानीन्तनाः समनुयन्ति आहोस्विद्विपर्ययमिति । न । उपदेष्टुः स्वाभिप्रायप्रकाशनेन संप्रदायसंभवात् । न ह्ययमदैशिकानां संभवति । लोकप्रत्यायनाभिप्रायश्च ब्रुवाणो लोकसंकेतप्रसिद्धिमनुपालयतीति ततोऽपि तदर्थसिद्धिः स्यात् । नाऽपौरुषेयाणां शब्दानाम्, तत्र कस्यचित् समीहाभावात् ।

अपि च—न्यायमेवानुपालयन्तः पण्डिता हेयोपादेयतदाश्रयेषु संघटन्ते, न प्रवादेनेति न समानः प्रसङ्गः । तच्च यथावसरं प्रतिपादयिष्यामः ॥

ननु कश्चिल्लोकसंनिवेशादिरयुक्तिविषयोपि संभावनीयपुरुषवचनादर्थः प्रतिपद्यते । न । अप्रत्ययात् । न हि क्वचिदस्खलित इति सर्वं तथा, व्यभिचारदर्शनात्, तत्प्रवृत्तेरविसंवादेन व्याप्त्यसिद्धेश्च । अगत्या चेदमागमलक्षणमिष्टम् । नातोऽर्थनिश्चयः । तन्न प्रमाणमागम इत्यप्युक्तम् ।

अपौरुषेयाणां शब्दानामर्थज्ञानं न संप्रदायान्न युक्तेर्न लोकादिति तत्राऽप्रतिपत्तिर्न्याय्या ॥

प्रसिद्धो लोकवादश्चेत्

प्रतिपत्तिहेतुः[१] ।

---

[१] एतत्पर्यन्तं तिब्बतीभाषातोऽनूदितं श्रीसांकृत्यायनेन स्वसंपादितवृत्तौ ।

तत्र कोऽतीन्द्रियार्थदृक् ॥३२२॥

अनेकार्थेषु शब्देषु येनार्थोऽयं विवेचितः ।

न ह्ययं लोकव्यवहारोऽपौरुषेयाच्छब्दार्थसंबन्धात् । किं तर्हि ? समयात् स्वशास्त्रकारसमयात् पाणिनीयादिव्यवहारवदुपदेशापेक्षणात् । न ह्यपौरुषेये तस्मिन्नुपदेशो युक्तः, तस्य केनचिदज्ञानात्, अतीन्द्रियत्वात् । ऐन्द्रियकत्वे स्वयं प्रतिपत्तिप्रसङ्गात् । रूपादिवत् । उपदेशे च पुरुषाणां स्वतन्त्राणां यथातत्त्वमुपदेशेनाऽविसंवादस्याऽसिद्धेरनाश्वासः ।

वेदवद्व्याख्यानमप्यनाद्यपौरुषेयं संप्रदायाऽविच्छेदादागतं ततोऽर्थसिद्धिरिति चेत् । तस्यापि शब्दात्मके तुल्यः पर्यनुयोगः—कथमस्यार्थो वेदितव्य इति । पुरुषो हि स्वयं समितानां शब्दानामर्थं शृङ्गग्राहिकयाऽपि तावदबुधं बोधयेदित्यस्ति पौरुषेयाणामर्थगतौ उपायः । अपौरुषेयस्तुशब्दो नैवं करोति । न चास्य कश्चित् क्वचित् संबन्धनियमं ज्ञातुमीश इत्यप्रतिपत्तिरेव तदर्थस्य ।

अपि च वेदस्तद्व्याख्यानं वा पुरुषेण पुरुषायोपदिश्यमानमनष्टसंप्रदायमेवानुवर्त्तत इत्यत्रापि समयः शरणम्, आगमभ्रंशकारिणामाह्रोपुरुषिकया, तद्दर्शनविद्वेषेण वा, तत्प्रतिपन्नखलीकाराय धूर्तव्यसनेन, अन्यतो वा कुतश्चित् कारणादन्यथारचनादर्शनात् ।

अपि चात्र भवान् स्वमेव मुखवर्णं स्ववादानुरागान्नूनं विस्मृतवान् 'पुरुषो रागादिभिरुपप्लुतोऽनृतमपि ब्रूयादिति नास्य वचनं प्रमाणम्' इति । तदिहापि किं न प्रत्यवेक्ष्यते संभवति न वेति ? स एवोपदिशन्नुपप्लवाद्वेदं वेदार्थं वान्यथाऽप्युपदिशेदिति । श्रूयन्ते हि कैश्चित् पुरुषैरुत्सन्नोद्धृतानि शाखान्तराणीदानीमपि कानिचिद्विरलाध्येतृकाणि । तद्वत् प्रचुराध्येतृकाणामपि कस्मिंश्चित् काले कथंचित् संहारसंभवात् । पुनः संभावितपुरुषप्रत्ययात् प्रचुरतोपगमनसंभावनासंभवात् । तेषां च पुनः प्रतानयितॄणां कदाचिदधीतविस्मृताध्ययनानामन्येषां वा संभावनाभ्रंशभयादि[38b]नाऽन्यथोपदेशसंभवात् । तत्प्रत्ययाच्च तद्भक्तानामविचारेण प्रतिपत्तेर्बहुष्वध्येतृषु संभाविताल् पुरुषात् बहुलं प्रतिपत्तिदर्शनात् । ततोऽपि कथंचिद्विप्रलम्भसंभवात् ।

किं च परिमितव्याख्यातृषु पुरुषपरम्परामेव चात्र भवतामपि शृणुमः । तत्र कश्चिद् द्विष्टाज्ञधूर्त्तानामन्यतमः स्यादपीत्यनाश्वासः ।

तस्मान्नापौरुषेयाद्व्याख्यानात्, नापि सामयिकाल्लोकव्यवहाराद्वेदार्थसिद्धिः । असामयिकत्वेऽपि नानार्थानां शब्दानां व्यवहारे दर्शनात् कस्यचिदप्रसिद्धार्थस्याप्रसिद्धस्य वा पुनः व्युत्पत्तिदर्शनेन सर्वत्र तदाशङ्काऽनिवृत्तेः । सर्वेषां यथार्थनियोगेऽप्यवैगुण्येन यथासमयं प्रतीतिजननात्, इष्टानिष्टयोरविशेषात् । अविशिष्टानां सर्वार्थेष्वेकमर्थमत्यक्षसंयोगमनत्यक्षदर्शिनि पुरुषसामान्ये को विवेचयेद्यतो लोकात् प्रतीतिः स्यात् ॥

अपि च—स्वयमप्ययं न सर्वत्र प्रसिद्धिमनुसरति । यस्मात्—

स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः ॥३२३॥

अनेनैव निर्वर्ण्यमानः । मनुष्यातिशायिपुरुषविशेषनिकेतोऽतिमानुषसुखाधिष्ठानो नानोपकरणः स्वर्गः । तन्निवासिन्यप्सरा उर्वशीनामेति लोकवादः । तमनादृत्यान्यामेवार्थकल्पनामयं कुर्वाणः शब्दान्तरेषु कथं प्रसिद्धिं प्रमाणयेत् ।

तत्राविरोधादभ्युपगम इति चेत् । न । अत्राप्यतीन्द्रिये विरोधाऽसिद्धेः । अन्यत्राप्यविरोधस्य दुरन्वयत्वात् । विरुद्धामप्यग्निहोत्रात् स्वर्गावाप्तिं मान्द्यादयं न लक्षयेदपि । विरोधाविरोधौ च बाधकसाधकप्रमाणवृत्ती । ते चात्यक्षे नाभिमते । तत् कथं तद्वशात् तत्प्रतीतिः ।

न च वचनवृत्तिरेवाऽविरोधोऽन्यत्रापि प्रसङ्गात् । अपौरुषेय आगमस्तस्य प्रवादादर्थसिद्धिः । तत्र पुनर्विरोधचिन्तायामनाश्वास आगमे स्यात् । सत्यपि तस्मिन्नतथाभावादर्थस्याप्रमाणवृत्तेरन्यस्यापि शङ्कनीयत्वात् ॥

यदुक्तम्—"अग्निहोत्रं जुहुयात् स्वर्गकामः" [मैत्री ६.३६] इत्यत्र श्वमांसभक्षणचोदनाविकल्पो भवत्विति—स न भवति प्रदेशान्तरेषु तथार्थस्य वचनात् । न । तस्यार्थाऽपरिज्ञानात्, प्रदेशान्तरेष्वपि तथाविधार्थकल्पनाया अनिवार्यत्वात् । यदि हि क्वचिद्विदितार्थोऽयमपौरुषेयः शब्दराशिः स्यात्तदा ततोऽर्थप्रतीतिः स्यात् । ते तु बाहुल्येऽप्यन्धा एव सर्व इति यथेष्टं प्रणीयन्ते ।

तस्मात्—

शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना ।

यादृशी—"अग्निहोत्रं जुहुयात् स्वर्गकामः" [मैत्री० ६.३६] इत्यस्य वाक्यस्य ॥

अपि च—

प्रसिद्धिश्च नृणां वादः प्रमाणं स च नेष्यते ॥३२४॥
ततश्च भूयोर्थगतिः किमेतद् द्विष्टकामितम् ।

न प्रसिद्धिर्नामान्या, अन्यत्र जनप्रवादात् । ते च सर्वे जना रागाद्यविद्यापरिगतत्वादसंभावनीययाथातथ्यवचनाः । तदेषां प्रवादो न प्रमाणम् । न हि कस्यचिदपि सम्यक्प्रतिपत्तेरभावे बाहुल्यमर्थवद्भवति । पारसीकमातृमैथुनाचारवत् । तेषामेव पुरुषाणां वचनात् पुनः परोक्षार्थप्रतिपत्तिरिति तदेव कथं युगपद् द्वेष्यं च काम्यं च ?

अथ[1] प्रसिद्धिमुल्लङ्घ्य कल्पने न निबन्धनम् ॥३२५॥
प्रसिद्धेरप्रमाणत्वात् तद्ग्रहे किं निबन्धनम् ।

प्राप्तप्रतिलोमनेनाऽन्यत्र प्रवृत्तिर्गुणदोषदर्शनेन युक्तेति प्रसिद्धेरन्वय इति चेत् । न । प्राप्तेः प्रमाणवृत्तिलक्षणत्वात् । यत् किंचन ग्रहणं हि प्रसिद्धिमप्रमाणयतस्तन्मुखेन प्रतीतिः । न्याय्यात् प्राप्तिप्रतिषेधात्तुल्यां स्वपरविकल्पयोरुभयथापि वृत्तिरिति कः प्रसिद्धावनुरोधः ॥

---

[1] अर्थे—क०

अपि चेयम्—

उत्पादिता प्रसिद्ध्यैव शङ्का शब्दार्थनिश्चये ॥३२६॥

यस्मान्नानार्थवृत्तित्वं शब्दानां तत्र दृश्यते ।

न प्रसिद्धेरेकार्थनिश्चयः शब्दानाम्, तत एव शङ्कोत्पत्तेः । नानार्था हि शब्दा लोके दृश्यन्ते । लोकवादश्च प्रतीतिः । अत एव नानार्थतेति ततोऽर्थनियमो न युक्तः ॥

अन्यथाऽसंभवाऽभा[39a]वान्नानाशक्तेः स्वयं ध्वनेः ॥३२७॥

अवश्यं शङ्कया भाव्यं नियामकमपश्यताम् ।

अन्तरश्लोकः ॥

तस्मादविदितार्थविभागेषु शब्देष्वेकमर्थमत्यक्षसंयोगमनालम्बनसमारोपं विनिश्चित्य व्याचक्षाणो **जैमिनि**स्तद्व्याजेन स्वमेव मतमाहेति न तीर्थकरान्तरादस्य विशेषं पश्यामः । तथा हि—तदर्थवचनव्यापारशून्यस्य तत्समारोपेणाऽभिधानं न स्ववचनमि(म)तिशेते । तत्कारिणा केवलं मिथ्या विनीततैवात्मनः समुद्द्योतिता स्यात् । तथा हि—

एष स्थाणुरयं मार्ग इति वक्तीति कश्चन ॥३२८॥

अन्यः स्वयं ब्रवीमीति तयोर्भेदः परीक्ष्यताम् ।

निरभिप्रायव्यापारवचने स्थाणौ समारोप्योपदिशतः स्वतन्त्रस्य वा स्वयं वचनोपगमे न कश्चिद्विशेषोऽन्यत्र जडस्य प्रतिपत्तिमान्द्यात् ॥

अपि चैकार्थनियमे सति एनं **जैमिनि**र्जानीयात् । स एव शब्दस्य—

सर्वत्र योग्यस्यैकार्थद्योतने नियमः कुतः ॥३२९॥

न हि शब्दस्य कश्चिदर्थः स्वभावनियतः, सर्वत्र योग्यत्वात् । अयोग्यत्वे च तदप्रच्युतेरविधेयस्य पुरुषाणां क्वचिदुपनयनाऽपनयनाऽसंभवात् ।

ज्ञाता वातीन्द्रियाः केन विवक्षावचनादृते ।

पुरुषप्रणीते हि शब्दे कयाचिद्विवक्षया स तां कदाचित् क्वचिन्निवेदयेदपीति विवक्षापूर्वकाणां शब्दानामर्थनियमः प्रतीयेतापि । अपौरुषेये तु विद्यमानोप्यर्थनियमः कथं विज्ञेयः ? स्वभावभेदस्याभावात् । सति वा, प्रत्यक्षस्य स्वयं प्रतीतिप्रसङ्गात् । अप्रत्यक्षेऽपि[1] केनचित् ज्ञातुमशक्यत्वात् । न चास्ति कश्चिद्विशेषः । सर्वशब्दा हि सर्वार्थप्रत्यासत्तिविप्रकर्षरहिताः ॥

ततस्तेषाम्

विवक्षा नियमे हेतुः संकेतस्तत्प्रकाशनः ॥३३०॥

अपौरुषेये सा नास्ति तस्य सैकार्थता कुतः ।

---

[1] अप्रत्यक्षत्वे—क०

विवक्षया हि शब्दोऽर्थे[1] नियम्यते, न स्वभावतः, तस्य क्वचिदप्रतिबन्धेन सर्वत्र तुल्यत्वात् । यत्रापि प्रतिबन्धस्तदभिधाननियमाऽभावात्, सर्वशब्दैः करणानामभिधानप्रसङ्गात् । तस्माद्विवक्षाप्रकाशनायाऽभिप्रायनिवेदनलक्षणः संकेतः क्रियते । अपौरुषेये तु न विवक्षा, न संकेतः, कस्यचिदभिप्रायाऽभावादिति न नियमो न तज्ज्ञानम् ॥

स्वभावनियमेऽन्यत्र न योज्येत तथा पुनः ॥३३१॥

यदि संकेतनिरपेक्षः स्वभावत एवार्थेषु शब्दः, न[2] नियमः स्यात् । उक्तमत्राऽप्रतिबन्धादनियम[3] इति ॥

अपि च । स्वाभाविके वाच्यवाचकभावे न पुर्नविवक्षया;

यथेष्टं न नियुज्येत संकेतश्च निरर्थकः ।

स्यात् । न हि स्वभावभेद इन्द्रियगम्यः स्वप्रतीतौ परिभाषादिकमपेक्षते । नीलादिभेदवत् । तदपेक्षप्रतीतयस्तु न वस्तुस्वभावाः । किं तर्हि ? सामयिकाः राजचिह्नादिवत् । यश्च सामयिकः स स्वभावनियतोऽयुक्तस्तस्येच्छावृत्तेः । अत एव संकेतात् स्वभावविशेषस्य व्यक्तौ नियमः कुतः ? स्वेच्छावृत्तिः संकेतः । स इहैव कर्त्तुं शक्यते नान्यत्रेति नोपरोधोऽस्ति । स च पुरुषैः स्वेच्छया क्रियमाणस्तमेव स्वभावं व्यनक्ति नान्यमिति न नियमोऽस्ति ॥

यत्र स्वातन्त्र्यमिच्छायाः नियमो नाम तत्र कः ॥३३२॥
द्योतयेत्तेन संकेतो नेष्टामेवास्य योग्यताम् ।

इत्यन्तरश्लोकः ॥

यस्मात् किलेदृशं सत्यं यथाग्निः शीतनोदनः ॥३३३॥
वाक्यं वेदैकदेशत्वादन्यदप्यपरोऽब्रवीत् ।

अन्यस्त्वपौरुषेयमागमलक्षणं परित्यज्यान्यथा प्रामाण्यं वेदस्य साधयितुकामः प्राह— अवितथानि वेदवाक्यानि यत्राप्रतिपत्तिः, वेदैकदेशत्वात् । यथा "अग्निर्हिमस्य भेषजम्" [तैत्ति० सं० ७. ४. १८. २] इत्यादि वाक्यमिति ॥

तस्येदम्

रसवत्तुल्यरूपत्वादेकभाण्डे च पाकवत् ॥३३४॥
शेषवद्व्यभिचारित्वात् क्षिप्तं न्यायविदेदृशम् ।

स्वयमीदृशमाचार्येणानुमानं **नैयायिकानां** यच्छेषवदनुमानं तस्य व्यभिचारमुद्भावयता यथा तुल्यरूपतया फलानां तुल्यरससाध[39b]नवदेकस्थाल्यन्तर्गमात् दृष्टवददृष्टतन्दुलपाकसाधनवच्चासाधनमुक्तम् । तदसाधनत्वे न्यायश्च पूर्वमेवोक्तः । उक्तं चेद[मागमलक्षणमस्मा]भिः । तत्तु सर्वस्य शक्यविचारस्य विषयस्य यथास्वं प्रमाणेन विधिप्रतिषेधसिद्धौ

---

[1] र्थेषु—क० [2] ०र्थेषु शब्दो निलीनः स्यात्—क० [3] ०नियत—क०

नान्तरीयकत्वाभावेऽपि शब्दानामर्थेषु वरं संशयितस्य वृत्तिस्तत्र कदाचिदविसंवादस्य संभवात्। न त्वन्यत्र दृष्टप्रमाणोपरोधस्य पुरुषस्य प्रवृत्तिरिति ॥

यः पुनः प्राकृतविषयस्य वह्नेः शीतप्रतिघातसामर्थ्यस्याभिधानं सत्यार्थमुपदर्श्य सर्वं सत्यार्थमाह शास्त्रं शक्यपरिच्छेदेऽपि विषये प्रमाणविरोधाद् बहुतरमयुक्तमपि

नित्यस्य पुंसः कर्तृत्वं नित्यान्भावानतीन्द्रियान् ॥३३५॥

ऐन्द्रियान् विषमं हेतुं भावानां विषमां स्थितिम्।
निर्वृत्तिं च प्रमाणाभ्यामन्यद्वा व्यस्तगोचरम् ॥३३६॥

विरुद्धमागमापेक्षेणानुमानेन वा वदत्।
विरोधमसमाधाय शास्त्रार्थं चाप्रदर्श्य सः ॥३३७॥

सत्यार्थं प्रतिजानानो जयेद्धाष्ट्र्येन बन्धकीम्।

अप्रच्युताऽनुत्पन्नपूर्वाऽपररूपः पुमान् कर्त्ता क्रमेण कर्मणां कर्मफलानां च भोक्ता समवायिकारणाधिष्ठानभावादिनेत्याह वेदः। तच्चायुक्तमित्यावेदितप्रायम्। नित्यत्वं च केषांचिद्भावानामक्षणिकस्य वस्तुधर्मातिक्रमादयुक्तम्। अप्रत्यक्षाण्येव सामान्यादीनि प्रत्यक्षाणि। जन्मस्थितिनिवृत्तीश्च विषमाः पदार्थानाम्। अनाधेयविशेषस्य प्रागकर्त्तुः परापेक्षया जनकत्वम्। निष्पत्तेरकार्यरूपस्याश्रयवशेन स्थानम्। कारणाच्च विनाश इत्यादिकमन्यदपि प्रत्यक्षानुमानाभ्यां प्रसिद्धविपर्ययमागमाश्रयेण चानुमानेन बाधितमग्निहोत्रादेः पापशोधनसामर्थ्यादिकम्। तस्यैवंवादिनो वेदस्य सर्वस्य शास्त्रशरीरे प्रमाणविरोधमप्रतिसमाधाय संबन्धानुगुणोपायपुरुषार्थाभिधानानि च शास्त्रधर्मानप्रदर्श्यात्यन्तप्रसिद्धविषयसत्याभिधानमात्रेण प्रज्ञाप्रकर्षदुरवगाहगहनेऽपि निरत्ययितां साधयितुकामो बन्धकीमपि प्रागल्भ्येन विजयते।

काचित् किल बन्धकी स्वयं स्वामिना विप्रतिपत्तिस्थाने दृष्टोपालब्धा। सा तं प्रत्युवाच—पश्यत मातः पुरुषस्य वैपरीत्यं मयि धर्मपत्न्यां प्रत्ययमकृत्वात्मीययोर्नेत्राभिधानयोर्जलबुद्बुदयोः करोति। [तिन जर]त्काणेन ग्रामकाष्ठहारकेण प्रार्थितापि न संगता। रूपगुणानुरागेण किल मन्त्रिमुख्यदारकं कामयेऽहमिति।

एवं जातीयकमेतदपि वह्नेः शीतप्रतीकारवचनेन दृष्टप्रमाणविरोधस्याप्यत्यन्तपरोक्षेऽर्थेऽविसंवादानुमानम् ॥

सिध्येत् प्रमाणं यद्येवमप्रमाणमथेह किं ॥३३८॥
न ह्येकं नास्ति सत्यार्थं पुरुषे बहुभाषिणि।

यथेदमतिदुष्करमत्यन्तसत्याभिधानं तथात्यन्ताऽसत्याभिधानमपि। तत्रैकस्य वचनस्य कथंचित् संवादेनाऽवशिष्टस्य तद्वचनराशेस्तथाभावे न कश्चित् पुरुषोऽनाप्तः स्यात् ॥

अपि च।

नायं स्वभावः कार्यं वा वस्तूनां वक्तरि ध्वनिः ॥३३९॥

न च तद्व्यतिरिक्तस्य विद्यतेऽव्यभिचारिता ।

न तावदेतद्वचनं वाच्यानां स्वभावो नाप्येषां कार्यम्, तदभावेऽपि वक्तुर्विवक्षामात्रेण भावात्। न चान्यः कश्चित् कस्यचिदव्यभिचारी । व्यभिचारे च ततोन्यथापि तत्संभवात् तत्भावात्तत्प्रतीतिरयुक्ता ॥

प्रवृत्तिर्वाचकानां च वाच्यदृष्टिकृतेति चेत् ॥३४०॥

स्यादेतत् कार्यमेव वचनं वाचकस्य वाच्यदर्शनवृत्तेः ॥

एवं सति

परस्परविरुद्धार्था कथमेकत्र सा भवेत् ।

यद्येष प्रतिनियमो वाच्यं वस्त्वन्तरेण शब्दो न प्रवर्त्तत इति । भिन्नेषु प्रवादेष्वेकत्र वस्तुनि विरुद्धस्वभावोपसंहारेण वचनवृत्तिर्न स्यात् । न ह्ययं संभवोऽस्ति एकः शब्दो निष्पर्यायं [40a] नित्यश्च स्यादनित्यश्चेति ॥

वस्तुभिर्नागमास्तेन कथंचिन्नान्तरीयकाः ॥३४१॥
प्रतिपत्तुः प्रसिध्यन्ति कुतस्तेभ्योऽर्थनिश्चयः ।

आगमं प्रमाणं तदादर्शितार्थप्रतिपत्तयेऽज्ञो जनः समन्वेषते । समधिगतयाथातथ्यानामुपदेशाऽनपेक्षणाद्, अज्ञस्य चातीन्द्रियगुणपुरुषविवेचनेऽसामर्थ्यात् वचनानां समीहितार्थसत्तामन्तरेणाऽपि वृत्तिं पश्यतो भवितव्यमेवादृष्टव्यभिचारवचसामपि पुरुषाणां वाचि शङ्कया—किं यथार्था नेति । तेन न युक्तमनेन कस्यचिद्वचनेन किंचिन्निश्चेतुम् ॥

तस्मान्न निवृत्त्यापि भावाऽभावः प्रसिध्यति ॥३४२॥

यदुक्तं सर्वविषयत्वादागमस्य सति वस्तुन्यविसंवादेनास्य वृत्तेस्तन्निवृत्तिलक्षणानुपलब्धिरभावं साध[1]यतीति । तदस्य सर्वविषयत्वेऽपि वस्त्वन्तरेणावृत्तौ स्यात् । तच्च नास्ति । ततः प्रतिपत्तुकामस्याऽसिद्धिरित्युक्तम् ॥

तेनासन्निश्चयफलानुपलब्धिर्न सिध्यति ॥३४२½॥

तस्मान्न प्रमाणत्रयनिवृत्तावपि विप्रकृष्टेष्वभावनिश्चयः ॥

वेदप्रामाण्यं कस्यचित् कर्त्तृवादः स्नाने धर्मेच्छा जातिवादावलेपः ।
सन्तापारम्भः पापहानाय चेति ध्वस्तप्रज्ञाने पञ्चलिङ्गानि जाड्ये ॥

